शमनं कोपनं वा वातिकम्। पैत्तिकम्। श्लैष्मिकम्। 'सन्निपाताच्चेति वक्तव्यम्' (वा ३०३७)। सान्निपातिकम्।

१७०५। गोद्व्यचोऽसङ्ख्यापरिमाणाश्वादेर्यत्। (५-१-३९)

गोर्निमित्तं संयोग उत्पातो वा गव्यः। द्व्यचः। धन्यः। यशस्यः। स्वर्ग्यः। 'गोद्व्यचः—' किम्। विजयस्य वैजयिकः। 'असङ्ख्या—' इत्यादि किम्। पञ्चानां पञ्चकम्। सप्तकम्। प्रास्थिकम्। खारीकम्। अश्वादि— आश्विकम्। आश्मिकम्। 'ब्रह्मवर्चसादुपसङ्ख्यानम्—' (वा ३०३५)। ब्रह्मवर्चस्यम्।

१७०६। पुत्राच्छ च। (५-१-४०)

चाद्यत्। पुत्रीयः—पुत्र्यः।

१७०७। सर्वभूमिपृथिवीभ्यामणञौ। (५-१-४१)

सर्वभूमेर्निमित्तं संयोग उत्पातो वा सार्वभौमः। पार्थिवः। सर्वभूमि-शब्दोऽनुशतिकादिषु पठ्यते।

शेषः। **सान्निपातिकमिति** ॥ सन्निपातः वातपित्तश्लेष्माणां सङ्करः दोषाणाम्, इति वैद्यके प्रसिद्धः। तस्य निमित्तं सान्निपातिकम्। ज्वरप्रकोपादौ अपथ्यभक्षणादिसंयोगः, सन्निपातसूचकं जिह्वाकार्ष्ण्यादि च। **गोद्व्यचः** ॥ तस्य निमित्त संयोग उत्पातो वेत्यर्थे गोशब्दात् द्व्यचश्च षष्ठ्यन्तात् यत्प्रत्ययः स्यात्, नतु सङ्ख्यायाः परिमाणात् अश्वादेश्चेत्यर्थः। ठकोऽपवादः। **द्व्यच इति** ॥ उदाह्रियते इति शेषः। **धन्य इत्यादि** ॥ धनस्य यशसः स्वर्गस्य च निमित्त-मित्यर्थः। **विजयस्येति** ॥ निमित्तमिति शेषः। **वैजयिक इति** ॥ आर्हीयष्ठक्। **पञ्चा-नामिति** ॥ निमित्तमिति शेषः। **पञ्चकमिति** ॥ 'सङ्ख्यायाः' इति कन्। **सप्तकमिति** ॥ सप्तानान्निमित्तमित्यर्थः। **प्रास्थिकमिति** ॥ प्रस्थस्य निमित्तमित्यर्थः। आर्हादिति ठग्विधौ परिमाणपर्युदासात् प्राग्वतीयष्ठञ्। **खारीकमिति** ॥ खार्या निमित्तमित्यर्थः। खार्या ईकन्। **अश्वादीति** ॥ प्रत्युदाहरणसूचनमिदम्। **आश्विकमिति** ॥ अश्वस्य निमित्तमि-त्यर्थः। आर्हीयष्ठक्। **आश्मिकमिति** ॥ अश्मनो निमित्तमित्यर्थः। आर्हीयष्ठक्। 'नस्तद्धिते' इति टिलोपः। **ब्रह्मवर्चसादिति** ॥ 'गोद्व्यचः' इति सूत्रे 'ब्रह्मवर्चसाच्च' इति वक्तव्यमि-त्यर्थः। **ब्रह्मवर्चस्यमिति** ॥ ब्रह्मवर्चसस्य निमित्तमित्यर्थः। **पुत्राच्छ च** ॥ तस्य निमित्त-मित्येव। कथन्तर्हि "आरेभिरे यतात्मानः पुत्रियामिष्टिमृत्विजः" इति नहीष्टिः संयोगः उत्पातो वा उच्यते। संयुज्यतेऽनेनेति संयोगः। इष्ट्या हि पुत्रेण फलेन युज्यते यष्टा। **सर्वभूमि** ॥ तस्य निमित्तमित्येव। सर्वभूमि, पृथिवी, आभ्यां यथासङ्ख्यमणञौ स्तः। **सार्वभौम इति** ॥

१७०८ । तस्येश्वरः । (५-१-४२)

१७०९ । तत्र विदित इति च । (५-१-४३)

सर्वभूमेरीश्वरः सर्वभूमौ विदितो वा सार्वभौमः । पार्थिवः ।

१७१० । लोकसर्वलोकाट्ठञ् । (५-१-४४)

'तत्र विदितः' इत्यर्थे । लौकिकः । अनुशतिकादित्वादुभयपदवृद्धिः । सार्वलौकिकः ।

१७११ । तस्य वापः । (५-१-४५)

उप्यतेऽस्मिन्निति वापः क्षेत्रम् । प्रस्थस्य वापः प्रास्थिकम् । द्रौणिकम् । खारीकम् ।

१७१२ । पात्रात्ष्ठन् । (५-१-४६)

पात्रस्य वापः क्षेत्रं पात्रिकम्—पात्रिकी क्षेत्रभक्तिः ।

१७१३ । तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयते । (५-१-४७)

वृद्धिर्दीयते इत्यादि क्रमेण प्रत्येकं सम्बन्धादेकवचनम् । पञ्च अस्मिन्

ठञोऽपवादः अण् । **पार्थिव इति** ॥ पृथिव्याः निमित्त संयोगः उत्पातो वेत्यर्थः । स्त्रियाम्पार्थिवी । सार्वभौमिकशब्दे कथमुभयपदवृद्धिरित्यत आह । **सर्वभूमिशब्दोऽनुशतिकादिषु पठ्यते इति** ॥ तथाच 'अनुशतिकादीनाञ्च' इत्युभयपदवृद्धिरिति भावः । **तस्येश्वरः ॥ तत्र विदित इति च** ॥ सूत्रद्वयमिदम् । सर्वभूमिपृथिवीभ्यामित्यनुवर्तते । तस्य निमित्तं संयोगोत्पाताविति तु निवृत्तम् । पुनस्तस्येत्युक्तेः । तस्येश्वर इत्यर्थे षष्ठ्यन्तात्तत्र विदित इत्यर्थे तु सप्तम्यन्तात् अणञौ स्त इत्यर्थः । योगविभागो यथासंख्यनिवृत्त्यर्थः । उत्तरसूत्रे तत्र विदितः इत्यस्यैवानुवृत्त्यर्थश्च । **लोकसर्व ॥ तत्र विदित इत्यर्थे इति** ॥ योगविभागसामर्थ्यात् तस्येश्वर इति नानुवर्तत इति भावः । **लौकिकः इति** ॥ लोकेषु विदित इत्यर्थः । सर्वभूमिशब्दे विशेषमाह । **अनुशतिकादित्वादिति ॥ तस्य वापः** ॥ अस्मिन्नर्थे षष्ठ्यन्ता-यथाविहितं ठञादयः स्युरित्यर्थः । **प्रास्थिकमिति** ॥ प्रस्थपरिमितबीजवापयोग्यं क्षेत्रमित्यर्थः । 'आर्हात्' इति ठग्विधौ परिमाणपर्युदासात् प्राग्वतीयष्ठञ् । **द्रौणिकमिति** ॥ निष्कादित्वाट्ठक् । **खारीकमिति** ॥ खार्याम् ईकन् । द्रोणस्य खार्याश्च वाप इत्यर्थः । **पात्रात् ष्ठन्** ॥ तस्य वाप इत्येव । **पात्रिकमिति** ॥ पात्रस्य वाप इत्यर्थः । षित्त्वं ङीषर्थमित्याह । **पात्रिकीति ॥ तदस्मिन्** ॥ वृद्धि, आय, शुल्क, उपदा, एषां द्वन्द्वात्प्रथमाबहुवचनम् । ननु तर्हि दीयत इति कथमेकवचनमित्यत आह । **वृद्धिर्दीयते इत्यादि ॥ क्रमेणेति** ॥ एवञ्च तदस्मिन्वृद्धिर्दीयते, तदस्मिन् आयो दीयते, तदस्मिन् शुल्को दीयते, तदस्मिन्नुपदा

वृद्धिः आयः लाभः शुल्कम् उपदा वा दीयते पञ्चकः। शतिकः—शत्यः। साहस्रः। उत्तमर्णेन मूलातिरिक्तं ग्राह्यं वृद्धिः। ग्रामादिषु स्वामिग्राह्यो भाग आयः। विक्रेत्रा मूल्यादधिकग्राह्यं लाभः। रक्षानिर्वेशो राजभागः शुल्कः। उत्कोच उपदा। 'चतुर्थ्यर्थे उपसङ्ख्यानम्' (वा ३०३६)। पञ्च अस्मै वृद्ध्यादिर्दीयते पञ्चको देवदत्तः। 'सममब्राह्मणे दानम्' इतिवदधिकरणत्वविवक्षा वा।

१७१४। पूरणार्धाट्ठन्। (५-१-४८)

यथाक्रमं ठक्टिठनोरपवादः। द्वितीयो वृद्ध्यादिरस्मिन्दीयते द्वितीयिकः। तृतीयिकः। अर्धिकः। अर्धशब्दो रूपकस्यार्धे रूढः।

१७१५। भागाद्यच्च। (५-१-४९)

चाट्ठन्। भागशब्दोऽपि रूपकस्यार्धे रूढः। भागो वृद्ध्यादिरस्मिन्दीयते भाग्यं—भागिकं शतम्। भाग्या—भागिका विंशतिः।

१७१६। तद्धरति वहत्यावहति भाराद्वंशादिभ्यः। (५-१-५०)

दीयते, इत्यर्थेषु प्रथमान्तायथाविहितं ठञादयः स्युरित्यर्थः। **पञ्चक इति** ॥ 'सङ्ख्यायाः' इति कन्। **शतिकः-शत्य इति** ॥ शतमस्मिन्वृद्धिः, आयः, लाभः, शुल्कः, उपदा वा, दीयते इति विग्रहः। 'शताच्च' इति ठन्यतौ। **साहस्र इति** ॥ सहस्रमस्मिन्दीयते इत्यादि विग्रहः। 'शतमानसहस्र' इत्यण्। **रक्षानिर्वेश इति** ॥ रक्षा प्रजापरिपालनम्। तदर्थो निर्वेशः भृतिः रक्षानिर्वेशः। **उत्कोच इति** ॥ मह्यङ्किञ्चिद्दत्तश्चेत् तव राजद्वारेऽनुकूलो भवामीत्यादि समयं कृत्वा यद्गृह्यते तदुत्कोच इत्युच्यते इत्यर्थः। **चतुर्थ्यर्थ इति** ॥ तदस्मै वृद्ध्यादि दीयते इत्युपसङ्ख्यातव्यमित्यर्थः। **सममब्राह्मणे इति** ॥ एवञ्च सम्प्रदानस्यैवाधिकरणत्वविवक्षया इष्टसिद्धेरुपसङ्ख्यानमिदन्नादर्तव्यमिति भावः। **पूरणार्धाट्ठन्** ॥ तदस्मिन् वृद्ध्यादि दीयते इत्यर्थे पूरणप्रत्ययान्तादर्धशब्दाच्च प्रथमान्ताट्ठन् स्यादित्यर्थः। **द्वितीयिकः। तृतीयिक इति** ॥ आर्हादिति ठकोऽपवादष्ठन्। **आर्धिक इति** ॥ अर्धमस्मिन्वृद्ध्यादि दीयते इत्यर्थः। 'अर्धाच्चेति वक्तव्यम्' इति टिठनोऽपवादष्ठन्। टिठनि सति तु स्त्रियां ङीप् स्यात्। आर्धिकेति तु टाबेवेति वक्ष्यते। **रूपकस्येति** ॥ रूप्यस्य कार्षापणस्येत्यर्थः। **रूढ इति** ॥ अन्यथा अर्धशब्दस्य रूप्यकसापेक्षत्वादसामर्थ्यं स्यादिति भावः। रूप्यकस्यार्धे रूढ इत्यत्र प्रमाणं मृग्यम्। असामर्थ्यन्तु नित्यसापेक्षत्वाद्वारयितुं शक्यमित्याहुः। **भागाद्यच्च** ॥ तदस्मिन्वृद्ध्यादि दीयते इत्यर्थे भागशब्दात्प्रथमान्तायत्प्रत्ययश्च स्यादित्यर्थः। **चाट्ठनिति** ॥ पूर्वसूत्रादनुकृष्यते इति शेषः। भागशब्दोऽपि रूप्यकस्यार्ध इति वर्तते इति शेषः। **तद्धरति वहति** ॥ वंशाद्भारादिभ्य इत्येकवचनबहुवचनान्तयोः सामानाधिकरण्यासम्भवात्

वंशादिभ्यः परो यो भारशब्दस्तदन्तं यत्प्रातिपदिकं तत्प्रकृतिकाद्द्वितीयान्तादित्यर्थः। वंशभारं हरति वहत्यावहति वा वांशभारिकः। ऐक्षुभारिकः। 'भाराद्वंशादिभ्यः' इत्यस्य व्याख्यान्तरं 'भारभूतेभ्यो वंशादिभ्यः' इति। भारभूतान्वंशान्हरति वांशिकः। ऐक्षुकः।

१७१७। वस्नद्रव्याभ्यां ठन्कनौ। (५-१-५१)

यथासङ्ख्यं स्तः। वस्नं हरति वहत्यावहति वा वस्निकः। द्रव्यकः।

१७१८। सम्भवत्यवहरति पचति। (५-१-५२)

प्रस्थं सम्भवति प्रास्थिकः कटाहः। प्रस्थं स्वस्मिन्समावेशयतीत्यर्थः। प्रास्थिकी ब्राह्मणी। प्रस्थमवहरति (उपसंहरति) पचति वेत्यर्थः। 'तत्पचतीति द्रोणादण्च' (वा ३०३८)। चाट्ठञ्। द्रोणं पचतीति द्रौणी—द्रौणिकी।

१७१९। आढकाचितपात्रात्खोऽन्यतरस्याम्। (५-१-५३)

वैयधिकरण्येनान्वयः। स च व्युत्क्रमः। व्याख्यानात्। तदाह। **वंशादिभ्यः पर इति** ॥ द्वितीयान्तादित्यनन्तरं हरति वहति आवहतीत्यर्थे यथाविहितं प्रत्ययः स्यादिति शेषः। हरणं कथञ्चिद्देशान्तरप्रापणं चौर्यं वा। शकटादिना प्रापण वहनम्। स्वसमीपं प्रापणमावहनं उत्पादनं वा। **वांशभारिक इति** ॥ 'आर्हात्' इति ठक्। अत्र पञ्चम्यन्तयोर्व्युत्क्रमेण वैयधिकरण्येन चान्वये प्रमाणाभावादाह। **भाराद्वंशादिभ्य इत्यस्य व्याख्यान्तरमिति** ॥ भारात्परेभ्यो वंशादिभ्य इत्यर्थभ्रमव्यावृत्तये व्याख्यान्तरं विशदयति। **भारभूतेभ्यो वंशादिभ्य इतीति** ॥ वंशादिशब्दानाम्भारभूतत्वन्तु भारभूतवंशादिवृत्तेर्बोध्यम्। अस्मिन्व्याख्याने भारादित्येकवचनमार्षम्। यद्वा प्रत्येकान्वयाभिप्रायम्। वस्तुतो भारभूता ये वंशादयः तद्वाचिभ्य इति यावत्। **वस्नद्रव्याभ्याम्** ॥ तद्धरति वहत्यावहतीत्यनुवर्तते इत्यभिप्रेत्य आह। **वस्नं हरतीत्यादि** ॥ **सम्भवत्यवहरति** ॥ तदिति द्वितीयान्तमनुवर्तते। द्वितीयान्तात्सम्भवतीत्याद्यर्थेषु यथाविहितं प्रत्ययः स्यादित्यर्थः। **प्रास्थिक इति** ॥ 'आर्हात्' इत्यत्र परिमाणपर्युदासाट्ठगभावे प्राग्वतीयष्ठञ्। ननु सम्भवतीत्यस्य उपपद्यते इत्यर्थकत्वादकर्मकत्वात्प्रस्थं सम्भवतीति कथं द्वितीयेत्यत आह। **समावेशयतीत्यर्थ इति** ॥ उपसर्गवशादिति भावः। **प्रास्थिकी ब्राह्मणीति** ॥ ठञन्तत्वात् ङीबिति भावः। अपहरतीत्येतद्व्याचष्टे। **उपसंहरतीति** ॥ किञ्चिदूनमपि यथा प्रस्थपरिमितं भवति तथा मिमीते इत्यर्थः। **तत् पचतीति द्रोणादण् चेति** ॥ वार्तिकमिदम्। द्वितीयान्ताद्द्रोणशब्दात् पचतीत्यर्थे अण् च स्यादित्यर्थः। पचतिग्रहणं सम्भवत्यवहरातिनिवृत्त्यर्थम्। **चाट्ठञिति** ॥ 'आर्हात्' इति ठग्विधौ परिमाणपर्युदासात् ठगभावे प्राग्वतेष्ठञेव चकारादनुकृष्यते इति भावः। **द्रौणीति** ॥ अणन्तत्वात् ङीप्। **द्रौणिकीति** ॥ ठञन्तत्वात् ङीप्। **आढकाचित** ॥ आढक, आचित, पात्र, एभ्यो द्वितीयान्तेभ्यः सम्भवत्यवहरतिपचतीत्यर्थेषु खो वा स्यादित्यर्थः।

पक्षे ठञ्। आढकं सम्भवति अवहरति पचति वा आढकीना—आढकिकी। अचितीना—आचितिकी। पात्रीणा—पात्रिकी।

१७२०। द्विगोः ष्ठंश्च। (५-१-५४)

'आढकाचितपात्रात्' इत्येव। आढकाद्यन्ताद्विगोः सम्भवत्यादिष्वर्थेषु ष्ठन्खौ वा स्तः। पक्षे ठञ्। तस्य 'अध्यर्ध—' (सू १६९३) इति लुक्। षित्त्वान्ङीष्। द्व्याढकिकी—द्व्याढकीना। 'द्विगोः' (सू ४७९) इति ङीप्। द्व्याढकी। द्व्याचितिकी—द्व्याचितीना। 'अपरिमाण—' (सू ४८०) इति ङीन्निषेधात् द्व्याचिता। द्विपात्रिकी—द्विपात्रीणा—द्विपात्री।

१७२१। कुलिजाल्लुक्खौ च। (५-१-५५)

कुलिजान्ताद्विगोः सम्भवत्यादिष्वर्थेषु लुक्खौ वा स्तः। चात्ष्ठंश्च। लुगभावे ठञः श्रवणम्। द्विकुलिजी—द्विकुलिजीना। द्विकुलिजिकी—द्वैकुलिजिकी।

१७२२। सोऽस्यांशवस्नभृतयः। (५-१-५६)

पक्षे ठञिति ॥ 'आर्हात्' इत्यतः परिमाणपर्युदासान्न ठगिति भावः। **द्विगोष्ठंश्च** ॥ **ष्ठन्खाविति** ॥ चकारेण खस्यानुकर्षादिति भावः। **वा स्त इति** ॥ अन्यतरस्यामित्यनुवृत्तेरिति भावः। **पक्षे ठञिति** ॥ 'आर्हात्' इत्यत्र परिमाणपर्युदासान्न ठगिति भावः। षित्त्वात् ङीष्। **द्व्याढकिकीति** ॥ द्वे आढके सम्भवत्यवहरति पचति वेत्यर्थे 'तद्धितार्थ' इति द्विगुः, ष्ठन्, षित्त्वात् ङीषित्यर्थः। अत्र 'न य्वाभ्याम्' इत्यैज् न। वृद्धिनिषेधसन्नियोगशिष्टत्वात् ञ्णित्किदभावेन वृद्धेरप्रसक्तेः। **द्व्याढकीनेति** ॥ खे रूपम्। 'द्विगोः' इति ङीप्। **द्व्याढकीति** ॥ ठञि 'अध्यर्ध' इति तस्य लुक्। 'द्विगोः' इति ङीबित्यर्थः। प्रत्ययलक्षणमाश्रित्य ष्ठञन्तलक्षणङीप् तु नेति 'अपरिमाणबिस्त' इत्यत्रोक्तम्। 'अध्यर्ध' इति लुक् ठञ एव, नतु ठन्खयोरपि विधिसामर्थ्यात्। **द्व्याचितिकी** ॥ **द्व्याचितिकीनेति** ॥ ष्ठनि खे च रूपम्। अथ द्व्याचितशब्दात् ठञो लुकि 'द्विगोः' इति ङीपमाशङ्क्य आह। **अपरिमाणेति ङीन्निषेधादिति** ॥ **द्विपात्रिकीत्यादि** ॥ **कुलिजाल्लुक्खौ च** ॥ अन्यतरस्यामित्यनुवृत्तिमभिप्रेत्य आह। **लुक्खौ वा स्त इति** ॥ 'आर्हात्' इत्यत्र परिमाणपर्युदासाट्ठगभावे प्राग्वहतीयस्य ठञः 'अध्यर्ध' इति नित्यं लुकि प्राप्ते लुको विकल्पविधिः। **चात् ष्ठंश्चेति** ॥ तथाच ठञो लुक् खश्च ष्ठंश्चेति त्रितयं विकल्पते। तत्र ष्ठनः खस्य ठञः लुकश्चाभावे ठञः श्रवणम्पर्यवस्यति। तदाह। **लुगभावे ठञः श्रवणमिति** ॥ **द्विकुलिजीति** ॥ ठञो लुकि रूपम्। 'द्विगोः' इति ङीप्। **द्विकुलिजीनेति** ॥ खे रूपम्। **द्विकुलिजिकीति** ॥ ष्ठनि रूपम्। **द्वैकुलिजिकीति** ॥ ठञो लुगभावे रूपम्। परिमाणान्तस्येत्यत्र असंज्ञाशाणकुलिजानामित्युक्तेर्नोत्तरपदवृद्धिः। **सोऽस्यांश** ॥ स इति प्रत्येकमंशादिष्वन्वेति। सोऽस्यांशः, तदस्य वसनम्, सास्या भृतिः,

अंशो भागः । वस्नं मूल्यम् । भृतिर्वेतनम् । पञ्च अंशो वस्नो भृतिर्वास्य पञ्चकः ।

१७२३ । तदस्य परिमाणम् । (५-१-५७)

प्रस्थं परिमाणमस्य । प्रास्थिको राशिः ।

१७२४ । सङ्ख्यायाः संज्ञासङ्घसूत्राध्ययनेषु । (५-१-५८)

पूर्वसूत्रमनुवर्तते । तत्र 'संज्ञायां स्वार्थे प्रत्ययो वाच्यः' (वा ३०३९) यद्वा द्व्येकयोरितिवत्सङ्ख्यामात्रवृत्तेः परिमाणिनि प्रत्ययः । पञ्चैव पञ्चकाः । शकुनयः । पञ्च परिमाणमेषामिति वा । सङ्घे पञ्चकः । सूत्रे अष्टकं पाणिनीयम् । सङ्घशब्दस्य प्राणिसमूहे रूढत्वात्सूत्रं पृथगुपात्तम् । पञ्चकमध्ययनम् । 'स्तोमे डविधिः' (वा ३०४५) । पञ्चदश मन्त्राः परिमाणमस्य पञ्चदशस्तोमः ।

इत्यर्थेषु प्रथमान्ताद्यथाविहितम्प्रत्ययाः स्युरित्यर्थः । **पञ्चक इति** ॥ 'सङ्ख्यायाः' इति कन् । **तदस्य परिमाणम्** ॥ अस्मिन्नर्थे प्रथमान्ताद्यथाविहितम्प्रत्ययाः स्युरित्यर्थः । **प्रास्थिक इति** ॥ 'आर्हात्' इत्यत्र परिमाणपर्युदासात् प्राग्वतीयष्ठञ् । अत्र सङ्ख्यापि परिमाणम् । यद्यपि अगोपुच्छसङ्ख्यापरिमाणादिति पृथग्ग्रहणात् सङ्ख्या न परिमाणम् । तथाप्यत्र परिच्छेदकत्वात् सङ्ख्यापि परिमाणम् । उत्तरसूत्रे सङ्ख्यायाः परिमाणेन विशेषणाल्लिङ्गात् । तेन षष्टिः परिमाणमस्य षाष्टिकमिति सिद्धम् । द्विषष्ठ्यादिभ्यस्त्वनभिधानान्नेति भाष्ये स्पष्टम् । **सङ्ख्यायाः** ॥ **अनुवर्तत इति** ॥ तथाच तदस्य परिमाणमित्यर्थे प्रथमान्तात् सङ्ख्यात्मकपरिमाणवाचिनो यथाविहितम्प्रत्ययाः स्युरित्यर्थः । **संज्ञायां स्वार्थे प्रत्ययो वाच्य इति** ॥ पञ्चकाः शकुनय इत्यत्र पञ्च परिमाणमेषामित्यर्थो न सम्भवति । आदशतः सङ्ख्याः सङ्ख्येये इति पञ्चन्शब्दस्य सङ्ख्येयवृत्तित्वेन पञ्च परिमाणमिति सामानाधिकरण्यानुपपत्तेः । अतः संज्ञायां स्वार्थे एव सङ्ख्यायाः प्रत्यय इति पर्यवस्यतीति भावः । **यद्वेति** ॥ द्विशब्दस्य एकशब्दस्य च सङ्ख्येयवृत्तित्वेऽपि 'द्व्येकयोः' इति समासवृत्तावेकत्वद्वित्वपरत्वमभ्युपगम्यते । अन्यथा 'द्व्येकयोः' इति द्विवचनानुपपत्तेः । तद्वत्पञ्चकाः शकुनय इति तद्धितवृत्तावपि पञ्चन्शब्दस्य पञ्चत्वसङ्ख्यापरतया पञ्चत्वं परिमाणमस्येति सामानाधिकरण्यं स्वीकृत्य पञ्चत्ववाचिनः पञ्चन्शब्दात् पञ्चत्वरूपपरिमाणवति प्रत्ययः उपपद्यते इत्यर्थः । तत्र संज्ञायां स्वार्थे उदाहरति । **पञ्चैवेति** ॥ परिमाणिनि प्रत्ययमुदाहरति । **पञ्च परिमाणमिति** ॥ पञ्चत्वमित्यर्थः । **सङ्घे इति** ॥ उदाहरणं वक्ष्यते इत्यर्थः । **पञ्चक इति** ॥ पञ्चत्वमस्य सङ्घस्य परिमाणमित्यर्थः । सङ्घस्य पञ्चत्वन्तु अवयवद्वारा बोध्यम् । **सूत्र इति** ॥ उदाह्रियत इति शेषः । **अष्टकं पाणिनीयमिति** ॥ सूत्रमिति शेषः । अष्टावध्यायाः परिमाणमस्येति विग्रहः । अत्राष्टत्वं अध्यायद्वारा सूत्रेऽन्वेति । सूत्रशब्दश्च सूत्रसङ्घपरः । एकस्मिन् सूत्रे अष्टकत्वस्यासम्भवात् । नन्वेवं सति सङ्घग्रहणेनैव सिद्धे सूत्रग्रहणं व्यर्थमित्यत आह । **सङ्घशब्दस्येति** ॥ **पञ्चकमध्ययनमिति** ॥

सप्तदशः । एकविंशः । डप्रत्यये तिलोपः । सोमयागेषु छन्दोगैः क्रियमाणा पृष्ट्यादिसंज्ञिका स्तुतिः स्तोमः ।

१७२५ । पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम् । (५-१-५९)

एते रूढिशब्दा निपात्यन्ते ।

१७२६ । पञ्चद्दशतौ वर्गे वा । (५-१-६०)

पञ्चावृत्तयः परिमाणमस्येति विग्रहः । **स्तोमे डविधिरिति** ॥ तदस्य परिमाणमित्यर्थे सङ्ख्यावाचिन उपसङ्ख्यातव्य इति शेषः । सामाधारमन्त्रसमूहे स्तोमशब्दः शक्त इति कैयटः । मनुष्यादिसमूहे तु स्तोमशब्दो लाक्षणिक इति तदाशयः । तदाह । **पञ्चदश मन्त्रा इति** ॥ **पञ्चदशस्तोम इति** ॥ पञ्चदशत् शब्दात् डप्रत्यये 'टेः' इति टिलोपः । सामाधारभूतपञ्चदशमन्त्रसमूह इत्यर्थः । ननु डित्त्वाभावेऽपि 'नस्तद्धिते' इत्येव टिलोपसिद्धेर्डित्त्वं व्यर्थमित्यत आह । **एकविंश इति** ॥ एकविंशतिर्मन्त्राः परिमाणमस्य समूहस्येति विग्रहः । **डप्रत्यये इति** ॥ 'तिविंशतेर्डिति' इति टिलोपः । मीमांसकास्तु पृष्ठरथन्तरादिशब्दवाच्या प्रगीतमन्त्रसाध्या गुणवत्त्वेन वर्णनात्मिका स्तुतिरेव स्तोमः, स एव डप्रत्ययार्थः । प्रगीतपञ्चदशमन्त्रपरिमाणकः स्तोम इत्यर्थः । पञ्चदशत्वसङ्ख्यात्मकपरिमाणं स्तुतौ मन्त्रद्वारा बोध्यम् । एवञ्च पञ्चदशेन स्तुवते इत्यादौ धात्वर्थभूतस्तुतिसामानाधिकरण्यम्पञ्चदशादिशब्दानामुपपद्यते इत्याहुः । तन्मतमवलम्ब्य आह । **सोमयागेष्वित्यादि** ॥ **पङ्क्तिविंशति** ॥ **रूढिशब्दा निपात्यन्ते इति** ॥ तदस्य परिमाणमित्यर्थे इति शेषः । पञ्च पादाः परिमाणमस्येत्यर्थे पञ्चन्शब्दात् तिप्रत्ययः प्रकृतेष्टिलोपः, चकारस्य कुत्वम्, अनुस्वारपरसवर्णौ, पङ्क्तिरिति रूपम् । "पञ्चाक्षरा पञ्चपदा पङ्क्तिः" इति छन्दःशास्त्रे। दशानां वर्गः दशत् । 'पञ्चद्दशतौ वर्गे च' इति वक्ष्यते । द्वौ दशतौ परिमाणमस्य सङ्घस्य विंशतिः । शतिच्प्रत्ययः प्रकृतेर्विन्भावः, अनुस्वारश्च । अत्र सङ्घग्रहणमनुवर्तते । तथाच गवां विंशतिरिति भवति । सङ्घसङ्घिनोस्तादात्म्यविवक्षायां तु विंशतिर्गाव इति भवति । स्वभावादेकवचनं स्त्रीत्वञ्च । एवं त्रिंशदादावपि । "विंशत्याद्यास्सदैकत्वे सङ्ख्यास्सङ्ख्येयसङ्ख्ययोः", "तासु चानवतेः स्त्रियः" इति चामरः । त्रयः दशतः परिमाणमस्य सङ्घस्य त्रिंशत् । शत्प्रत्ययः, प्रकृतेः त्रिन्भावश्च । चत्वारो दशतः परिमाणमस्य सङ्घस्य चत्वारिंशत्, शत्प्रत्ययः। प्रकृतेः चत्वारिम्भावश्च । पञ्च दशतः परिमाणमस्य सङ्घस्य पञ्चाशत् । शत्प्रत्ययः प्रकृतेः पञ्चादेशः । षड् दशतः परिमाणमस्य सङ्घस्य षष्टिः । तिप्रत्ययः, प्रकृतेः षष्, जश्त्वाभावश्च । सप्त दशतः परिमाणमस्य सङ्घस्य सप्ततिः तिप्रत्ययः । 'न लोपः' इति नकारलोपः । अष्टौ दशतः परिमाणमस्य सङ्घस्य अशीतिः । तिप्रत्ययः प्रकृतेः अशी इत्यादेशः । नव दशतः परिमाणमस्य सङ्घस्य नवतिः, तिप्रत्ययः, नलोपः । दश दशतः परिमाणमस्य सङ्घस्य शतम्, तप्रत्ययः प्रकृतेः शादेशश्च। एतत्सर्वं भाष्ये स्पष्टम्। "एतान्यव्युत्पन्नप्रातिपदिकानि" इति भाष्ये निष्कर्षः । **पञ्चद्दशतौ** ॥ पञ्च दश वा परिमाणमस्य वर्गस्येत्यर्थे

पञ्च परिमाणमस्य पञ्चद्वर्गः । दशत् । पक्षे पञ्चकः । दशकः ।

१७२७ । त्रिंशच्चत्वारिंशतो ब्राह्मणे संज्ञायां डण् । (५-१-६२)

त्रिंशदध्यायाः परिमाणमेषां ब्राह्मणानां त्रैंशानि । चात्वारिंशानि ।

१७२८ । तदर्हति । (५-१-६३)

लब्धुं योग्यो भवतीत्यर्थे द्वितीयान्ताट्ठञादयः स्युः । श्वेतच्छत्त्रमर्हति श्वैतच्छत्रिकः ।

१७२९ । छेदादिभ्यो नित्यम् । (५-१-६४)

नित्यमाभीक्ष्ण्यम् । छेदं नित्यमर्हति छैदिको वेतसः । छिन्नप्ररूढत्वात् । 'विराग विरङ्गं च' (ग सू ९९) । विरागं नित्यमर्हति । वैरागिकः—वैरङ्गिकः ।

१७३० । शीर्षच्छेदाद्यच्च । (५-१-६५)

शिरश्छेदं नित्यमर्हति शीर्षच्छेद्यः—शैर्षच्छेदिकः । यट्ठकोः सन्नियोगेन शिरसः शीर्षभावो निपात्यते ।

एतौ निपात्येते इत्यर्थः । **पञ्चद्वर्ग इति** ॥ पञ्च परिमाणमस्येत्यर्थे पञ्चन्शब्दात् डतिप्रत्ययः । तत्र इकार उच्चारणार्थः । 'टेः' इति टिलोपः । **दशदिति** ॥ दश परिमाणमस्य वर्गस्येति विग्रहः । डति डित्त्वाट्टिलोपः । एतदर्थमेव डित्त्वम् । **पक्षे इति** ॥ डत्यभावपक्षे 'सङ्ख्यायाः' इति कन्नित्यर्थः । **त्रिंशच्चत्वारिंशतोः** ॥ तदस्य परिमाणमित्यर्थे परिमाणिनि ब्राह्मणे वाच्ये त्रिंशच्चत्वारिंशद्भ्यां डण् स्यादित्यर्थः । ब्राह्मणं वेदेषु मन्त्रव्यतिरिक्तो भागः । **त्रैंशानीति** ॥ डित्त्वात् 'टेः' इति टिलोपः । **तदर्हति** ॥ अर्हतीत्यस्य योग्यो भवतीत्यर्थे अकर्मकत्वात्तदिति द्वितीया न स्यात् । इष्यते तु द्वितीयान्तादेव प्रत्ययः । तत्राह । **लब्धुमिति** । **श्वैतच्छत्रिक इति** ॥ आर्हीयष्ठक् । **छेदादिभ्यो नित्यम्** ॥ **आभीक्ष्ण्यमिति** ॥ पौनःपुन्यमित्यर्थः । तन्नित्यमर्हतीत्यर्थे द्वितीयान्तेभ्यः छेदादिभ्यो यथाविहितम्प्रत्ययः स्यादित्यर्थः । **छैदिको वेतस इति** ॥ 'आर्हात्' इति ठक् । 'तदर्हति' इत्येव सिद्धे आभीक्ष्ण्य एवेति नियमार्थमिदं सूत्रम् । वस्तुतस्तु नित्यमिति नाभीक्ष्ण्यार्थकम्प्रत्ययार्थकोटिप्रविष्टम्, किन्तु अपाक्षिकत्वार्थकम् । 'समर्थानाम्प्रथमाद्वा' इति वाग्रहणानुवृत्तिनिवृत्त्यर्थमभिप्रेत्य विग्रहवाक्यस्यापि लोके दर्शनान्नित्यग्रहणन्न कर्तव्यमित्युक्तम् । एवञ्च छेदादिभ्यः पाक्षिकप्रत्ययस्य 'तदर्हति' इत्येव सिद्धत्वात् सूत्रमेवेदं नारब्धव्यमिति फलति । **विराग विरङ्गञ्चेति** ॥ गणसूत्रमिदम् । उक्तेऽर्थे विरागशब्दो विरङ्गादेशं लभते इत्यर्थः । चादार्हीयष्ठक् । **शीर्षच्छेदाद्यच्च** ॥ चादार्हीयष्ठक् । ननु 'शीर्षञ्छन्दसि' इति छन्दस्येव शिरसः शीर्षादेशविधानात् कथमिह

१७३१ । दण्डादिभ्यो यत् । (५-१-६६)

एभ्यो यत्स्यात् । दण्डमर्हति दण्ड्यः । अर्घ्यः । वध्यः ।

१७३२ । पात्राद्घंश्च । (५-१-६८)

चाद्यत् तदर्हतीत्यर्थे । पात्रियः—पात्र्यः ।

१७३३ । कडङ्करदक्षिणाच्छ च । (५-१-६९)

चाद्यत् । कडं करोतीति विग्रहेऽत एव निपातनात्खच् । कडङ्करं माषमुद्गादिकाष्ठमर्हतीति कडङ्करीयो गौः । कडङ्कर्यः । दक्षिणामर्हतीति दक्षिणीयः—दक्षिण्यः ।

१७३४ । स्थालीबिलात् । (५-१-७०)

स्थालीबिलमर्हन्ति स्थालीबिलीयास्तण्डुलाः—स्थालीबिल्याः । पाकयोग्या इत्यर्थः ।

१७३५ । यज्ञर्त्विग्भ्यां घखञौ । (५-१-७१)

यथासङ्ख्यं स्तः । यज्ञमृत्विजं वार्हति यज्ञियः, आर्त्विजीनो यजमानः । 'यज्ञर्त्विग्भ्यां तत्कर्मार्हतीत्युपसङ्ख्यानम्' (वा ३०५२) । यज्ञियो देशः । आर्त्विजीनः ऋत्विक् ॥ **इति आर्हीयाणां ठगादीनां द्वादशानां पूर्णोऽवधिः ॥**

शीर्षादेश इत्यत आह । **यस्कोरिति** ॥ **दण्डादिभ्यः** ॥ यदित्यनुवर्तते । तदाह । **यत्स्यादिति** ॥ 'दण्डादिभ्यो यः' इति त्वपपाठः । 'अचो यत्' इति सूत्रभाष्ये तथैव दर्शनात् । **अर्घ्यः इति** ॥ मूल्यं पूजाविधिं वार्हतीत्यर्थः । "मूल्ये पूजाविधावर्घः" इत्यमरः । **वध्य इति** ॥ वधमर्हतीत्यर्थः । **पात्रात् घंश्च** ॥ **पात्रियः—पात्र्य इति** ॥ पात्रमर्हतीत्यर्थः । **कडङ्करदक्षिणाच्छ च** ॥ 'कड मदे' कडनं कडः मदः 'घञर्थे कविधानम्' इति कः । **खजिति** ॥ तथाच 'खित्यनव्ययस्य' इति मुमिति भावः । कडङ्करञ्च दक्षिणा चेति समाहारद्वन्द्वात्पञ्चमी । **स्थालीबिलात्** ॥ छयतावनुवर्तेते, तदर्हतीति च । **यज्ञर्त्विग्भ्यां घखञौ** ॥ तदर्हतीत्येव । **यज्ञम् ऋत्विजं वेति** ॥ यज्ञमर्हतीति यज्ञियः । ऋत्विजमर्हतीत्यार्त्विजीन इत्यन्वयः । **तत्कर्मेति** ॥ यज्ञकर्मार्हतीत्यर्थे यज्ञशब्दात् ऋत्विक्कर्मार्हतीत्यर्थे ऋत्विक्छब्दाच्च यथासङ्ख्यङ्घखञोरुपसङ्ख्यानमित्यर्थः । **यज्ञियो देश इति** ॥ यज्ञानुष्ठानमर्हतीत्यर्थः । **आर्त्विजीनो ऋत्विगिति** ॥ ऋत्विक्कर्तव्यङ्कर्मार्हतीत्यर्थः । यद्यपि यज्ञर्त्विक्छब्दयोस्तत्कर्मणि लक्षणया सिद्ध्यति । तथाप्यत्र प्रकरणे मुख्यार्थेभ्य एव प्रत्यय इति ज्ञापनार्थमिदम् । **ठगादीनां द्वादशानामिति** ॥ 'प्राग्वतेः' इत्यारभ्य 'तेन क्रीतम्' इत्यतः प्राक् त्रयोदश प्रत्ययाः अनुक्रान्ताः । तत्र 'प्राग्वतेः' इति ठञं विना आर्हादित्यादिविहितानाण्ठगादीनान्द्वादशानां विधिः पूर्णः इत्यर्थः ॥

इति तद्धिते प्राग्वतीये आर्हीयाणां ठगादीनां द्वादशानां पूर्णोऽवधिः ।

अथ तद्धिते प्राग्वतीये ठञधिकारे कालाधिकारप्रकरणम् ।

अतः परं ठञेव ।

१७३६ । पारायणतुरायणचान्द्रायणं वर्तयति । (५-१-७२)

पारायणं वर्तयति पारायणिकश्छात्रः । तुरायणं यज्ञविशेषः । तं वर्तयति तौरायणिको यजमानः । चान्द्रायणिकः ।

१७३७ । संशयमापन्नः । (५-१-७३)

संशयविषयीभूतोऽर्थः सांशयिकः ।

१७३८ । योजनं गच्छति । (५-१-७४)

यौजनिकः । 'क्रोशशतयोजनशतयोरुपसङ्ख्यानम्' (वा ३०५५) । क्रोशशतं गच्छति क्रौशशतिकः । यौजनशतिकः । 'ततोऽभिगमनमर्हतीति च वक्तव्यम्' (वा ३०५६) । क्रोशशतादभिगमनमर्हतीति क्रौशशतिको भिक्षुः । यौजनशतिक आचार्यः ।

१७३९ । पथः ष्कन् । (५-१-७५)

षो ङीषर्थः । पन्थानं गच्छति पथिकः । पथिकी ।

अथ तद्धिते प्राग्वतीये ठञधिकारे कालाधिकारः निरूप्यते—**अतः परं ठञेवेति** ॥ आर्हीयेष्वर्थेषु प्राग्वतीयठञपवादा आर्हीयाष्ठगादयः आर्हीयार्थेषु निरूपितेषु ततः ऊर्ध्वं ठगादिप्रत्ययानाम् अनुवृत्तेरसम्भवात् प्राग्वतीये ठञेवानुवर्तते इत्यर्थः । **पारायण** ॥ द्वितीयान्तेभ्यः पारायणादिशब्देभ्यः वर्तयतीत्यर्थे ठञ् स्यादित्यर्थः । **पारायणं वर्तयतीति** ॥ पारायणं वेदाध्ययनम् । तद्वर्तयति आवर्तयतीत्यर्थः । **पारायणिकः छात्त्र इति** ॥ गुरौ त्वध्येतरि नायम्प्रत्ययः । अनभिधानादिति भावः । **तौरायणिको यजमान इति** ॥ ऋत्विजि नायम्प्रत्ययः । अनभिधानादिति भावः । **चान्द्रायणिक इति** ॥ चान्द्रायणं वर्तयतीत्यर्थः । चान्द्रायणङ्कृच्छ्रविशेषः । **संशयमापन्नः** ॥ अस्मिन्नर्थे संशयशब्दात् द्वितीयान्ताट्ठक् स्यादित्यर्थः । अत्र आपन्न इति कर्तरि क्तः । विषयतया प्राप्त इत्यर्थः । उपसर्गवशात् संशयविषयीभूतोऽर्थ इति । तेन समवायेन संशयाधारे सन्देग्धरि नायम्प्रत्यय इति भावः । अमरस्तु "सांशयिकः संशयापन्नमानसः" इत्याह । **योजनङ्गच्छति** ॥ द्वितीयान्ताद्योजनशब्दात् गच्छतीत्यर्थे ठञ् स्यादित्यर्थः । **क्रोशशतेति** ॥ आभ्यामपि द्वितीयान्ताभ्याङ्गच्छतीत्यर्थे ठञ उपसङ्ख्यानमित्यर्थः । **क्रोशशतादिति** ॥ ल्यब्लोपे पञ्चमी । क्रोशशतमतीत्येत्यर्थः । **पथः ष्कन्** ॥ पथः ष्कन् इति छेदः । द्वितीयान्तात् पथिन्शब्दात् गच्छतीत्यर्थे ष्कन् स्यादित्यर्थः । **पन्थो ण**

१८४० । पन्थो ण नित्यम् । (५-१-७६)

पन्थानं नित्यं गच्छति । पान्थः—पान्था ।

१७४१ । उत्तरपथेनाहृतं च । (५-१-७७)

उत्तरपथेनाहृतमौत्तरपथिकम् । उत्तरपथेन गच्छति औत्तरपथिकः । 'आहृतप्रकरणे वारिजङ्गलस्थलकान्तारपूर्वादुपसङ्ख्यानम्' (वा ३०५७) । वारिपथिकम् ।

१७४२ । कालात् । (५-१-७८)

'व्युष्टादिभ्योऽण्' (सू १७६१) इत्यतः प्रागधिकारोऽयम् ।

१७४३ । तेन निर्वृत्तम् । (५-१-७९)

अह्ना निर्वृत्तम् आह्निकम् ।

१७४४ । तमधीष्टो भृतो भूतो भावी । (५-१-८०)

अधीष्टः सत्कृत्य व्यापारितः । भृतो वेतनेन क्रीतः । भूतः स्वसत्तया व्याप्तकालः । भावी तादृश एवानागतकालः । मासमधीष्टो मासिकोऽध्यापकः । मासं भृतः मासिकः कर्मकरः । मासं भूतो मासिको व्याधिः । मासं भावी मासिक उत्सवः ।

१७४५ । मासाद्वयसि यत्खञौ । (५-१-८१)

मासं भूतो मास्यः—मासीनः ।

नित्यम् ॥ पथ इत्यनुवर्तते गच्छतीति च । नित्यमिति गच्छतीत्यत्रान्वितं प्रत्ययार्थप्रविष्टमेव । नतु विधानान्वितं सत् महाविभाषानिवृत्त्यर्थम् । द्वितीयान्तात् पथिन्शब्दात् नित्यङ्गच्छतीत्यर्थे णप्रत्ययः स्यात्प्रकृतेः पन्थादेशश्चेत्यर्थः । भाष्ये तु नित्यग्रहणम्प्रत्याख्यातम् । **उत्तरपथेनाहृतञ्च** ॥ उत्तरपथशब्दात् तृतीयान्तात् आहृतमित्यर्थे गच्छतीत्यर्थे च ठञ् स्यादित्यर्थः । **वारिजङ्गलेति** ॥ वारि, जङ्गल, स्थल, कान्तार, एतत्पूर्वात् पथिन्शब्दात् तृतीयान्तात् आहृतमिति गच्छतीति चार्थे ठञित्यर्थः । वारिपथेन गच्छति आहृतं वेत्यर्थः । जाङ्गलपथिकः, स्थालपथिकः, कान्तारपथिक । **कालात्** ॥ **इत्यतः प्रागिति** ॥ व्याख्यानादिति भावः । **तेन निर्वृत्तम्** ॥ तृतीयान्तान्निर्वृत्तमित्यर्थे ठञ् स्यादित्यर्थः । **आह्निकमिति** ॥ 'अह्नष्टखोरेव' इति नियमान्न टिलोपः । **तमधीष्टो** ॥ द्वितीयान्तात् अधीष्टादिष्वर्थेषु ठञ् स्यादित्यर्थः । **व्यापारित इति** ॥ प्रेरित इत्यर्थः । **तादृश एवेति** ॥ स्वसत्तया व्याप्यमान इत्यर्थः । मासमधीष्ट इत्यादौ 'कालाध्वनोः' इति द्वितीया । **मासाद्वयसि** ॥ अत्र भूत इत्येवानुवर्तते ।

१७४६ । द्विगोर्यप् । (५-१-८२)

मासाद्वयसीत्यनुवर्तते । द्वौ मासौ भूतो द्विमास्यः ।

१७४७ । षण्मासाण्ण्यच्च । (५-१-८३)

'वयसि' इत्येव । यबप्यनुवर्तते, चाट्ठञ् । षण्मास्यः—षाण्मास्यः—षाण्मासिकः ।

१७४८ । अवयसि ठंश्च । (५-१-८४)

चाण्ण्यत् । षण्मासिको व्याधिः—षाण्मास्यः ।

१७४९ । समायाः खः । (५-१-८५)

समामधीष्टो भृतो भूतो भावी वा समीनः ।

१७५० । द्विगोर्वा । (५-१-८६)

'समायाः खः' इत्येव । 'तेन परिजय्य—' (सू १७५७) इत्यतः प्राङ्निर्वृत्तादिषु पञ्चस्वर्थेषु प्रत्ययाः । द्विसमीनः—द्वैसमिकः ।

१७५१ । रात्र्यहःसंवत्सराच्च । (५-१-८७)

'द्विगोः' इत्येव । द्विरात्रीणः—द्वैरात्रिकः । द्व्यहीनः—द्वैयह्निकः समासान्तविधेरनित्यत्वान्न टच् । द्विसंवत्सरीणः ।

व्याख्यानात् । मासशब्दात् द्वितीयान्तात् भूत इत्यर्थे यत्खञौ स्तः । वयसि गम्ये इत्यर्थः । **द्विगोर्यप्** ॥ **अनुवर्तते इति** ॥ मासान्ताद्द्विगोर्भूत इत्यर्थे यप् स्याद्वयसि गम्ये इत्यर्थः । **षण्मासाण्ण्यच्च ॥ वयसीत्येवेति** ॥ षण्मासशब्दात् भूत इत्यर्थे ण्यच स्याद्वयसि गम्ये इत्यर्थः । अत्र चकारात्सन्निहितस्य यपोऽनुकर्षणे ण्यद्यपावेव स्याताम्, नतु ठञपि । इष्यते तु ठञपि । तत्राह । **यबप्यनुवर्तते इति** ॥ स्वरितत्वादिति भावः । तर्हि चकारः किमर्थ इत्यत आह । **चाट्ठञिति** ॥ तथाच ण्यत् यप् ठञिति त्रयः प्रत्ययाः फलिताः । **अवयसि ठंश्च** ॥ षण्मासशब्दात् द्वितीयान्तात् भूते अवयसि ठन् च स्यादित्यर्थः । **समायाः खः** ॥ मण्डूकप्लुत्या 'तमधीष्टो भृतो भूतो भावी' इति कृत्स्नमेव सूत्रमनुवर्तते । समाशब्दाद्द्वितीयान्तात् अधीष्टादिष्वर्थेषु खः स्यादित्यर्थः । **द्विगोर्वा ॥ समायाः ख इत्येवेति** ॥ तथाच समान्तात् द्विगोर्द्वितीयान्तात् खो वा स्यात् । पक्षे ठञिति फलितम् । "अप्सुमनःसमासिकतावर्षाणाम्बहुत्वञ्च" इति लिङ्गानुशासनसूत्रम् । "हायनोऽस्त्रीशरत्समाः" इत्यमरः । समां समां विजायते' इति सूत्रादेकवचनमप्यस्ति । **पञ्चस्विति** ॥ तेन निर्वृत्तम् । तमधीष्टो भृतो भूतो भावीति पञ्चस्वित्यर्थः ॥ एषां यथायोगमन्वयः । **द्वैसमिक इति** ॥ खाभावे प्राग्वतीयष्ठञ् । **रात्र्यहः ॥ द्विगोरित्येवेति** ॥ रात्रि, अहन्, संवत्सर, एतदन्तात् द्विगोर्निर्वृत्तादिष्वर्थेषु

१७५२ । सङ्ख्यायाः संवत्सरसङ्ख्यस्य च । (७-३-१५)

सङ्ख्याया उत्तरपदस्य वृद्धिः स्यात् ञिदादौ । द्विसांवत्सरिकः । द्वे षष्टी भृतो द्विषाष्टिकः । 'सङ्ख्यायाः परिमाणान्तस्य' इत्येव सिद्धे संवत्सरग्रहणं परिमाणग्रहणे कालपरिमाणस्याग्रहणार्थम् । तेन द्वैसमिक इत्युत्तरपदवृद्धिर्न ।

१७५३ । वर्षाल्लुक्च । (५-१-८८)

वर्षशब्दान्ताद्द्विगोर्वा खः । पक्षे ठञ्वा च लुक् । त्रीणि रूपाणि । द्विवर्षीणो व्याधिः । द्विवार्षिकः—द्विवर्षः ।

१७५४ । वर्षस्याभविष्यति । (७-३-१६)

उत्तरपदस्य वृद्धिः स्यात् । द्विवार्षिकः । भविष्यति तु द्वैवर्षिकः । अधीष्टभृतयोरभविष्यतीति प्रतिषेधो न । गम्यते हि तत्र भविष्यत्ता, न तु तद्धितार्थः ।

खो वा स्यादित्यर्थः । पक्षे ठञ् । **द्विरात्रीण इति** ॥ द्वाभ्यां रात्रिभ्यान्निर्वृत्तः द्वे रात्री अधीष्टो भृतो भूतो भावी वेत्यर्थः । एवमग्रेऽपि यथायोगं ज्ञेयम् । **द्व्यहीन इति** ॥ द्वाभ्यां अहोभ्यां निर्वृत्तः द्वे अहनी अधीष्टे इत्यादिष्वर्थेषु 'तद्धितार्थ' इति द्विगोः खः, 'अह्नष्टखोः' इति टिलोपः । समाहारद्विगोस्तु न खः । टचि कृते अहन्शब्दाभावात् । **द्वैयह्निक इति** ॥ 'अह्नष्टखोरेव' इति नियमात् न टिलोपः । किन्त्वल्लोपः अह्नादेशो वा । 'न य्वाभ्याम्' इत्यैच् । ननु द्व्यहीन इत्यत्र 'तद्धितार्थ' इति तु द्विगुसमासे कृते 'रात्र्यहःसंवत्सराच्च' इति खम्बाधित्वा परत्वात् 'राजाहःसखिभ्यः' इति टचि 'अह्नोऽह्न एतेभ्यः' इत्यह्नादेशे तस्य स्थानिवत्त्वेनाहन्शब्दत्वे टजन्तस्य तदभावात् 'रात्र्यहःसंवत्सराच्च' इति खप्रत्ययो न स्यात् । कृतेऽपि खप्रत्यये द्व्यहीन इति स्यादित्यत आह । **समासान्तविधेरनित्यत्वान्न टजिति** ॥ एवञ्च टजभावे सति नाह्नादेशः । समासान्ते पर एव तद्विधानादिति भावः । 'समासान्तविधिरनित्यः' इति षष्ठाध्यायस्य द्वितीये पादे 'द्वित्रिभ्याम्पाद्दन्मूर्धसु बहुव्रीहौ' इति सूत्रभाष्ये स्पष्टम् । अथ संवत्सरान्तस्य खे उदाहरति । **द्विसंवत्सरीण इति** ॥ ठञि त्वादिवृद्धौ प्राप्तायाम् । **सङ्ख्यायाः संवत्सर** ॥ आदिवृद्धिप्रकरणे उत्तरपदस्येत्यधिकारे इदं सूत्रम् । संवत्सरश्च सङ्ख्या चेति समाहारद्वन्द्वात् षष्ठी । **सङ्ख्याया उत्तरपदस्येति** ॥ सङ्ख्यायाः परस्य संवत्सरसङ्ख्यस्योत्तरपदस्येत्यर्थः । नन्वत्र संवत्सरग्रहणं व्यर्थम् । संवत्सरस्य द्वादशमासपरिमाणतया 'परिमाणान्तस्यासंज्ञाशाणयोः' इत्येव सिद्धेरित्यत आह । **परिमाणान्तस्येत्येवेति** ॥ **वर्षाल्लुक् च** ॥ **वा च लुगिति** ॥ खठञोरिति शेषः । **द्विवर्षीण इति** ॥ खे रूपम् । **द्विवर्ष इति** ॥ खठञोर्लुकि रूपम् । ठञि आदिवृद्धौ प्राप्तायाम् । **वर्षस्याभविष्यति** ॥ आदिवृद्धिप्रकरणे उत्तरपदस्येत्यधिकारे इदं सूत्रम् । शेषपूरणेन तद्याचष्टे । **उत्तरपदस्य वृद्धिः स्यादिति** ॥ अभविष्यति यो ञिदादिः तस्मिन्परे

द्वे वर्षे अधीष्टो भृतो वा कर्म करिष्यतीति द्विवार्षिको मनुष्यः। 'परिमाणान्तस्यासंज्ञाशाणयोः' (सू १६८३)। द्वौ कुडवौ प्रयोजनमस्य द्विकौडविकः। द्वाभ्यां सुवर्णाभ्यां क्रीतं द्विसौवर्णिकम्। द्विनैष्किकम्। 'असंज्ञा–' इति किम्। पञ्च कपालाः परिमाणमस्य पाञ्चकपालिकम्। तद्धितान्तः संज्ञा। द्वैशाणम्। कुलिजशब्दमपि केचित्पठन्ति। द्वैकुलिजिकः।

१७५५। चित्तवति नित्यम्। (५-१-८९)

वर्षशब्दान्ताद्द्विगोः प्रत्ययस्य नित्यं लुक्स्याच्चेतने प्रत्ययार्थे। द्विवर्षो दारकः।

१७५६। षष्टिकाः षष्टिरात्रेण पच्यन्ते। (५-१-९०)

बहुवचनमतन्त्रम्। षष्टिको धान्यविशेषः। तृतीयान्तात्कन् रात्रशब्दलोपश्च निपात्यते।

१७५७। तेन परिजय्यलभ्यकार्यसुकरम्। (५-१-९३)

मासेन परिजय्यो जेतुं शक्यो मासिको व्याधिः। मासेन लभ्यं कार्यं सुकरं वा मासिकम्।

इत्यर्थः। निर्वृत्तादिषु पञ्चस्वर्थेषु भविष्यदर्थं वर्जयित्वा तदितरेषु चतुर्ष्वर्थेषु यस्तद्धितः तस्मिन् परे इति यावत्। **द्विवार्षिक इति** ॥ द्वाभ्यां वर्षाभ्यां निर्वृत्तः द्वे वर्षे अधीष्टः भृतः भूतो वेत्यर्थः। अत्यन्तसंयोगे द्वितीया। **द्वैवर्षिक इति** ॥ व्याधिरिति शेषः। चित्तवति नित्यलुको वक्ष्यमाणत्वात्। नन्वेवं सति द्वे वर्षे अधीष्टो भृतो वा कर्म करिष्यति द्विवार्षिक इत्यत्र कथमुत्तरपदवृद्धिः। भविष्यत्त्वस्य प्रतीतेरित्याशङ्क्य आह। **अधीष्टभृतयोरभविष्यतीति प्रतिषेधो नेति** ॥ कुत इत्यत आह। **गम्यते हि तत्र भविष्यत्तेति** ॥ अध्येषणभरणयोः क्तप्रत्ययेन भूतत्वमेव शब्दशक्त्या गम्यते। तद्धितप्रत्ययेन च तथाविधाध्येषणभरणकर्मीभूतौ प्रतीयेते। एवंविधाध्येषणभरणशिष्टयोस्तु भविष्यता कर्माचरणेन सम्बन्धः कर्म करिष्यतीत्यनेनावगत इति न स तद्धितार्थः। एवञ्च तत्रापि भविष्यदर्थकतद्धितपरकत्वाभावात् स्यादेवोत्तरपदवृद्धिरित्यर्थः। **द्विवार्षिको मनुष्य इति** ॥ 'चित्तवति नित्यम्' इति वक्ष्यमाणस्तु नित्यलुक् न भवति। चित्तवतीत्येवारम्भसामर्थ्यात् नित्यत्वे सिद्धे पुनर्नित्यग्रहणेन भूत एवार्थे नित्यं लुगित्यभ्युपगमादिति हरदत्तः। केचित्तु द्विवार्षिकः अमनुष्य इति छिन्दन्ति। **चित्तवति नित्यम्** ॥ **प्रत्ययस्येति** ॥ खस्य ठञश्चेत्यर्थः। दारकः बालकः। **षष्टिकाः** ॥ **तृतीयान्तादिति** ॥ षष्टिरात्रशब्दादिति शेषः। **तेन परिजय्य** ॥ निर्वृत्तादयः पञ्चार्थाः निवृत्ताः। तेन परिजय्यम्, तेन लभ्यम्, तेन कार्यम्, तेन सुकरम्, इत्यर्थेषु तृतीयान्ताट्ठञित्यर्थः।

१७५८ । तदस्य ब्रह्मचर्यम् । (५-१-९४)

द्वितीयान्तात्कालवाचिनोऽस्येत्यर्थे प्रत्ययः स्यात् । अत्यन्तसंयोगे द्वितीया । मासं ब्रह्मचर्यमस्य स मासिको ब्रह्मचारी । आर्धमासिकः । यद्वा प्रथमान्तादस्येत्यर्थे प्रत्ययः । मासोऽस्येति मासिकं ब्रह्मचर्यम् । 'महानाम्न्यादिभ्यः षष्ठ्यन्तेभ्य उपसङ्ख्यानम्' (वा ३०६४) । महानाम्न्यो नाम 'विदा मघवन्—' इत्याद्या ऋचः । तासां ब्रह्मचर्यमस्य माहानाम्निकः । हरदत्तस्तु 'भस्याढे—' इति पुंवद्भावान्माहानामिक इत्याह । 'चतुर्मासाण्ण्यो यज्ञे' तत्र भव इत्यर्थे (वा ३०६९) । चतुर्षु मासेषु भवन्ति चातुर्मास्यानि, यज्ञकर्माणि । अण् संज्ञायाम् (वा ३०७०) । चातुर्मासी, पौर्णमासी । अणन्तत्वान्ङीप् ।

१७५९ । तस्य च दक्षिणा यज्ञाख्येभ्यः । (५-१-९५)

परिजप्य इत्यस्य विवरणञ्चेतुं शक्य इति । **तदस्य ब्रह्मचर्यम्** ॥ ननु द्वितीयान्तादिति कथम् । सूत्रे ब्रह्मचर्यविशेषणस्य तच्छब्दस्य प्रथमान्तत्वादित्यत आह । **अत्यन्तेति** ॥ तथाच कालविशेषणमभिव्याप्तब्रह्मचर्यवानित्यर्थे कालात्प्रत्ययः। इदमर्थं प्रति ब्रह्मचर्यं विशेषणम् । **मासिको ब्रह्मचारीति** ॥ मासाभिव्याप्तब्रह्मचर्यवानित्यर्थः । **आर्धमासिक इति** ॥ 'अर्धात्परिमाणस्य' इत्युभयपदवृद्धिः । अत्र इदंशब्दार्थस्य ब्रह्मचारिणः प्राधान्यम् । मासाभिव्याप्तब्रह्मचर्यन्तु तद्विशेषणमिति स्थितिः । **यद्वेति** ॥ सूत्रे तदिति प्रथमान्तम् । ब्रह्मचर्यमिति षष्ठ्यर्थे प्रथमा । तथाच प्रथमान्तात्कालवाचिनः अस्य ब्रह्मचर्यस्येत्यर्थे ठञित्यर्थः फलति । तदाह । **प्रथमान्तादिति** ॥ कालवाचिन इति शेषः । **अस्येत्यर्थे इति** ॥ अस्य ब्रह्मचर्यस्येत्यर्थे इत्यर्थः। मासोऽस्येत्यनन्तरं ब्रह्मचर्यस्येति शेषः । अस्मिन्पक्षे ब्रह्मचर्यमेव प्रत्ययार्थत्वात्प्रधानम् । इदमर्थस्तु तद्विशेषणमिति बोध्यम् । **उपसङ्ख्यानमिति** ॥ अस्य ब्रह्मचर्यमित्यर्थे ठञ इति शेषः । **माहानाम्निक इति** ॥ महानाम्नीशब्दस्य ऋग्विशेषेषु रूढस्य नित्यस्त्रीलिङ्गत्वात् भाषितपुंस्कत्वाभावात् 'भस्याढे' इति पुंवत्त्वं नेति भावः। **हरदत्तस्त्विति** ॥ महानाम्निकमित्येव भाष्ये उदाहृतत्वादिदमुपेक्ष्यमिति भावः । **चतुर्मासाण्ण्यो यज्ञे, तत्र भवः इति** ॥ वार्तिकमिदम्। तत्र भवो यज्ञः इत्यर्थे चतुर्मासशब्दात्सप्तम्यन्ताण्ण्यो वाच्य इत्यर्थः । **चतुर्ष्विति** ॥ चतुर्षु मासेषु अतीतेष्वित्यर्थः । **अण् संज्ञायामिति** ॥ वार्तिकमिदम् । चतुर्मासशब्दात् भवार्थे अण वाच्यः संज्ञायामित्यर्थः। **चतुर्ष्विति** ॥ फाल्गुनीं पौर्णमासीमारभ्य चतुर्षु मासेष्वतीतेष्वित्यर्थः। **आषाढीति** ॥ आषाढ्याः पौर्णमास्याः चातुर्मासीति संज्ञेति भावः। नच 'तत्र भवः' इत्यणैव सिद्धमिति वाच्यम् । 'द्विगोर्लुगनपत्ये' इति लुङ्निवृत्त्यर्थत्वात् । **तस्य च दक्षिणा** ॥ तस्य दक्षिणेत्यर्थे यज्ञकालनिवृत्तिभ्यः

द्वादशाहस्य दक्षिणा द्वादशाहिकी । आख्याग्रहणादकालादपि । आग्निष्टोमिकी । वाजपेयिकी ।

१७६० । तत्र च दीयते कार्यं भववत् । (५-१-९६)

प्रावृषि दीयते कार्यं वा प्रावृषेण्यम् । शारदम् ।

इति तद्धिते प्राग्वतीये ठञधिकारे कालात् इत्यधिकारस्सम्पूर्णः ।

अथ ठञ्विधिप्रकरणम् ।

१७६१ । व्युष्टादिभ्योऽण् । (५-१-९७)

व्युष्टे दीयते कार्यं वा वैयुष्टम् । व्युष्ट तीर्थ सङ्ग्राम प्रवास इत्यादि । ['अग्निपदादिभ्य उपसङ्ख्यानम्' (वा ३०७२) । अग्निपदे दीयते कार्यं वा आग्निपदम् । पैलुमूलम् ।]

ठञ् स्यादित्यर्थः । **द्वादशाहस्येति** ॥ द्वादशदिनसाध्यसुत्याकः क्रतुर्द्वादशाहः । तस्येत्यर्थः । कालोपसर्जनक्रतुवाचित्वादयमपि कालवृत्तिरिति भावः । 'कालात्' इत्यधिकारसूत्रे हि यथाकथञ्चित्कालबोधकस्य ग्रहणमिति 'तदस्य परिमाणम्' इति सूत्रे भाष्ये स्पष्टम् । नन्वेवं सति अग्निष्टोमस्य दक्षिणा आग्निष्टोमिकीत्यत्र ठञ् न स्यात् । अग्निष्टोमशब्दस्य कथञ्चिदपि कालवाचित्वाभावादित्यत आह । **आख्याग्रहणादकालादपीति** ॥ अन्यथा यज्ञेभ्य इत्येव सिद्धे आख्याग्रहणवैयर्थ्यादिति भावः । वस्तुतस्तु यज्ञेभ्यः इत्येवोक्तौ कालादित्यधिकारात् द्वादशाहादिशब्देभ्य एव स्यात्, नतु अग्निष्टोमादिशब्देभ्यः । आख्याग्रहणे तु अग्निष्टोमादिभ्यो द्वादशाहादिशब्देभ्यश्च सर्वेभ्यो यज्ञवाचिभ्य इति भाष्ये स्पष्टम् । **तत्र च दीयते** ॥ तत्र दीयते तत्र कार्यमित्यर्थयोः सप्तम्यन्तात्कालवाचिनः भववत्प्रत्ययाः स्युरित्यर्थः । **प्रावृषेण्यमिति** ॥ 'प्रावृष एण्यः' इति भवार्थे विहितः इहापि भवति । **शारदमिति** ॥ शरदि दीयते कार्यं वेत्यर्थः । सन्धिवेलाद्यण् । भवे विहित इहापि भवति । इदं वृत्त्यनुरोधेन । वस्तुतस्तु तत्र कार्यन्दीयत इत्यर्थे यज्ञाख्येभ्यः भववत्प्रत्ययाः स्युरित्यर्थः । अग्निष्टोमे दीयते भक्तम् आग्निष्टोमिकम् । कार्यग्रहणादग्निष्टोमे दीयते हिरण्यमित्यत्र न भवति । "नह्यग्निष्टोमे हिरण्यङ्क्रियते" इति भाष्ये स्पष्टम् ॥

इति तद्धिते प्राग्वतीये ठञधिकारे कालात् इत्यधिकारस्सम्पूर्णः ।

अथ ठञ्विधिर्निरूप्यते—**व्युष्टादिभ्योऽण्** ॥ तत्र च दीयते कार्यमित्यनुवर्तते । दीयते कार्यं वेत्यर्थे सप्तम्यन्तेभ्यो व्युष्टादिभ्यः अण् स्यात् । ठञोऽपवादः । व्युष्टं प्रभातम् ।

१७६२ । तेन यथाकथाचहस्ताभ्यां णयतौ । (५-१-९८)

यथाकथाचेत्यव्ययसङ्घातात्तृतीयान्ताद्धस्तशब्दाच्च यथासङ्ख्यं णयतौ स्तः । 'अर्थाभ्यां तु यथासङ्ख्यं नेष्यते' यथाकथाच दीयते कार्यं वा याथाकथाचम् । अनादरेण देयं कार्यं वेत्यर्थः । हस्तेन दीयते कार्यं वा हस्त्यम् ।

१७६३ । सम्पादिनि । (५-१-९९)

'तेन' इत्येव । कर्णवेष्टकाभ्यां सम्पादि कार्णवेष्टकिकं मुखम । कर्णालङ्काराभ्यामवश्यं शोभते इत्यर्थः ।

१७६४ । कर्मवेषाद्यत् । (५-१-१००)

कर्मणा सम्पादि कर्मण्यं शौर्यम् । वेषेण सम्पादि वेष्यो नटः । वेषः कृत्रिम आकारः ।

१७६५ । तस्मै प्रभवति सन्तापादिभ्यः । (५-१-१०१)

सन्तापाय प्रभवति सान्तापिकः । साङ्ग्रामिकः ।

१७६६ । योगाद्यच्च । (५-१-१०२)

चाट्ठञ् । योगाय प्रभवति योग्यः—यौगिकः ।

१७६७ । कर्मण उकञ् । ५-१-१०३)

कर्मणे प्रभवति कार्मुकम् ।

१७६८ । समयस्तदस्य प्राप्तम् । (५-१-१०४)

समयः प्राप्तोऽस्य सामयिकम् ।

वैयुष्टमिति ॥ अणि 'न य्वाभ्याम्' इत्यैच् । **तेन यथा** ॥ **अर्थाभ्यामिति** ॥ प्रकृत्योः प्रत्यययोश्च यथासङ्ख्यम्, नतु दीयते कार्यमित्यर्थयोरित्यर्थः । व्याख्यानादिति भावः । **सम्पादिनि** ॥ **तेनेत्येवेति** ॥ सम्पादः सम्पत्तिः शोभा अस्यास्तीति सम्पादी । तस्मिन्नर्थे तृतीयान्ताट्ठगित्यर्थः । **कर्मवेषाद्यत्** ॥ तृतीयान्तात्कर्मन्शब्दात् वेषशब्दाच्च सम्पादिन्यर्थे यत्स्यादित्यर्थः । **तस्मै प्रभवति** ॥ चतुर्थ्यन्तेभ्यः सन्तापादिभ्यः प्रभवतीत्यर्थे ठञ् स्यादित्यर्थः । **सन्तापाय प्रभवतीति** ॥ शत्रूणाम्पीडायै शक्नोतीत्यर्थः । **योगाद्यच्च** ॥ चतुर्थ्यन्तात्प्रभवतीत्यर्थे इति शेषः । **कर्मण उकञ्** ॥ चतुर्थ्यन्तात्प्रभवतीत्यर्थे इति शेषः । **कार्मुकमिति** ॥ उकञि टिलोपः । **समयस्तदस्य** ॥ तदिति प्राप्तमिति च सामान्ये नपुंसकम् । समयः प्राप्तोऽस्येत्यर्थे प्रथमान्तात्समयशब्दात् ठञित्यर्थः । तदित्युत्तरार्थम् ।

१७६९ । ऋतोरण् । (५-१-१०५)

ऋतुः प्राप्तोऽस्य आर्तवम् । ['उपवस्त्रादिभ्य उपसङ्ख्यानम्' । उपवस्ता प्राप्तोऽस्य औपवस्त्रम् । प्राशिता प्राप्तोऽस्य प्राशित्रम् ।]

१७७० । कालाद्यत् । (५-१-१०७)

कालः प्राप्तोऽस्य काल्यं शीतम् ।

१७७१ । प्रकृष्टे ठञ् । (५-१-१०८)

'कालात्' इत्येव । तदस्येति च । प्रकृष्टो दीर्घः कालोऽस्येति कालिकं वैरम् ।

१७७२ । प्रयोजनम् । (५-१-१०९)

'तदस्य' इत्येव । इन्द्रमहः प्रयोजनमस्य ऐन्द्रमहिकम् । प्रयोजनं फलं कारणं च ।

१७७३ । विशाखाषाढादण्मन्थदण्डयोः । (५-१-११०)

आभ्यामण्स्यात्प्रयोजनमित्यर्थे क्रमान्मन्थदण्डयोरर्थयोः । विशाखा प्रयोजनमस्य वैशाखो मन्थः । आषाढो दण्डः । 'चूडादिभ्य उपसङ्ख्यानम्' । चूडा—चौडम् । श्रद्धा—श्राद्धम् ।

ऋतोरण् ॥ प्राप्तमित्येव । प्राप्तोऽस्येत्यर्थे प्रथमान्तात् ऋतोरणित्यर्थः । **आर्तवमिति** ॥ अणि ओर्गुण', आदिवृद्धि', रपरत्वम् । **कालाद्यत्** ॥ तदस्य प्राप्तमित्येव । प्रथमान्तात्कालशब्दात् अस्य प्राप्त इत्यर्थे यदित्यर्थः । प्रातःकाले काल्यशब्दस्तु कल्यवदव्युत्पन्नम्प्रातिपदिकम् । कल्यमेव काल्यं वा । **प्रकृष्टे ठञ्** ॥ अस्य प्राप्त इत्यर्थे प्रकृष्टवृत्तेः कालशब्दात् ठञित्यर्थः । यतोऽपवादः । प्रकृष्टशब्दस्य विवरणं दीर्घ इति । **प्रयोजनम्** ॥ **तदस्येत्येवेति** ॥ अस्य प्रयोजनमित्यर्थे प्रथमान्ताट्ठञित्यर्थः । **इन्द्रमह इति** ॥ इन्द्रोत्सव इत्यर्थः । "मह उद्धव उत्सवः" इत्यमरः । **प्रयोजनं फलं कारणञ्चेति** ॥ प्रयुज्यते प्रवृत्त्या निष्पाद्यते इति कर्मणि ल्युटि प्रयोजनशब्दः फलवाची प्रयुज्यते । प्रयुज्यते प्रवर्तते पुरुषोऽनेनेति करणे ल्युटि प्रयोजनशब्दः प्रवर्तकवाचीत्यर्थः । **विशाखाषाढात्** ॥ विशाखाशब्दात् आषाढशब्दाच्च प्रथमान्तात् अस्य प्रयोजनमित्यर्थे अण् स्यात् । समुदायेन मन्थे दण्डे च क्रमात् गम्ये सतीत्यर्थः । तदाह । **आभ्यामिति** ॥ स्थूणामेकान्निखाय तस्यां रज्जुद्वयमधरोत्तरमासज्य तयोः रज्ज्वोर्मन्थनदण्डम् ऊर्ध्वमासज्यते । न रज्वा भ्रामितेन दधि विलोड्यते इति स्थितिः । तत्र स्थूणा मन्थ इत्युच्यते । मन्थानाख्यदण्डो दण्ड उच्यते । अनयोः वैशाखशब्दः आषाढशब्दश्च रूढौ तत्रावयवार्थाभिनिवेशो न कर्तव्यः । **चूडादिभ्य इति** ॥ चूडादिभ्यः प्रथमान्तेभ्यः अस्य प्रयोजनमित्यर्थे अणित्यर्थः ।

१७७४। अनुप्रवचनादिभ्यश्छः। (५-१-१११)

अनुप्रवचनं प्रयोजनमस्य अनुप्रवचनीयम्।

१७७५। समापनात्सपूर्वपदात्। (५-१-११२)

व्याकरणसमापनं प्रयोजनमस्य व्याकरणसमापनीयः।

१७७६। ऐकागारिकट् चौरे। (५-१-११३)

एकमसहायमगारं प्रयोजनमस्य मुमुषिषोः स ऐकागारिकश्चौरः।

१७७७। आकालिकडाद्यन्तवचने। (५-१-११४)

समानकालावाद्यन्तौ यस्येत्याकालिकः। समानकालस्याकाल आदेशः। आशु विनाशीत्यर्थः। पूर्वदिने मध्याह्नादावुत्पद्य दिनान्तरे तत्रैव नश्वर इति वा। 'आकालाट्ठंश्च' (वा ३०७८)। आकालिका विद्युत्।

इति तद्धिते प्राग्वतीयस्य ठञः पूर्णोऽवधिः।

चौडमिति ॥ चूडा प्रयोजनमस्येति विग्रहः। डलयोरभेदाच्चौळमित्यपि। **श्रद्धा, श्राद्धमिति** ॥ श्रद्धा प्रयोजनमस्येति विग्रहः। श्रद्धाशब्दादणि श्राद्धमित्यर्थः। अत्र प्रयोजनशब्दः कारणवाची। श्राद्धहेतुकमिति यावत्। **अनुप्रवचनादिभ्यश्छः** ॥ प्रथमान्तादनुप्रवचनशब्दादस्य प्रयोजनमित्यर्थे छः स्यादित्यर्थः। अनुप्रवचनं नाम उपनयनाङ्गं किञ्चित्कर्म आश्वलायनसूत्रे प्रसिद्धम्। **समापनात्सपूर्वपदात्** ॥ सपूर्वपदात्समापनशब्दात् अस्य प्रयोजनमित्यर्थे छः स्यादित्यर्थः। **व्याकरणसमापनीय इति** ॥ मङ्गळाचार इति शेषः। **ऐकागारिकट् चौरे** ॥ एकमगारं प्रयोजनं प्रयोजकमस्य चोरस्येति विग्रहे एकागारशब्दादिकट्प्रत्यये ऐकागारिकट् इति निपात्यते। टित्त्वं ङीबर्थं प्रयोजनमित्येव सिद्धे चोर एवेति नियमार्थम् सूत्रम्। एकमित्यस्य विवरणम् असहायमिति "एके मुख्यान्यकेवला." इत्यमरः। **मुमुषिषोरिति** ॥ चौर्यङ्कर्तुमिच्छोरित्यर्थः। चोरस्य हि असहायमगारमिष्टं गेहान्तरसत्त्वे चौर्यप्रकटनप्रसङ्गादिति भावः। चोरे किम्। एकागारं प्रयोजनमस्य भिक्षोरिति वाक्यमेव। भाष्ये तु 'एकागाराच्चोरे' इत्येव सुवचम्। प्रकृतत्वाट्ठञ् सिद्ध इत्युक्तम्। **आकालिकट्** ॥ समानकालाविति बहुव्रीहिः। **आद्यन्ताविति** ॥ उत्पत्तिविनाशावित्यर्थः। **समानकालस्येति** ॥ समानकालशब्दस्य इकप्रत्यये परं आकालादेशो निपात्यते इत्यर्थः। ननु उत्पत्तिविनाशयोरेककालिकत्वमसम्भवपराहतमित्यत आह। **आशु विनाशीति** ॥ लक्षणां विनैव आह। **पूर्वदिने इति** ॥ **आकालाट्ठंश्चेति** ॥ आकालशब्दादाद्यन्तवचनाट्ठन्प्रत्ययश्च वक्तव्य इत्यर्थः। चात् ठञ्। **आकालिका विद्युदिति** ॥ ठनि टाप्। ठञि तु ङीप्। आकालिकी। अर्थः प्राग्वत् ॥

इति तद्धिते प्राग्वतीयस्य ठञः पूर्णोऽवधिः।

अथ तद्धितनञ्स्नञधिकारप्रकरणम् ।

१७७८ । तेन तुल्यं क्रिया चेद्वतिः । (५-१-११५)

ब्राह्मणेन तुल्यं ब्राह्मणवदधीते । 'क्रिया चेत्' इति किम् । गुणतुल्ये मा भूत् । पुत्रेण तुल्यः स्थूलः ।

१७७९ । तत्र तस्येव । (५-१-११६)

मधुरायामिव मधुरावत्स्रुघ्ने प्राकारः । चैत्रस्येव चैत्रवन्मैत्रस्य भावः ।

१७८० । तदर्हम् । (५-१-११७)

विधिमर्हति विधिवत्पूज्यते । क्रियाग्रहणं मण्डूकप्लुत्या अनुवर्तते । तेनेह न । राजानमर्हति छत्रम् ।

१७८१ । तस्य भावस्त्वतलौ । (५-१-११९)

अथ नञ्स्नञधिकारो निरूप्यते—**तेन तुल्यं क्रिया चेद्वतिः** ॥ तुल्यमिति क्रियेत्यस्य विशेषणम् । सामान्याभिप्रायन्नपुंसकम् । तृतीयान्तात्तुल्यमित्यर्थे वतिप्रत्ययः स्यात् । यत्तुल्यं सा चेत् क्रियेत्यर्थः । तुल्या क्रियेत्यर्थे वतिः स्यादिति यावत् । **ब्राह्मणेन तुल्यं ब्राह्मणवदधीते इति** ॥ अत्र ब्राह्मणवदित्युदाहरणम् । ब्राह्मणेन तुल्यमधीते इति विग्रहवाक्यम् । अत्र ब्राह्मणशब्देन ब्राह्मणकर्तृकाध्ययनं लक्ष्यते । ब्राह्मणकर्तृकाध्ययनतुल्यं क्षत्रियकर्तृकाध्ययनमिति बोधः । **गुणतुल्ये इति** ॥ द्रव्यतुल्येऽपीति बोध्यम् । तेन चैत्रेण तुल्यो धनी देवदत्तः इत्यादौ न भवति । 'अयमेवं न तद्वत्' इत्यादौ वतेस्साधुत्वार्थम् आहेति क्रियापदं प्रयुञ्जते वृद्धाः । **तत्र तस्येव** ॥ तत्रेवेति तस्येवेति चार्थे सप्तम्यन्तात् षष्ठ्यन्ताच्च वतिः स्यादित्यर्थः । अत्र तृतीयान्तार्थ आरम्भः । अस्मादेव निर्देशादिवशब्दयोगे षष्ठ्यर्थे सप्तम्यपीति भाष्यम् । अत्र क्रिया चेति नानुवर्तते इत्यभिप्रेत्योदाहरति । **मधुरायामिव मधुरावत्स्रुघ्ने प्राकार इति** ॥ अत्र मधुरायामिवेति नाधिकरणसप्तमी । तथासति विद्यमानेति क्रियापदसापेक्षतया असामर्थ्यात् । अत एव अस्मादेव सूत्रनिर्देशादिवशब्दयोगे षष्ठ्यर्थे सप्तमीभाष्यं सङ्गच्छते । मधुरासम्बन्धिप्राकारनिर्देशः स्रुघ्नस्य प्राकार इति बोधः । **मैत्रस्य भाव इति** ॥ वृत्तमित्यर्थः । **तदर्हम्** ॥ अर्हतीत्यर्हम् । पचाद्यच् । तदिति कर्मणि द्वितीयान्तम् । लब्धुं योग्यं भवतीत्यर्थात् कृद्योगलक्षणषष्ठ्यभावस्त्वार्षः । वतिरित्यनुवर्तते । द्वितीयान्तादर्हतीत्यर्थे वतिः स्यादित्यर्थः । **विधिमर्हतीति** ॥ विधिं लब्धुं योग्यं भवतीत्यर्थः । **विधिवत्पूज्यते इति** ॥ हरिरिति शेषः । विधिं लब्धुं योग्यं हरिपूजनमित्यर्थः । विहितं प्रकारमनतिक्रान्तमिति यावत् । **मण्डूकप्लुत्येति** ॥ पूर्वसूत्रे अननुवृत्तेरिति भावः । **तस्य भावः** ॥ षष्ठ्यन्ताद्भाव इत्यर्थे त्वतलौ स्त इत्यर्थः । भावशब्दस्य

प्रकृतिजन्यबोधे प्रकारो भावः । गोर्भावो गोत्वम् । गोता । 'त्वान्तं क्लीबम्' (लि १२०) । 'तलन्तं स्त्रियाम्' (लि १७) ।

१७८२ । आ च त्वात् । (५-१-१२०)

ब्रह्मणस्त्व इत्यतः प्राक्त्वतलावधिक्रियेते । अपवादैः सह समावेशार्थं, गुणवचनादिभ्यः कर्मणि विधानार्थं चेदम् । चकारो नञ्स्नञ्भ्यामपि समावेशार्थः । स्त्रिया भावः स्त्रैणम्—स्त्रीत्वम्—स्त्रीता । पौंस्नम्—पुंस्त्वम्—पुंस्ता ।

१७८३ । न नञ्पूर्वात्तत्पुरुषादचतुरसङ्गतलवणवटयुधकतरसलसेभ्यः । (५-१-१२१)

अभिप्रायादावपि वृत्तेराह । **प्रकृतिजन्यबोधे प्रकारो भाव इति** ॥ त्वतल्प्रत्ययौ यत उत्पत्स्येते तस्मात्प्रकृतिभूतशब्दात् व्यक्तिबोधे जायमाने यत् जात्यादिकं विशेषणतया भासते तद्व्यक्तिविशेषणम्भावशब्देन विवक्षितमित्यर्थः । यथा गोशब्दाद्धि व्यक्तिबोधे जायमाने गोत्वं विशेषणत्वेन भासते । गोशब्दस्य गोत्ववतीषु व्यक्तिषु गोत्वे वा शक्तिग्रहणात् । न हि गोत्वं विहाय गोव्यक्तिषु गोशब्दस्य शक्तिग्रहः सम्भवति । अतीतानागतानां वर्तमानानाञ्चानन्तत्वेन युगपदुपस्थित्यसम्भवात् । गोशब्दात् प्राणित्वपशुत्वादिरूपेणापि गोव्यक्तिप्रतीत्यापत्तेश्च । ततश्च सर्वासु गोव्यक्तिष्वनुगतं तदितरव्यक्तिभ्यो व्यावृत्तङ्कञ्चिद्धर्मविशेषं शक्यतावच्छेदकं पुरस्कृत्य गोशब्दः प्रवर्तत इति सिद्धान्तः । एवङ्घटादिशब्दा अपि घटत्वादित्तत्तद्धर्मं पुरस्कृत्य प्रवर्तन्ते । तदिदं शब्दप्रवृत्तिनिमित्तं भावशब्देन विवक्षितमिति भाष्यकैयटयोः स्थितम् । **गोर्भाव इति** ॥ गोशब्दस्य प्रवृत्तिनिमित्तमिति बोधः । 'त्वान्तं क्लीबं तलन्तं स्त्रियाम्' इति लिङ्गानुशासनसूत्रसिद्धम् । **आ च त्वात्** ॥ त्वतलावित्यनुवर्तते । आङ्मर्यादायाम् । तदाह । **ब्रह्मणस्त्व इत्यतः प्रागिति** ॥ ननु 'तस्य भावस्त्वतलौ' इत्यतः त्वतलोरुत्तरसूत्रेष्वनुवृत्त्यैव सिद्धेरधिकारोऽयं व्यर्थ इत्यत आह । **अपवादैरिति** ॥ 'पृथ्वादिभ्य इमनिज्वा' इत्यादिविहितैरिमनिजादिभिरपवादैः समुच्चयार्थमित्यर्थः । असति त्वेतस्मिन्नधिकारसूत्रे उत्तरत्र इमनिजादिविधिषु त्वतलोरनुपस्थितिः स्यात् । प्रत्यक्षनिर्दिष्टैरिमनिजादिविशेषैः शान्ताकाङ्क्षत्वात् । अन्यथा 'प्राग्दीव्यतोऽण्' इत्यधिकृतस्य अणः 'अत इञ्' इत्यादावपि प्रवृत्तिः स्यादिति भावः । प्रयोजनान्तरमाह । **गुणवचनादिभ्य इति** ॥ अन्यथा भावेऽर्थे सावकाशयोस्त्वतलोः कर्मण्यर्थे गुणवचनादिभ्यो विशेषविहितेन ष्यञा बाधप्रसङ्ग इति भावः । नन्वेवमपि आत्वादित्येवास्तु, स्वरितत्वादेव पूर्वसूत्रादिह त्वतलोरनुवृत्तिसिद्धेस्तदनुकर्षार्थश्चकारो व्यर्थ इत्यत आह । **चकार इति** ॥ अन्यथा त्वतलौ स्त्रीपुंसाभ्यां न स्याताम् । अन्यत्र तयोः सावकाशत्वादिति भावः । **पौंस्नमिति** ॥ संयोगान्तलोपे 'पुमः खय्यम्परे' इति रुत्वम् । पाक्षिकावनुनासिकानुस्वारौ, विसर्गे कृते सत्वम् । एवं पुंस्त्वम् । तत्र 'ह्रस्वात्तादौ' इति षत्वन्तु न भवति । सवनादिषु पाठात् । **न नञ्पूर्वात्** ॥ **इतः परमिति** ॥ त्वतल्विधेरूर्ध्वमित्यर्थः । नञ्पूर्वात्

इतः परं ये भावप्रत्ययास्ते नञ्तत्पुरुषान्न स्युश्चतुरादीन्वर्जयित्वा । अपतित्वम् । अपटुत्वम् । 'नञ्पूर्वात्' किम् । बार्हस्पत्यम् । 'तत्पुरुषात्' किम् । नास्य पटवः सन्तीत्यपटुः तस्य भावः आपटवम् । 'अचतुर–' इति किम् । आचतुर्यम् । आसङ्गत्यम् । आलवण्यम् । आवट्यम् । आयुध्यम् । आकत्यम् । आरस्यम् । आलस्यम् ।

१७८४ । पृथ्वादिभ्य इमनिज्वा । (५-१-१२२)

वावचनमणादिसमावेशार्थम् ।

१७८५ । र ऋतो हलादेर्लघोः । (६-४-१६१)

हलादेर्लघोर्ऋकारस्य रः स्यात् इष्ठेमेयस्सु ।

१७८६ । टेः । (६-४-१५५)

इत्युत्तरस्य प्रतिषेध इति भाष्यादिति भावः । **चतुरादीनिति** ॥ चतुर, सङ्गत, लवण, वट, बुध, कत, रस, लस, एतान् वर्जयित्वेत्यर्थः । **अपतित्वमिति** ॥ इह 'पत्यन्तपुरोहितादिभ्यः' इति यक् न भवति । **अपटुत्वमिति** ॥ इह 'इगन्ताच्च लघुपूर्वात्' इत्यण् न भवति । **बार्हस्पत्यमिति** ॥ 'पत्यन्तपुरोहितादिभ्यः' इति यक् । **आपटवमिति** ॥ 'इगन्ताच्च लघुपूर्वात्' इत्यण् । अपटुशब्दस्य बहुव्रीहित्वात्तत्पुरुषत्वाभावान्नास्याणो निषेध इति भावः । **आचतुर्यमिति** ॥ अचतुरस्य भावः ब्राह्मणादित्वात्ष्यञ् । **आसङ्गत्यमिति** ॥ असङ्गतशब्दात् ष्यञ् । **आलवण्यमिति** ॥ अलवणशब्दात् ष्यञ् । **आवट्यमिति** ॥ न वटः अवटः तस्मात् ष्यञ् । **आयुध्यमिति** ॥ अयुधशब्दात् ष्यञ् । **आकत्यमिति** ॥ अकतशब्दात् ष्यञ् । **आरस्यमिति** ॥ अरसशब्दात् ष्यञ् । **आलस्यमिति** ॥ लसतिः लसः न लसः अलसः तस्मात् ष्यञ् । **पृथ्वादिभ्य इमनिज्वा** ॥ तस्य भावः इत्यनुवर्तते । पृथ्वादिभ्यः षष्ठ्यन्तेभ्यः भावे इमनिज् वा स्यादित्यर्थः । ननु वाग्रहणं व्यर्थम् । 'समर्थानाम्प्रथमाद्वा' इति महाविभाषयैव वाक्यस्य सिद्धत्वात् । नच इमनिजभावे त्वतल्प्रत्ययार्थं वाग्रहणमिति वाच्यम् । आत्वत्वादित्येव तत्समावेशासिद्धेरित्यत आह । **वावचनमणादिसमावेशार्थमिति** ॥ पृथुमृदुप्रभृतिषु 'इगन्ताच्च लघुपूर्वात्' इत्यण् । चण्डखण्डादिषु गुणवचनलक्षणष्यञः बालवत्सादिषु वयोवचनलक्षणस्य अञश्च औत्सर्गिकस्य समावेशार्थमित्यर्थः । अन्यथा महाविभाषावशादपवादेन मुक्ते पुनरुत्सर्गो न प्रवर्तते' इति 'पारे मध्ये षष्ठ्या वा' इति सूत्रभाष्ये सिद्धान्तितत्वादिमनिच् त्वतलामभावे तेषां प्रवृत्तिर्न स्यादिति भावः । **र ऋतो हलादेः** ॥ र इति प्रथमान्तम् इष्ठेमेयस्स्विति शेषपूरणम् । 'तुरिष्ठेमेयस्सु' इत्यतः तदनुवृत्तेरिति भावः । अङ्गस्येत्यधिकृतं हलादेरङ्गस्य लघोः ऋकारस्य र इति रेफाकारसङ्घात आदेशः स्यात् । इष्ठनि इमनि ईयसि च परे इत्यर्थः । **टेः** ॥ इष्ठेमेयस्सु

भस्य टेर्लोपः स्यादिष्ठेमेयस्सु । पृथोर्भावः प्रथिमा—पार्थवम् । म्रदिमा—मार्दवम् ।

१७८७ । वर्णदृढादिभ्यः ष्यञ्च । (५-१-१२३)

चादिमनिच् । शौक्ल्यम्—शुक्लिमा । दार्ढ्यम् । 'पृथुमृदुभृशकृशदृढपरिवृढानामेव रत्वम्' (वा ४२११) । द्रढिमा । षो ङीषर्थः । औचिती । याथाकामी ।

१७८८ । गुणवचनब्राह्मणादिभ्यः कर्मणि च । (५-१-१२४)

चाद्भावे । जडस्य कर्म भावो वा जाड्यम् । मूढस्य भावः कर्म वा मौढ्यम् । ब्राह्मण्यम् । 'अर्हतो नुम्च—' (वा ३०९२) । अर्हतो भावः कर्म वा आर्हन्त्यम् । आर्हन्ती । ब्राह्मणादिराकृतिगणः ।

इत्यनुवर्तते । 'अल्लोपोऽनः' इत्यतः लोप इति च । तदाह । **टेर्लोपः स्यादिष्ठेमेयस्स्विति** ॥ **प्रथिमेति** ॥ पृथुशब्दादिमनिच्, चकार इत्, नकारादिकार उच्चारणार्थः । ऋकारस्य रः, उकारस्य गुणम्बाधित्वा टेर्लोपः । **पार्थवमिति** ॥ इमनिजभावे 'इगन्ताच्च लघुपूर्वात्' इत्यण् । **म्रदिमेति** ॥ मृदुशब्दादिमनिचि ऋकारस्य रः, 'टेः' इति टिलोपश्च । **मार्दवमिति** ॥ 'इगन्ताच्च' इत्यण् । **वर्णदृढादिभ्यः ष्यञ्च** ॥ षष्ठ्यन्तेभ्यो वर्णवाचिभ्यो दृढादिभ्यश्च भावे ष्यञ् च स्यादित्यर्थः । गुणवचनत्वादेव ष्यञि सिद्धे इमनिच्समुच्चायार्थं वचनम् । "पृथुं मृदुं भृशञ्चैव कृशञ्च दृढमेव च । परिपूर्वम्वृढञ्चैव षडेतान् रविधौ स्मरेत्" इति वार्तिकमर्थतः सङ्गृह्णाति । **पृथुमृदुभृशेत्यादि** ॥ तेन कृतयतीत्यादाविष्ठवत्त्वेऽपि रभावो न । **द्रढिमेति** ॥ दृढशब्दादिमनिचि ऋकारस्य रः । भ्रशिमा क्रशिमा द्रढिमा परिव्रढिमा । ननु वर्णदृढादीनां लोकतो नपुंसकत्वात् ष्यञष्षित्त्वस्य किम्प्रयोजनमित्यत आह । **षो ङीषर्थ इति** ॥ **औचितीति** ॥ उचितशब्दात्ब्राह्मणादित्वात् ष्यञि लोकात् स्त्रीत्वम् । षित्त्वात् ङीषि 'हलस्तद्धितस्य' इति यलोपः । उचितस्तु न दृढादिः । तद्गणे अदर्शनात् इमनिच्प्रसङ्गाच्च । अस्यैव ष्यञ् । उत्तरसूत्रे अनुवृत्तेरिहैव तस्य षित्त्वप्रयोजनकथनमिति बोध्यम् । **याथाकामीति** ॥ काममनतिक्रम्य यथाकामम् । ततः स्वार्थे चतुर्वर्णादित्वात् ष्यञि लोकात् स्त्रीत्वे षित्त्वात् ङीष् । **गुणवचन** ॥ गुणोपसर्जनद्रव्यवाचिभ्यो ब्राह्मणादिभ्यश्च षष्ठ्यन्तेभ्यो भावे कर्मणि च अर्थे ष्यञित्यर्थः । **अर्हतो नुम्चेति** ॥ वार्तिकमिदम् । 'अर्हः प्रशंसायाम्' इति सूत्रेण शतरि अर्हच्छब्दः पूज्यवाचीति कैयटः । अर्हच्छब्दात् ष्यञ् स्यात्प्रकृतेर्नुं चेत्यर्थः । मित्त्वादन्त्यादचः परः । अनुस्वारपरसवर्णौ । लोकात् पुंस्त्व स्त्रीत्वञ्च । तदाह । **आर्हन्त्यमार्हन्तीति** ॥ आर्हत्यशब्दात् ङीषि 'हलस्तद्धितस्य' इति यलोपः । यथातथेति निपातसमुदायः । यथापुरमिति पुराशब्देन पदार्थानतिवृत्तावव्ययीभावः । इमौ शब्दौ नञ्पूर्वपदौ ब्राह्मणादी

इतः परं ये भावप्रत्ययास्ते नञ्तत्पुरुषान्न स्युश्चतुरादीन्वर्जयित्वा । अपतित्वम् । अपटुत्वम् । 'नञ्पूर्वात्' किम् । बार्हस्पत्यम् । 'तत्पुरुषात्' किम् । नास्य पटवः सन्तीत्यपटुः तस्य भावः आपटवम् । 'अचतुर–' इति किम् । आचतुर्यम् । आसङ्गत्यम् । आलवण्यम् । आवट्यम् । आयुध्यम् । आकत्यम् । आरस्यम् । आलस्यम् ।

१७८४ । पृथ्वादिभ्य इमनिज्वा । (५-१-१२२)

वावचनमणादिसमावेशार्थम् ।

१७८५ । र ऋतो हलादेर्लघोः । (६-४-१६१)

हलादेर्लघोर्ऋकारस्य रः स्यात् इष्ठेमेयस्सु ।

१७८६ । टेः । (६-४-१५५)

इत्युत्तरस्य प्रतिषेध इति भाष्यादिति भावः । **चतुरादीनिति** ॥ चतुर, सङ्गत, लवण, वट, बुध, कत, रस, लस, एतान् वर्जयित्वेत्यर्थः । **अपतित्वमिति** ॥ इह 'पत्यन्तपुरोहितादिभ्यः' इति यक् न भवति । **अपटुत्वमिति** ॥ इह 'इगन्ताच्च लघुपूर्वात्' इत्यण् न भवति । **बार्हस्पत्यमिति** ॥ 'पत्यन्तपुरोहितादिभ्यः' इति यक् । **आपटवमिति** ॥ 'इगन्ताच्च लघुपूर्वात्' इत्यण् । अपटुशब्दस्य बहुव्रीहित्वात्तत्पुरुषत्वाभावान्नास्याणो निषेध इति भावः । **आचतुर्यमिति** ॥ अचतुरस्य भावः ब्राह्मणादित्वात्ष्यञ् । **आसङ्गत्यमिति** ॥ असङ्गतशब्दात् ष्यञ् । **आलवण्यमिति** ॥ अलवणशब्दात् ष्यञ् । **आवट्यमिति** ॥ न वटः अवटः तस्मात् ष्यञ् । **आयुध्यमिति** ॥ अयुधशब्दात् ष्यञ् । **आकत्यमिति** ॥ अकतशब्दात् ष्यञ् । **आरस्यमिति** ॥ अरसशब्दात् ष्यञ । **आलस्यमिति** ॥ लसतिः लसः न लसः अलसः तस्मात् ष्यञ् । **पृथ्वादिभ्य इमनिज्वा** ॥ तस्य भावः इत्यनुवर्तते । पृथ्वादिभ्यः षष्ठ्यन्तेभ्यः भावे इमनिज् वा स्यादित्यर्थः । ननु वाग्रहणं व्यर्थम् । 'समर्थानाम्प्रथमाद्वा' इति महाविभाषयैव वाक्यस्य सिद्धत्वात् । नच इमनिजभावे त्वतल्प्रत्ययार्थं वाग्रहणमिति वाच्यम् । आचत्वादित्येव तत्समावेशसिद्धेरित्यत आह । **वावचनमणादिसमावेशार्थमिति** ॥ पृथुमृदुप्रभृतिषु 'इगन्ताच्च लघुपूर्वात्' इत्यण् । चण्डखण्डादिषु गुणवचनलक्षणष्यञः बालवत्सादिषु वयोवचनलक्षणस्य अञश्च औत्सर्गिकस्य समावेशार्थमित्यर्थः । अन्यथा महाविभाषावशादपवादेन मुक्ते पुनरुत्सर्गो न प्रवर्तते' इति 'पारे मध्ये षष्ठ्या वा' इति सूत्रभाष्ये सिद्धान्तितत्वादिमनिच् त्वतलामभावे तेषां प्रवृत्तिर्न स्यादिति भावः । **र ऋतो हलादेः** ॥ र इति प्रथमान्तम् इष्ठेमेयस्स्विति शेषपूरणम् । 'तुरिष्ठेमेयस्सु' इत्यतः तदनुवृत्तेरिति भावः । अङ्गस्येत्यधिकृतं हलादेरङ्गस्य लघोः ऋकारस्य र इति रेफाकारसङ्घात आदेशः स्यात् । इष्ठनि इमनि ईयसि च परे इत्यर्थः । **टेः** ॥ इष्ठेमेयस्सु

१७९१ । सख्युर्यः । (५-१-१२६)

सख्युर्भावः कर्म वा सख्यम् 'दूतवणिग्भ्यां च' । दूतस्य भावः कर्म वा दूत्यम् । 'वणिज्यम्—' इति काशिका । माधवस्तु 'वणिज्याशब्दः स्वभावात्स्त्रीलिङ्गः । भाव एव चात्र प्रत्ययो न तु कर्मणि' इत्याह । भाष्ये तु 'दूतवणिग्भ्यां च' इति नास्त्येव । ब्राह्मणादित्वाद्वाणिज्यमपि ।

१७९२ । कपिज्ञात्योर्ढक् । (५-१-१२७)

कापेयम् । ज्ञातेयम् ।

१७९३ । पत्यन्तपुरोहितादिभ्यो यक् । (५-१-१२८)

सैनापत्यम् । पौरोहित्यम् । 'राजासे' (ग सू १०६) । राजन्शब्दोऽसमासे यकं लभते इत्यर्थः । राज्ञो भावः कर्म वा राज्यम् । समासे तु ब्राह्मणादित्वात्ष्यञ् । आधिराज्यम् ।

'यस्येति च' इत्यकारलोपात् स्तेयमिति सिध्यतीति वाच्यम् । 'अचःपरस्मिन्' इत्यकारलोपस्य स्थानिवत्त्वेन तमाश्रित्य एकारस्य अयादेशप्रसङ्गात् । नच सङ्घातग्रहणेऽपि 'अलोऽन्त्यस्य' इत्यकारस्यैव लोपः स्यादिति शङ्क्यम् । 'यस्येति च' इत्येव अकारस्यैव लोपसिद्धाविह नलोपविधिवैयर्थ्यात्, 'नानर्थकेऽलोऽन्त्यविधिः' इति निषेधाच्च । **योगं विभज्येति** ॥ स्तेनादिति पृथक् सूत्रम् । ष्यञित्यनुवर्तते । स्तेनशब्दाद्भावे कर्मणि च ष्यञित्यर्थः । समासकृदन्ततद्धितान्ताव्ययसर्वनामजातिसङ्ख्यासंज्ञाशब्दभिन्नमर्थवच्छब्दरूपं गुणवचनसंज्ञक भवतीति आकडारसूत्रभाष्यरीत्या स्तेनशब्दस्य पचाद्यजन्तस्य कृदन्तस्य गुणवचनत्वाभावादप्राप्ताविदं वचनम । अव्युत्पन्नप्रातिपदिकतया गुणवचनत्वेऽपि यत्प्रत्ययेनापवादेन पक्षे समावेशार्थं वचनम् । ततो 'यन्नलोपश्च' इति योगान्तरम् । स्तेनात् इत्यनुवृत्तावुक्तोऽर्थः । **केचिदिति** ॥ भाष्यदृष्टत्वात् योगविभागोऽयमप्रामाणिकः इति भावः । **सख्युर्यः** ॥ सखिशब्दात् षष्ठ्यन्तात् भावकर्मणोः यः स्यादित्यर्थः । **दूतवणिग्भ्याञ्चेति** ॥ वार्तिकमिदम् । आभ्यामपि षष्ठ्यन्ताभ्याम्भावकर्मणोः यत्स्यादिति वक्तव्यमित्यर्थः । **नास्त्येवेति** ॥ वार्तिकत्वे तस्य भाष्ये पाठावश्यकत्वात् पाठस्य चाभावादप्रामाणिकमेवेदं वृत्तिपठितं वार्तिकमिति भावः । तर्हि दूतवणिग्भ्याम्भावकर्मणोः कथं यत्प्रत्यय इत्याशङ्क्य नास्त्येव यत्प्रत्ययः, किन्तु ष्यञेवेत्याह । **ब्राह्मणादित्वाद्वाणिज्यमपीति** ॥ अपिना दौत्यसङ्ग्रहः । **कपिज्ञात्योर्ढक्** ॥ पञ्चम्यर्थे षष्ठी । आभ्यां षष्ठ्यन्ताभ्याम्भावकर्मणोः ढगित्यर्थः । अत्र कपिज्ञात्योः भावकर्मणोश्च न यथासङ्ख्यं, व्याख्यानात् । **पत्यन्त** ॥ पत्यन्तेभ्यः पुरोहितादिभ्यश्च षष्ठ्यन्तेभ्यो भावकर्मणोर्यक् स्यादित्यर्थः । **राजासे इति** ॥ पुरोहितादिगणसूत्रमिदम् । राजा असे इति च्छेदः । स इति समासस्य प्राचां संज्ञा । तदाह । **राजन्शब्द इति** ॥ **राज्यमिति** ॥ यकि टिलोपः । 'ये चाभावकर्मणोः' इति

१७९४ । प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् । (५-१-१२९)

प्राणभृज्जाति आश्वम् । औष्ट्रम् । वयोवचनं कौमारम् । कैशोरम् । औद्गात्रम् । औन्नेत्रम् । सौष्ठवम् । दौष्ठवम् ।

१७९५ । हायनान्तयुवादिभ्योऽण् । (५-१-१३०)

द्वैहायनम् । त्रैहायनम् । यौवनम् । स्थाविरम् । 'श्रोत्रियस्य यलोपश्च' (वा ३०९३) । श्रौत्रम् । कुशलचपलनिपुणपिशुनकुतूहलक्षेत्रज्ञाः युवादिषु ब्राह्मणादिषु च पठ्यन्ते । कौशल्यम्—कौशलमित्यादि ।

१७९६ । इगन्ताच्च लघुपूर्वात् । (५-१-१३१)

शुचेर्भावः कर्म वा शौचम् । मौनम् । कथं काव्यम् । कविशब्दस्य ब्राह्मणादित्वात्ष्यञ् ।

१७९७ । योपधाद्गुरूपोत्तमाद्वुञ् । (५-१-१३२)

प्रकृतिभावस्तु न । अभावकर्मणोरिति पर्युदासात् । **समासे त्विति** ॥ अधिको राजा अधिराजः प्रादिसमासः । असे इति पर्युदासाद्यगभावे ब्राह्मणादित्वात् ष्यञि आधिराज्यमिति रूपमित्यर्थः । यक्ष्यञोः स्वरे विशेषः । **प्राणभृज्जाति** ॥ प्राणभृतः—प्राणिनः, तज्जातिवाचिभ्यो वयोविशेषवाचिभ्य उद्गात्रादिभ्यश्च षष्ठ्यन्तेभ्यः भावकर्मणोः अञित्यर्थः । **प्राणभृज्जातीति** ॥ उदाहरणसूचनम् । एवं वयोवचनेति । **हायनान्त** ॥ हायनान्तेभ्यः षष्ठ्यन्तेभ्यः भावकर्मणोः अण् स्यादित्यर्थः । **द्वैहायनमिति** ॥ द्विहायनस्य भावः कर्म वेति विग्रहः । वयोवचनलक्षणस्य अञोऽपवादः । एवं त्रैहायनमपि । **यौवनमिति** ॥ अनिति प्रकृतिभावान्न टिलोपः । **श्रोत्रियस्येति** ॥ वार्तिकमिदम् । श्रोत्रियशब्दात् षष्ठ्यन्तात् भावकर्मणोः अण्, प्रकृतेर्यलोपश्चेत्यर्थः । येति सङ्घातग्रहणम् । **श्रौत्रमिति** ॥ छन्दोऽधीते इत्यर्थे छन्दश्शब्दात् घप्रत्यये तस्य इयादेशे प्रकृतेश्श्रोत्र इत्यादेशे 'यस्येति च' इत्यल्लोपे श्रोत्रियशब्दः । श्रोत्रियस्य भावः कर्म वेत्यर्थे श्रोत्रियशब्दादणि यकाराकारसङ्घातस्य लोपे रेफादिकारस्य 'यस्येति च' इति लोपे श्रौत्रमिति रूपम् । यकारादकारस्य 'यस्येति च' इति लोपे सति यकारमात्रस्यानेन लोपे तु रेफादिकारस्य यण् स्यात् । नच तस्य 'यस्येति च' इति लोपः शङ्क्यः । लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तिरिति न्यायात् । अकारलोपस्य स्थानिवत्त्वेन इकारान्तस्य भत्वाभावाच्च, 'श्रोत्रियस्य यलोपश्च' इत्येके पठन्ति । **इगन्ताच्च** ॥ लघुः पूर्वोऽवयवो यस्येति विग्रहः । पूर्वत्वञ्च इगवधिकमेव गृह्यते, व्याख्यानात् । तथा च लघुपूर्वो य इक् तदन्तात्प्रातिपदिकात् षष्ठ्यन्ताद्भावकर्मणोरण् स्यादित्यर्थः । गुणवचनेत्यादेरपवादः । **कथङ्काव्यमिति** ॥ कविशब्दस्य लघुपूर्वेगन्तत्वात् 'गुणवचन' इति ष्यञम्बाधित्वा अण्प्रसङ्गात् काव्यमिति कथमित्याक्षेपः । समाधत्ते । **कविशब्दस्येति** ॥ ब्राह्मणादित्वादित्यनन्तरं ष्यञि उपपाद्यमिति शेषः । **योपधात्** ॥ योपधात् गुरूपोत्तमात्

रामणीयकम् । आभिधानीयकम् । 'सहायाद्वा' (वा ३०९४) । साहाय्यम्-साहायकम् ।

१७९८ । द्वन्द्वमनोज्ञादिभ्यश्च । (५-१-१३३)

शैष्योपाध्यायिका । मानोज्ञकम् ।

१७९९ । गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु । (५-१-१३४)

अत्याकारोऽधिक्षेपः । तदवेतः ते गोत्रचरणयोर्भावकर्मणी प्राप्तः । अवगतवान्वा । गार्गिकया श्लाघते । गार्ग्यत्वेन विकत्थते इत्यर्थः । गार्गिकया अत्याकुरुते । गार्गिकामवेतः ।

१८०० । होत्राभ्यश्छः । (५-१-१३५)

होत्राशब्दो ऋत्विग्वाची स्त्रीलिङ्गः । बहुवचनाद्विशेषग्रहणम् । अच्छावाकस्य भावः कर्म वा अच्छावाकीयम् । मैत्रावरुणीयम् ।

१८०१ । ब्रह्मणस्त्वः । (५-१-१३६)

प्रातिपदिकात् षष्ठ्यन्ताद्भावकर्मणोर्वुञित्यर्थः । **रामणीयकमिति** ॥ रमणीयशब्दाद्वुञ् । **आभिधानीयकमिति** ॥ अभिधानीयशब्दाद्वुञ् । **सहायाद्वेति** ॥ वुञिति शेषः । पक्षे ब्राह्मणादित्वात् ष्यञ् । इदन्तु वार्तिकं भाष्ये क्वचिन्मृग्यम् । **द्वन्द्वमनोज्ञादिभ्यश्च** ॥ द्वन्द्वात् मनोज्ञादिभ्यश्च षष्ठ्यन्तेभ्यः वुञित्यर्थः । **शैष्योपाध्यायिकेति** ॥ शिष्यश्च उपाध्यायश्चेति द्वन्द्वाद्वुञ् । स्त्रीत्वं लोकात् । यद्यपि 'योपधात्' इत्येवं सिध्यति । तथापि गोपालपशुपालिकेत्युदाहरणं बोध्यम् । **गोत्रचरणात्** ॥ गोत्रप्रत्ययान्तात् शाखाध्येतृवाचिनश्च षष्ठ्यन्ताद्भावकर्मणोर्वुञ् स्यात् श्लाघादिषु विषयेष्वित्यर्थः । अपत्याधिकारादन्यत्र प्रवराध्यायप्रसिद्धङ्गोत्रमित्युक्तम् । अत्याकार इत्यस्य विवरणम् । **अधिक्षेप इति** ॥ तदवेत इत्येतद्विवृणोति । **ते गोत्रेति** ॥ तच्छब्देन गोत्रचरणयोः भावकर्मणी विवक्षिते । अवपूर्वादिणः प्राप्त्यर्थात् ज्ञानार्थाद्वा कर्तरि क्तः । ते अवेतस्तदवेत इति विग्रहः । 'द्वितीया' इति योगविभागात् समासः । **अवगतवान्वेति** ॥ ज्ञातवानित्यर्थः । **गार्गिकयेति** ॥ गार्ग्यशब्दाद्वुञि 'आपत्यस्य' इति यलोपे 'यस्येति च' इत्यकारलोपे लोकात् स्त्रीत्वे टापि 'प्रत्ययस्थात्' इति इत्त्वे गार्गिकाशब्दः । काठिकया श्लाघते इति चरणादुदाहार्यम् । अत्र श्लाघादयः पदान्तरोपात्ता एव प्रत्ययार्थान्वयिनः नतु प्रत्ययवाच्या इति बोध्यम् । **होत्राभ्यश्छः** ॥ **ऋत्विग्वाचीति** ॥ याज्ञिकप्रसिद्धेरिति भावः । ऋत्विग्विशेषवाचिभ्यः षष्ठ्यन्तेभ्यः छः स्याद्भावकर्मणोरित्यर्थः । **अच्छावाकीयमिति** ॥ 'आ च त्वात्' इति त्वतलोरपि सर्वत्र समावेशो बोध्यः । **ब्रह्मणस्त्वः** ॥ होत्राभ्यः

होत्रावाचिनो ब्रह्मन्शब्दात्त्वः स्यात् । छस्यापवादः । ब्रह्मत्वम् । नेति वाच्ये त्ववचनं तलो बाधनार्थम् । ब्राह्मणपर्यायाद्ब्रह्मन्शब्दात्तु त्वतलौ । ब्रह्मत्वम्—ब्रह्मता ।

इति तद्धितेनञ्स्नञधिकारप्रकरणम् ।

अथ तद्धिते पाञ्चमिकप्रकरणम् ।

१८०२ । धान्यानां भवने क्षेत्रे खञ् । (५-२-१)

भवन्त्यस्मिन्निति भवनम् । मुद्गानां भवनं क्षेत्रं मौद्गीनम् ।

१८०३ । व्रीहिशाल्योर्ढक् । (५-२-२)

व्रैहेयम् । शालेयम् ।

१८०४ । यवयवकषष्टिकाद्यत् । (५-२-३)

इत्यनुवृत्तमेकवचनेन विपरिणम्यते । तदाह । **होत्रावाचिन इति** ॥ ऋत्विग्वाचिन इत्यर्थः । ननु ब्रह्मणो नेत्येवास्तु । ब्रह्मणश्छो न इत्यर्थलाभे सति छे निषिद्धे 'आ च त्वात्' इत्यधिकारात् 'होत्राभ्यः छः' इत्येव भावकर्मणोस्त्वप्रत्ययः सिध्यतीत्यत आह । **नेति वाच्ये इति** ॥ **तलो बाधनार्थमिति** ॥ अधिकारवशाद्धोत्राभ्य इति भावकर्मणोः प्राप्तस्य तलो निवृत्त्यर्थमित्यर्थः । एतेन 'तस्य भावस्त्वतलौ' इत्यनेन ब्रह्मणः कर्मणि त्वस्याप्राप्तेस्तदर्थं त्वप्रत्ययविधानमिति न शङ्क्यम् । नापि ब्रह्मणो नेत्युक्ते पूर्वसूत्रविहितानां त्वतल्छानां निषेधः स्यादित्यपि शङ्क्यम् । शब्दोपात्तस्य छस्यैव निषेधात् । अत्र होत्राग्रहणानुवृत्तेः प्रयोजनमाह । **ब्राह्मणपर्यायादिति** ॥

इति तद्धिते नञ्स्नञोरधिकारः ।

अथ पाञ्चमिका निरूप्यन्ते—**धान्यानां भवने** ॥ धान्यवाचिभ्यः षष्ठ्यन्तेभ्यः भवने क्षेत्रेऽर्थे खञित्यर्थः । भवनशब्दस्य भावल्युडन्तत्वे क्षेत्रशब्दसामानाधिकरण्यानुपपत्तेराह । **भवन्त्यस्मिन्निति भवनमिति** ॥ भूधातुरुत्पत्तिवाची । उत्पत्तिस्थानं भवनमिति लभ्यते । धान्योत्पत्तिस्थान क्षेत्रम् । 'केदारः क्षेत्रम्' इत्यमरः । क्षेत्रशब्दाभावे भूधातोः सत्तावाचित्वमाश्रित्य यत्र विद्यते तद्भवनमिति व्युत्पत्त्या आधारसामान्यं गृहकुसूलादि लभ्येत । अतः क्षेत्रपदम् । भवनपदाभावे तु क्षेत्रशब्देन सेतुबन्धकाश्यादिपुण्यप्रदेशोऽपि लभ्येत । अतो भवनपदम् । उभयोपादाने तु धान्योत्पत्तिप्रदेश एव लभ्यते इति न पौनरुक्त्यम् । **व्रीहिशाल्योर्ढक्** ॥ व्रीहिशब्दात् शालिशब्दाच्च षष्ठ्यन्ताद्भवने क्षेत्रेऽर्थे ढगित्यर्थः । खञोऽपवादः । **यवयवक** ॥ यव, यवक, षष्टिक, एभ्यः षष्ठ्यन्तेभ्यो भवने क्षेत्रे

यवानां भवनं क्षेत्रं यव्यम् । यवक्यम् । षष्टिक्यम् ।

१८०५ । विभाषा तिलमाषोमाभङ्गाणुभ्यः । (५-२-४)

यद्वा स्यात् । पक्षे खञ् । तिल्यम्—तैलीनम् । माष्यम्—माषीणम् । उम्यम्—औमीनम् । भङ्ग्यम्—भाङ्गीनम् । अणव्यम्—आणवीनम् ।

१८०६ । सर्वचर्मणः कृतः खखञौ । (५-२-५)

असामर्थ्येऽपि निपातनात्समासः । सर्वश्चर्मणा कृतः सर्वचर्मीणः—सार्वचर्मीणः ।

१८०७ । यथामुखसम्मुखस्य दर्शनः खः । (५-२-६)

मुखस्य सदृशं यथामुखं प्रतिबिम्बम् । निपातनात्सादृश्येऽव्ययीभावः । समं सर्वं मुखं सम्मुखम् । समशब्दस्यान्तलोपो निपात्यते । यथामुखं दर्शनो यथामुखीनः । सर्वस्य मुखस्य दर्शनः सम्मुखीनः ।

१८०८ । तत्सर्वादेः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति । (५-२-७)

यत्स्यादित्यर्थः । खञोऽपवादः । धान्यानामित्यनुवृत्तेरिहापि षष्ठ्येव समर्थविभक्तिः । **विभाषा-तिल** ॥ तिल, माष, उमा, भङ्ग, अणु, एभ्यो धान्यविशेषवाचिभ्यः षष्ठ्यन्तेभ्यो यद्वा स्यादित्यर्थः । "उमाभङ्गौ धान्यविशेषौ" इति भाष्यम् । "उमा स्यादतसी क्षुमा" इत्यमरः । **अणव्यमिति** ॥ अणुर्धान्यविशेषः । यति 'ओर्गुणः' 'वान्तो यि' इत्यवादेशः । **सर्वचर्मणः** ॥ सर्वचर्मन्शब्दात्तृतीयान्तात् चर्मणा सर्वङ्कृत इत्यर्थे खखञौ स्त इत्यर्थः । औचित्यादिह तृतीया समर्थविभक्तिः । नन्विह सर्वशब्दस्य कृते अन्वयात् चर्मण्यन्वयाभावादसामर्थ्याच्चर्मणा-समासासम्भवात् कथं सर्वचर्मन्शब्दात्प्रत्यय इत्यत आह । **असामर्थ्येऽपीति** ॥ सर्वश्चर्मणा कृत इति विग्रहवाक्यम् । चर्मणा कृत्स्नः कृत इत्यर्थः । **सर्वचर्मीण इति** ॥ 'नस्तद्धिते' इति टिलोपः । सर्वेण चर्मणा कृत इत्यर्थे तु न खखञौ । व्याख्यानात् । **यथामुख** ॥ यथामुख सम्मुख आभ्यां षष्ठ्यन्ताभ्यां दर्शनः इत्यर्थे खः स्यादित्यर्थः । दृश्यन्तेऽस्मिन्निति दर्शनः आदर्शादिः । ननु मुखस्य सदृश यथामुखमिति कथमव्ययीभावः । 'यथाऽसादृश्ये' इति सादृश्ये तन्निषेधादित्यत आह । **निपातनादिति** ॥ सम्मुखशब्दे आभिमुख्यार्थकस्य समित्युपसर्गस्य न प्रवेशः, किन्तु समशब्दस्य, सर्वपर्यायस्येत्याह । **समं सर्वं मुखं सम्मुखमिति** ॥ सममित्यस्य विवरणं सर्वमिति । समं च तन्मुखञ्चेति कर्मधारये सम्मुखशब्द इत्यर्थः । **निपात्यत इति** ॥ इदञ्च भाष्ये स्पष्टम् । एवञ्च समित्युपसर्गपूर्वादयम्प्रत्ययो नेष्यते इति भावः । **तत्सर्वादेः** ॥ पथिन्, अङ्ग, कर्मन्, पत्र, पात्र, एषां समाहारद्वन्द्वात् पञ्चम्यर्थे द्वितीया । प्रातिपदिकविशेषणत्वात्तदन्तविधिः । ग्रहणवता प्रातिपदिकेन तदन्तविधि-र्नास्तीति निषेधस्तु न । केवलानामेषां सर्वादित्वस्यासम्भवात् । तदिति तु द्वितीयान्तं

सर्वादेः पथ्याद्यन्ताद्द्वितीयान्तात्खः स्यात् । सर्वपथान्व्याप्नोति सर्वपथीनः । सर्वाङ्गीणः । सर्वकर्मीणः । सर्वपत्त्रीणः । सर्वपात्रीणः ।

१८०९ । आप्रपदं प्राप्नोति । (५-२-८)

पादस्याग्रं प्रपदं, तन्मर्यादीकृत्य आप्रपदम्, आप्रपदीनः पटः ।

१८१० । अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु । (५-२-९)

अनुरायामे सादृश्ये वा । अनुपदं बद्धा अनुपदीना उपानत् । सर्वान्नानि भक्षयति सर्वान्नीनो भिक्षुः । अयानयः स्थलविशेषः । तं नेयः अयानयीनः शारः ।

१८११ । परोवरपरम्परपुत्रपौत्रमनुभवति । (५-२-१०)

परांश्चावरांश्चानुभवतीति परोवरीणः । अवरस्योत्त्वं निपात्यते । परांश्च परतरांश्चानुभवति परम्परीणः । प्रकृतेः परंपरभावो निपात्यते । पुत्रपौत्रान्

व्याप्नोतीत्यत्रान्वेति । ततश्च तद्व्याप्नोतीत्यर्थे सर्वशब्दपूर्वपदकेभ्यः पथ्यङ्गकर्मपत्त्रपात्रान्तेभ्यः प्रातिपदिकेभ्यो द्वितीयान्तेभ्यः खः स्यादित्यर्थः फलति । तदाह । **सर्वादेरित्यादिना** ॥ **सर्वपथानिति** ॥ 'ऋक्पूः' इति समासान्तः । **आप्रपदम्** ॥ आप्रपदमित्यव्ययीभावात् द्वितीयान्तात्प्राप्नोतीत्यर्थे खः स्यादित्यर्थः । **पदस्याग्रं प्रपदमिति** ॥ "पादाग्रं प्रपदम्" इत्यमरः । **आप्रपदमिति** ॥ 'आङ्मर्यादाभिविध्योः' इत्यव्ययीभावः । **अनुपद** ॥ अनुपद, सर्वान्न, अयानय एषां समाहारद्वन्द्वात् द्वितीया । बद्धा भक्षयति नेय एषां द्वन्द्वात् सप्तमी । तिङन्तस्य द्वन्द्वानुप्रवेश आर्षः । अनुपदादिभ्यो द्वितीयान्तेभ्यः क्रमाद्बद्धादिष्वर्थेषु खः स्यादित्यर्थः । **अनुरायामे सादृश्ये वेति** ॥ आद्ये 'यस्य चायामः' इत्यव्ययीभावः । द्वितीये सादृश्ये अव्ययीभावः । **अनुपदं बद्धेति** ॥ क्रियाविशेषणत्वाद्द्वितीया । **अनुपदीना उपानदिति** ॥ पदसम्बन्धि दैर्घ्यसदृशदैर्घ्योपलक्षितेत्यर्थः । पदेन सदृशीति वा । तत्तुल्यपरिमाणेति यावत् । **अयानयः इति** ॥ द्यूते शाराणां प्रदक्षिणपरिवर्तनं अयः । प्रसव्यपरिवर्तनं अनयः । अयसहितः अनयः अयानयः । प्रदक्षिणप्रसव्यगामिनां यस्मिन् युग्मादिपदे स्थितानां परकीयैः शारैरनाक्रमणं तत्स्थानमिह अयानयशब्देन लक्षणयोच्यते इत्यर्थः । एतत्सर्वं भाष्ये स्पष्टम् । 'ससहायस्य शारस्य परैर्नाक्रम्यते पदम् । असहायस्तु शारेण परकीयेण बाध्यते ॥' इति द्यूतशास्त्रमर्यादा । विस्तरस्तु कैयटमनोरमादावनुसन्धेयः । **तन्नेय इति** ॥ तं स्थानविशेषमयानयाख्यं प्रापणीय इत्यर्थः । णीञ् द्विकर्मकः प्रधाने कर्मणि यत् । 'अप्रधाने द्वितीया' इति भावकर्मलकारप्रक्रियायां वक्ष्यते । **परोवर** ॥ परोवर, परम्पर, पुत्रपौत्र, एभ्यो द्वितीयान्तेभ्यः अनुभवतीत्यर्थे खः स्यादित्यर्थः । **परोवरीण इति** ॥ परे च अवरे च परावरे ।ताननुभवतीत्यर्थः । **अवरस्योत्त्वमिति** ॥ अवरशब्दस्य आदेरकारस्य खप्रत्ययसान्नियोगेन उत्त्वं निपात्यते

अनुभवति पुत्रपौत्रीणः। परम्पराशब्दस्तु अव्युत्पन्नं शब्दान्तरं स्त्रीलिङ्गम्। तस्मादेव स्वार्थे ष्यञि पारम्पर्यम्। कथं पारोवर्यवदिति। असाधुरेव। खप्रत्ययसंनियोगेनैव परोवरेति निपातनात्।

१८१२। अवारपारात्यन्तानुकामं गामी। (५-२-११)

अवारपारं गामी अवारपारीणः—अवारीणः—पारीणः—पारावारीणः। अत्यन्तं गामी अत्यन्तीनः। भृशं गन्तेत्यर्थः। अनुकामं गामी अनुकामीनः। यथेष्टं गन्ता।

१८१३। समां समां विजायते। (५-२-१२)

यलोपोऽवशिष्टविभक्तेरलुक्च पूर्वपदे निपात्यते। समांसमीना गौः।

इत्यर्थः। एवञ्च विग्रहवाक्ये इदमुत्त्वन्न भवति। **प्रकृतेरिति**॥ परपरतरशब्दात् द्वन्द्वात्खे सति तत्सन्नियोगेन प्रकृतेः परम्परभावो निपात्यते इत्यर्थः। नन्वेवं सति कल्याणपरम्परेत्यादौ कथं परम्पराशब्दः। परम्पराभावस्य खप्रत्ययसन्नियोगशिष्टत्वादित्यत आह। **परम्परा-शब्दस्त्विति**॥ **तस्मादेवेति**॥ परम्परेत्यव्युत्पन्नप्रातिपदिकादेवेत्यर्थः। **कथमिति**॥ परावरशब्दात् भावे वा स्वार्थे वा ष्यञि अवरस्यादेरुत्त्वे परोवर्यशब्दात् मतुपि परोवर्यवदिति कथमित्याक्षेपः। उत्त्वस्य खप्रत्ययसन्नियोगशिष्टत्वादिति भावः। उत्त्वन्दुरुपपादमेवेत्याह। **असाधुरेवेति**॥ नन्वत्र परोवरेति निर्देशात् खादन्यत्राव्युत्पन्नत्वं किन्न स्यादित्यत आह। **खप्रत्ययसन्नियोगेनैवेति**॥ अत एव भाष्ये "परांश्चावरांश्चानुभवति" इत्येव विग्रहो दर्शित इति भावः। **अवारपार**॥ अवारपार, अत्यन्त, अनुकाम, एभ्य. गामीत्यर्थे खः स्यादित्यर्थः। गामीत्यस्य अवश्यं गमिष्यन्नित्यर्थः। 'आवश्यकाधमर्ण्ययोर्णिनि.' इति णिनिः। 'भविष्यति गम्यादयः' इति भविष्यत्कालता। 'बहुळमाभीक्ष्ण्ये' इति वा णिनिः। **अवारपारीण इति**॥ अवारपारङ्गामीति विग्रहः। अवारपारशब्दाद्विगृहीतादपि। व्याख्यानात्। तदाह। **अवारीणः, पारीणः इति**॥ **अत्यन्तीन इति**॥ अत्यन्तशब्दोऽत्र भृशवाची। तदाह। **भृशङ्गन्तेति**॥ **अनुकाममिति**॥ कामः इच्छा। तामनतिक्रम्येत्यर्थः। पदार्थानतिवृत्तावव्ययीभावः। **समां समाम्**॥ विपूर्वो जनिर्गर्भविमोचने वर्तते। विजायते गर्भम्। विमुञ्चतीत्यर्थः। धात्वर्थेनोपसङ्ग्रहादकर्मकः। अतो न कर्मणि द्वितीया। गर्भविमोचनेन कृत्स्नायाः समाया अव्यापनादत्यन्तसंयोगलक्षणा द्वितीयापि न भवति। किन्तु सप्तम्येव। तत्र सप्तम्यन्तस्य समायामित्यस्य 'नित्यवीप्सयोः' इति द्विर्वचने समायां समायामिति भवितव्यम्। तत्र पदद्वयमपि यकारलोपसहितं निर्दिश्यते समां समामिति। समायां समायामित्यर्थः। एवञ्च समायां समायां विजायते इत्यर्थे सप्तम्यन्तद्वयसमुदायात् विजायते इत्यर्थे खः स्यादिति फलितम्। ननु सप्तम्यन्तद्वयसमुदायात् खप्रत्ययोत्पत्तौ तदन्तस्य समुदायस्य प्रातिपदिकत्वात् तदवयवयोः सप्तम्योर्लुकि समासमीनः इति स्यात्। इष्यते तु समांसमीनेति। तत्राह। **यलोप इति**॥ पूर्वपदे

'समांसमीना सा यैव प्रतिवर्षं प्रसूयते' इत्यमरः। 'खप्रत्ययानुत्पत्तौ यलोपो वा वक्तव्यः' (वा ३१००)। समां समां विजायते। समायां समायां वा।

१८१४। अद्यश्वीनावष्टब्धे। (५-२-१३)

अद्य श्वो वा विजायते अद्यश्वीना बडवा। आसन्नप्रसवेत्यर्थः। केचित्तु विजायते इति नानुवर्तयन्ति। अद्यश्वीनं मरणम्। आसन्नमित्यर्थः।

१८१५। आगवीनः। (५-२-१४)

आङ्पूर्वाद्गोः कर्मकरे खप्रत्ययो निपात्यते। गोः प्रत्यर्पणपर्यन्तं यः कर्म करोति स आगवीनः।

१८१६। अनुग्वलङ्गामी। (५-२-१५)

अनुगु गोः पश्चात्पर्याप्तं गच्छति अनुगवीनो गोपालः।

१८१७। अध्वनो यत्खौ। (५-२-१६)

विभक्तेरवयवस्य यकारस्य लोपः। अवशिष्टस्य विभक्त्यंशस्य अलुक्च निपात्यते इत्यर्थः। भाष्ये तु "यलोपनिपातनादवशिष्टविभक्त्यंशस्य न लुक्" इत्युक्तम्। ननु समां समामिति निर्देशात् उत्तरपदेऽपि यकारलोपः अवशिष्टविभक्त्यंशस्य अलुक् च स्यादित्यत आह। **पूर्वपदे इति**॥ 'पूर्वपदस्य यलोपवचनम्' इति वार्तिकादिति भावः। **खप्रत्यया-नुत्पत्ताविति**॥ पदद्वयेऽपीति शेषः। इह विभाषया कदाचित् खप्रत्ययाभावे सति समायां समायां विजायते इति वाक्यदशाया सप्तम्यन्तद्वये यकारलोपो वा वक्तव्य इत्यर्थः। तत्र पदद्वयेऽपि निपातनादेव यकारलोपः सिद्धः। सूत्रे उभयत्रापि तथोच्चारणात्। विकल्प एव तु यलोपस्य वाक्यदशायां वाचनिक इति बोध्यम्। एतत्सर्वं भाष्ये स्पष्टम्। **अद्यश्वीना-वष्टब्धे**॥ अद्यश्वीनेत्यविभक्तिको निर्देशः। अवष्टब्धम्, आसन्नम् 'अवाच्चालम्बनाविदूर्ययोः' इत्याविदूर्ये स्तम्भेः षत्वविधानात् अद्य श्वो वा विजायते इत्यर्थे अद्यश्वस् इति समुदायात्खः स्यादासन्नत्वे गम्ये इत्यर्थः। **अद्यश्वीना बडबेति**॥ अद्य वा श्वो वेति वार्थे निपातनात्समासः। खे सति 'अव्ययानाम्भमात्रे' इति टिलोपः। सूत्रे अद्यश्वीनेति टाबन्तनिर्देशे तु अद्यश्वीनो गोसमूहः, अद्यश्वीनङ्गोमण्डलमिति न स्यात्। **आगवीनः**॥ **कर्मकरे इति**॥ वार्त्तिकलभ्य-मिदम्। भृतिङ्गृहीत्वा यः कर्म करोति स कर्मकरः। अत्र गोपालो विवक्षितः। स हि प्रातर्गा-ङ्गृहीत्वा आसायञ्चारयित्वा स्वामिनो गृहं नीत्वा प्रत्यर्पयति। तदाह। **गोः प्रत्यर्पणेति। आगवीन इति**॥ गोशब्दो गोप्रत्यर्पणे लाक्षणिकः। 'आङ्मर्यादाभिविध्योः' इत्यव्ययीभावे 'गोस्त्रियोः' इति ह्रस्वत्वे आगुशब्दात् खे 'ओर्गुणः' इति भावः। **अनुग्वलङ्गामी**॥ अनुगु इत्यविभक्तिको निर्देशः। गोः पश्चादिति विग्रहे पश्चादर्थे अनोरव्ययीभावे ह्रस्वत्वे अनुशब्दः। तस्मात् अलङ्गामीत्यर्थे खः स्यादित्यर्थः। अत्र अनुगु इत्यस्य क्रियाविशेषणत्वात् द्वितीयैव

अध्वानमलं गच्छति अध्वन्यः—अध्वनीनः । 'ये चाभावकर्मणोः' (सू ११५४) 'आत्माध्वानौ खे' (सू १२७१) इति सूत्राभ्यां प्रकृतिभावः ।

१८१८ । अभ्यमित्राच्छ च । (५-२-१७)

चाद्यत्खौ । अभ्यमित्रीयः—अभ्यमित्र्यः—अभ्यमित्रीणः । अमित्राभिमुखं सुष्ठु गच्छतीत्यर्थः ।

१८१९ । गोष्ठात्खञ्भूतपूर्वे । (५-२-१८)

गोष्ठो भूतपूर्वः गौष्ठीनो देशः ।

१८२० । अश्वस्यैकाहगमः । (५-२-१९)

एकाहेन गम्यते इत्यैकाहगमः आश्वीनोऽध्वा ।

१८२१ । शालीनकौपीने अधृष्टाकार्ययोः । (५-२-२०)

शालाप्रवेशमर्हति शालीनोऽधृष्टः । कूपपतनमर्हति कौपीनं पापम् । तत्साधनत्वात्तद्वद्गोप्यत्वात्पुरुषलिङ्गमपि, तत्सम्बन्धात्तदाच्छादनमपि ।

समर्थविभक्तिरिति हरदत्तः । कृद्योगषष्ठीत्यन्ये। अलङ्गामीत्यत्र अलंशब्दस्य विवरणं पर्याप्तमिति क्रियाविशेषणम् । **अध्वनो यत्खौ** ॥ अध्वन्शब्दात् अलङ्गामीत्यर्थे यत्खौ स्त इत्यर्थः । **अध्वानमलङ्गच्छतीति** ॥ अलङ्गामीत्यनेन विग्रहे तु अध्वनोऽलङ्गामीत्येव विग्रहः । **अभ्यमित्राच्छ च** ॥ अमित्रः शत्रुः । तमभिमुखो भूत्वेत्यर्थे 'लक्षणेनाभिप्रती आभिमुख्ये' इत्यव्ययीभावे अभ्यमित्रशब्दः । तस्मात् अलङ्गामीत्यर्थे छप्रत्ययः स्यादित्यर्थः । **गोष्ठात्खञ्** ॥ भूतपूर्व इति प्रकृतिविशेषणम् । भूतपूर्ववृत्तेर्गोष्ठशब्दात्स्वार्थे खः स्यादिति वृत्तिकृतः । **अश्वस्यैकाहगमः** ॥ अश्वशब्दात् षष्ठ्यन्तात् एकाहगम इत्यर्थे खञ् स्यादित्यर्थः । एकाहगमशब्दं व्युत्पादयति । **एकाहेनेति** ॥ अस्मादेव निपातनात्कर्मणि गमेरबिति भावः । 'कर्तृकरणे कृता' इति समासः । अश्वस्येति कर्तरि षष्ठी । **आश्वीनोऽध्वेति** ॥ अश्वेन कर्त्रा एकाहेन गन्तुं शक्य इत्यर्थः । **शालीन** ॥ "शालाप्रवेशमर्हत्यधृष्ट इति कूपावतरणमर्हत्यकार्यमिति चार्थे शालाप्रवेशशब्दात्कूपावतरणशब्दाच्च खञ् । प्रवेशशब्दस्य अवतरणशब्दस्य चोत्तरपदस्य लोपे शालीनकौपीनशब्दौ निपात्येते" इति भाष्यम् । **अधृष्ट इति** ॥ अप्रगल्भ इत्यर्थः । अप्रागल्भ्यादन्यत्र गन्तुमशक्तः शालाप्रवेशमेवार्हति यः सः शालीन इति यावत् । **कूपपतनमिति** ॥ कूपावतरणशब्दस्य विवरणमिदम् । कूपशब्दो नरकाभिधायी । **कौपीनं पापमिति** ॥ नरकपतनसाधनमकार्यम्पापमित्यर्थः । अनयोरर्थयोरेतौ रूढौ । ननु पुरुषलिङ्गे कथङ्कौपीनशब्दः इत्यत आह । **तत्साधनत्वादिति** ॥ पापसाधनत्वाद्वा, पापवदाच्छादनीयत्वाद्वा, पुरुषलिङ्गे कौपीनशब्दो लाक्षणिक इत्यर्थः । **तत्सम्बन्धादिति** ॥ कौपीनशब्दस्य लक्ष्यपुरुषलिङ्गसम्बन्धात्

१८२२ । व्रातेन जीवति । (५-२-२१)

व्रातेन शरीरायासेन जीवति न तु बुद्धिवैभवेन स व्रातीनः ।

१८२३ । सातपदीनं सख्यम् । (५-२-२२)

सप्तभिः पदैरवाप्यते साप्तपदीनम् ।

१८२४ । हैयङ्गवीनं संज्ञायाम् । (५-२-२३)

ह्यो गोदोहस्य हियङ्गुरादेशो विकारार्थे खञ्च निपात्यते । दुह्यत इति दोहः क्षीरम् । ह्यो गोदोहस्य विकारो हैयङ्गवीनम् । नवनीतम् ।

१८२५ । तस्य पाकमूले पीत्वादिकर्णादिभ्यः कुणब्जाहचौ । (५-२-२४)

पीलूनां पाकः पीलुकुणः । कर्णस्य मूलं कर्णजाहम् ।

१८२६ । पक्षात्तिः (५-२-२५)

मूलग्रहणमात्रमनुवर्तते । पक्षस्य मूलं पक्षतिः ।

तदाच्छादनवस्त्रखण्डे कौपीनशब्दो लक्षितलक्षणया प्रयुज्यते इत्यर्थः । **व्रातेन जीवति ॥** व्रातशब्दात्तृतीयान्तात् जीवतीत्यर्थे खञ् स्यादित्यर्थः । "नानाजातीयानाम् अलब्धजीवनद्रव्याणा-म्भारवहनादिकष्टकर्मजीवानां सङ्घो व्रातः । तस्य यज्जीवनार्थङ्कष्टङ्कर्म तदिह व्रातम्" इति भाष्यम् । तादृशसङ्घवाचिनो व्रातशब्दात् 'तस्येदम्' इत्यणि व्रातशब्दोऽत्र तदीयकर्मणि विवक्षित इति तदाशयः । तदाह । **शरीरायासेनेति ॥ साप्तपदीनम् ॥** सप्तपदशब्दात् तृतीयान्तादवाप्यं सख्यमित्यर्थे खञि साप्तपदीनमिति भवतीत्यर्थः । **सप्तभिः पदैरिति ॥** पदविक्षेपैरित्यर्थः । **हैयङ्गवीनम् ॥** "ह्यस् इत्यव्ययम्पूर्वेद्युरित्यर्थे तत्रोत्पन्नो गोदोहः गोपयः ह्यो गोदोहः । तस्मात् षष्ठ्यन्तात् विकारेऽर्थे खञि ईनादेशे प्रकृतेः हियङ्गु इत्यादेशे ओर्गुणे अवादेशे आदिवृद्धौ हैयङ्गवीनमिति भवति संज्ञायाम्" इति भाष्यम् । तदाह । **ह्यो गोदोहस्येत्यादिना ॥ नवनीतमिति ॥** भाष्ये तु "हैयङ्गवीनं घृतम्" इति दृश्यते । "तत्तु हैयङ्गवीनं स्यात् ह्यो गोदोहोद्भवं घृतम्" इत्यमरः । **तस्य पाकमूले ॥** पाकमूले इति समाहारद्वन्द्वात्सप्तमी । पाकः परिणामः । षष्ठ्यन्तेभ्यः पील्वादिभ्यः पाकेऽर्थे कुणप् । कर्णादिभ्यस्तु मूलेऽर्थे जाहजित्यर्थः । कुणपस्ताद्धितत्वात् ककारस्य नेत्संज्ञा । जाहचस्तु जकारस्य प्रयोजनाभावात् नेत्संज्ञा । **पक्षात्तिः ॥ मूलग्रहणमात्रमिति ॥** पूर्वसूत्रे पाकमूल इति समासनिर्दिष्टत्वेऽप्येकदेशे स्वरितत्वप्रतिज्ञानादिति भावः । तस्येत्यप्यनुवर्तते । पक्षशब्दात् षष्ठ्यन्तात् मूलेऽर्थे तिप्रत्ययः

❀१८२७ । तेन वित्तश्चुञ्चुप्चणपौ । (५-२-२६)

यकारः प्रत्यययोरादौ लुप्तनिर्दिष्टः,तेन चस्य नेत्संज्ञा । विद्यया वित्तो विद्याचुञ्चुः । विद्याचणः ।

१८२८ । विनञ्भ्यां नानाञौ न सह । (५-२-२७)

असहार्थे पृथग्भावे वर्तमानाभ्यां स्वार्थे प्रत्ययौ । विना, नाना ।

१८२९ । वेः शालच्छङ्कटचौ । (५-२-२८)

क्रियाविशिष्टसाधनवाचकात्स्वार्थे । विस्तृतम् । विशालम् । विशङ्कटम् ।

१८३० । संप्रोदश्च कटच् । (५-२-२९)

सङ्कटम् । प्रकटम् । उत्कटम् । 'अलाबूतिलोमाभङ्गाभ्यो रजस्युपसङ्ख्यानम्' (वा ३१०७) । अलाबूनां रजः अलाबूकटम् । 'गोष्ठजादयः स्थानादिषु पशुनामभ्यः' (वा ३१०९) । गवां स्थानं गोगोष्ठम् । 'सङ्घाते कटच्' (वा ३११०) । अवीनां सङ्घातः अविकटः । 'विस्तारे पटच्' (वा

स्यादित्यर्थः । **तेन वित्तः** ॥ तृतीयान्तात् वित्त इत्यर्थे चुञ्चुप्चणपौ भवत इत्यर्थः । वित्तः प्रसिद्धः । **चस्य नेत्संज्ञेति** ॥ उपदेशे आदित्वाभावादिति भावः । **विनञ्भ्याम्** ॥ नसहेति सङ्घातः पृथक्त्वे वर्तते । प्रकृतिविशेषणमिदम् । तदाह । **असहार्थे इति** ॥ तस्य विवरणं **पृथग्भावे इति** ॥ वर्तमानाभ्यामित्यनन्तरं विनञ्भ्यामिति शेषः । **स्वार्थ इति** ॥ प्रत्ययार्थस्य अनिर्देशादिति भावः । **प्रत्ययाविति** ॥ यथासङ्ख्य नानाञाविति शेषः । **विनेति** ॥ वेर्नाप्रत्यये रूपम् । पृथगित्यर्थः । **नानेति** ॥ नञो नाञि आदिवृद्धौ रूपम् । पृथगित्यर्थः । नसहेत्यस्य प्रत्ययार्थत्वे तु नानेत्यनेन न सहेति गम्येत । एवं सति ननसह, किन्तु सहैवेत्यर्थः स्यात् । "द्वौ नञौ प्रकृतमर्थङ्गमयतः" इति न्यायात् इति भाष्ये स्पष्टम् । **वेः शालच्छङ्कटचौ** ॥ **क्रियाविशिष्टेति** ॥ क्रियाविशिष्टकारकवाचकात्स्वार्थे शालच्कटच्प्रत्ययौ स्त इति यावत् । इदञ्च भाष्ये स्पष्टम् । **सम्प्रोदश्च कटच्** ॥ सं, प्र, उत्, एभ्यश्च क्रियाविशिष्टसाधनवाचिभ्यः स्वार्थे कटच् स्यादित्यर्थः । चाद्वेरपि ॥ सङ्कटं संहतमित्यर्थः । निबिडीकृतमिति यावत् । **प्रकटमिति** ॥ प्रज्ञातमित्यर्थः । प्रकाशमिति यावत् । **उत्कटमिति** ॥ उन्नतमित्यर्थः । अधिकमिति यावत् । रूढशब्दा एते कथञ्चिद्व्युत्पाद्याः । **अलाबूतिलेति** ॥ अलाबू, तिल, उमा, भङ्गा, इत्येभ्यः षष्ठ्यन्तेभ्यो रजसि अभिधेये कटचः उपसङ्ख्यानमित्यर्थः । विकारप्रत्ययानामपवादोऽयम् । रजः चूर्णरेणुः । **गोष्ठजादय इति** ॥ पशुनामभ्यः स्थानादिष्वर्थेषु गोष्ठजादयः प्रत्यया

* उकारद्वयवान्—इति मनोरमा ।

३११५)। अविपटः। 'द्वित्वे गोयुगच्'। (वा ३११६)। द्वौ वृषौ वृषगोयुगम्। 'षड्त्वे षड्गवच्' (वा ३११७) अश्वषड्गवम्। 'स्नेहे तैलच्' (वा ३११८)। तिलतैलम्। सर्षपतैलम्। 'भवने क्षेत्रे शाकटशाकिनौ' (वा ३११९)। इक्षुशाकटम्। इक्षुशाकिनम्।

१८३१। अवात्कुटारच्च। (५-२-३०)

चात्कटच्। अवाचीनोऽवकुटारः। अवकटः।

१८३२। नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः। (५-२-३१)

'अवात्' इत्येव। नतं नमनम्। नासिकाया नतं अवटीटम्। अवनाटम्। अवभ्रटम्। तद्योगान्नासिका अवटीटा। पुरुषोऽप्यवटीटः।

१८३३। नेर्बिडज्बिरीसचौ। (५-२-३२)

निबिडम्। निबिरीसम्।

१८३४। इनच्पिटच्चिकचि च। (५-२-३३)

'नेः' इत्येव। नासिकाया नतेऽभिधेये इनच्पिटचौ प्रत्ययौ प्रकृतेश्चिक चि इत्यादेशौ च। 'कप्रत्ययचिकादेशौ च वक्तव्यौ' (वा ३१२१)।

वक्तव्या इत्यर्थः। गोष्ठजादीनां प्रत्ययानां स्थानादीनाञ्चार्थानां प्रपञ्चपराणि 'सङ्घाते कटच्' इत्यादीनि शाकटशाकिनावित्यन्तानि षड्वार्तिकानि। तेषु पशुनामभ्य इत्यनुवर्तते। अप्रसृतावयवः सङ्घातः। प्रसृतावयवस्तु विस्तारः। **द्वित्व इति** ॥ प्रकृत्यर्थगतद्वित्व इत्यर्थः। **द्वौ वृषौ वृषगोयुगमिति** ॥ द्व्यवयवकसङ्घाताभिप्रायमेकवचनम्। द्वयं युगममित्यादिवत्। केचित्तु द्वौ वृषावित्यर्थे वृषगोयुगमिति स्वभावादेकवचनं विंशतिरित्यादिवदित्याहुः। एवमुष्ट्रगोयुगम्। अश्वषड्गवम्। **अवात्कुटारच्च** ॥ क्रियाविशिष्टसाधनवाचकादवात्स्वार्थे कुटारच्च स्यादित्यर्थः। **अवाचीन इति** ॥ अवार्चीने विद्यमानादवात् कुटारचि अवकुटारमित्यर्थः। **नते नासिकायाः** ॥ **अवादित्येवेति** ॥ अवशब्दात् नासिकाया अवनतेऽर्थे टीटच्, नाटच्, भ्रटच्, एते प्रत्ययाः स्युरित्यर्थः। 'णमु प्रह्वत्वे' इति धातोर्भावे क्तप्रत्यये नतशब्द इत्यभिप्रेत्य आह। **नतं नमनमिति** ॥ प्रह्वत्वमित्यर्थः। ननु यदि नासिकायाः नमनमवटीटं तर्हि अवटीटा नासिकेति कथमित्यत आह। **तद्योगादिति** ॥ नमनयोगात्तत्र लाक्षणिकमिति भावः। **पुरुषोऽप्यवटीट इति** ॥ तादृशनासिकायोगादिति भावः। **नेर्बिडज्बिरीसचौ** ॥ 'नते नासिकायाः संज्ञायाम्' इत्यनुवर्तते। नेः नासिकाया नतेऽर्थे बिडच्, बिरीसच्, द्वौ प्रत्ययौ स्त इत्यर्थः। निबिडा वृक्षा इति तु उपमानादित्याहुः। **इनच्पिटच्** ॥ इनच्, पिटच् इति समाहारद्वन्द्वात्प्रथमैकवचनम्। चिकचि इत्यपि चिक चि इत्यनयोः समाहारद्वन्द्वात्प्रथमैकवचनम्। **प्रकृतेरिति** ॥ नेरित्यर्थः। तत्र इनचि परे चिक

चिकिनम्। चिपिटम्। चिक्कम्। 'क्लिन्नस्य चिलिपिलश्चास्य चक्षुषी' (वा ३१२२)। क्लिन्ने चक्षुषी अस्य चिल्लः। पिल्लः। 'चुल् च' (वा ३१२३)। चुल्लः।

१८३५। उपाधिभ्यां त्यकन्नासन्नारूढयोः। (५-२-३४)

'संज्ञायाम्' इत्यनुवर्तते। पर्वतस्यासन्नं स्थलमुपत्यका। आरूढं स्थलमधित्यका।

१८३६। कर्मणि घटोऽठच्। (५-२-३५)

घटत इति घटः। पचाद्यच्। कर्मणि घटते कर्मठः पुरुषः।

१८३७। तदस्य सञ्जातं तारकादिभ्य इतच्। (५-२-३६)

तारकाः सञ्जाता अस्य तारकितं नभः। आकृतिगणोऽयम्।

१८३८। प्रमाणे द्वयसज्दघ्नञ्मात्रचः। (५-२-३७)

इत्यादेशः। तत्र अकारः उच्चारणार्थः। पिटचि तु परे चि इत्यादेशः। **कप्रत्ययेति** ॥ उक्तनेः कप्रत्ययः। प्रकृतेः चिकादेशश्चेत्यर्थः। अयमपि ककारान्त एवादेशः। **चिकिनमिति** ॥ इनचि प्रत्यये कृते नेः चिकादेशे रूपम्। **चिपिटमिति** ॥ पिटचि कृते नेः चि इत्यादेशे रूपम्। **चिक्कमिति** ॥ कप्रत्यये नेः चिकादेशे रूपम्। **क्लिन्नस्य चिल्पिल्लश्चास्य चक्षुषी इति** ॥ वार्तिकमिदम्। चिल् पिल् इति समाहारद्वन्द्वात्प्रथमैकवचनम्। क्लिन्ने अस्य चक्षुषी इति विग्रहे क्लिन्नशब्दात् अस्य चक्षुषी इत्यर्थे लप्रत्ययः प्रकृतेः चिल्पिल् एतावादेशौ स्त इत्यर्थः। **क्लिन्ने इति** ॥ नेत्रामयप्रयुक्तजलनिष्पन्दवती इत्यर्थः। **चिल्लः पिल्ल इति** ॥ क्लिन्नचक्षुष्क इत्यर्थः। **चुल् चेति** ॥ उक्तविषये क्लिन्नस्य चुल् आदेशश्च, लप्रत्ययसन्नियोगेन वक्तव्य इत्यर्थः। **उपाधिभ्याम्** ॥ उप, अधि, आभ्यां यथासङ्ख्यमासन्नारूढयोर्वर्तमानाभ्यां स्वार्थे त्यकन्प्रत्ययः स्यादित्यर्थः। आसन्नं समीपम्। आरूढम् उच्चम्। **अनुवर्तते इति** ॥ 'नते नासिकायाः' इत्यस्मादिति भावः। कस्य समीपं कस्योच्चम् इत्याकाङ्क्षायां संज्ञाधिकारात् पर्वतस्येति लभ्यते इत्यभिप्रेत्य आह। **पर्वतस्येति। उपत्यका, अधित्यकेति** ॥ स्त्रीत्वं लोकात्। अत्र 'प्रत्ययस्थात्' इति इत्वं तु न। 'त्यकनश्च' इत्युक्तेः। **कर्मणि घटोऽठच्** ॥ सप्तम्यन्तात्कर्मन्शब्दात् घट इत्यर्थे अठच्स्यादित्यर्थः। घटशब्दस्य कलशपर्यायत्वभ्रमं वारयति। **कर्मणि घटते इति** ॥ व्याप्रियते इत्यर्थः। तथाचात्र घटशब्दो यौगिकः घटमाने वर्तते इति भावः। **कर्मठ इति** ॥ अठचि 'नस्तद्धिते' इति टिलोपः। अठचि ठस्य अङ्गात्परत्वाभावादिकादेशाभाव इति भावः। **तदस्य** ॥ प्रथमान्तेभ्यस्तारकादिभ्यः अस्य तत्सञ्जातमित्यर्थे इतच् स्यादित्यर्थः। **तारकितन्नभ इति** ॥ सञ्जातनक्षत्रमित्यर्थः। **आकृतिगणोऽयमिति** ॥ तेन पुष्पितो वृक्षः फलित इत्यादि सङ्ग्रहः। **प्रमाणे** ॥ **अनुवर्तते इति** ॥ ततश्च अस्य प्रमेयस्य

'तदस्य' इत्यनुवर्तते । ऊरू प्रमाणमस्य ऊरुद्वयसम् । ऊरुदघ्नम् । ऊरुमात्रम् । 'प्रमाणे लः' (वा ३१२८) । शमः । दिष्टिः । वितस्तिः । 'द्विगोर्नित्यम्' (वा ३१२९) । द्वौ शमौ प्रमाणमस्य द्विशमम् । 'प्रमाणपरिमाणाभ्यां सङ्ख्यायाश्चापि संशये मात्रज्वक्तव्यः' (वा ३१३३) । शममात्रम् । प्रस्थमात्रम् । पञ्चमात्रम् । 'वत्वन्तात्स्वार्थे द्वयसज्मात्रचौ बहुलम्' (वा ३१३४) । तावदेव तावद्द्वयसम् । तावन्मात्रम् ।

१८३९ । पुरुषहस्तिभ्यामण्च । (५-२-३८)

पुरुषः प्रमाणमस्य पौरुषम्—पुरुषद्वयसम् । हास्तिनम्—हस्तिद्वयसम् ।

१८४० । यत्तदेतेभ्यः परिमाणे वतुप् । ५-२-३९)

यत्परिमाणमस्य यावान् । तावान् । एतावान् ।

तत्प्रमाणमित्यर्थे प्रमाणे विद्यमानात्प्रथमान्तात् द्वयसच्, दघ्नच्, मात्रच्, एते प्रत्ययाः स्युः । "प्रमाणवानिदमर्थोऽत्रप्रत्ययार्थः" इति भाष्ये स्पष्टम् । तत्र "प्रथमश्च द्वितीयश्च ऊर्ध्वमाने मतौ मम" इति भाष्ये स्पष्टम् । प्रमाणमिह परिच्छेदकमात्रम् । तत्र मात्रच् प्रस्थमात्रमूरुमात्रमित्यादि इति कैयटः । वस्तुतस्तु "यत्तदेतेभ्यः" इति सूत्रभाष्यस्वरसादायामपरिच्छेदकमेवात्र प्रमाणम्" इति शब्देन्दुशेखरे विस्तरः । **प्रमाणे ल इति** ॥ लुको ल इति पूर्वाचार्यशास्त्रसिद्धा संज्ञा । प्रमाणे वर्तमानाद्विहितस्य द्वयसजादेर्लुग्वक्तव्य इत्यर्थः । **शमो दिष्टिर्वितस्तिरिति** ॥ शमः प्रमाणमस्येत्यादि विग्रहः । शमादयः अनूर्ध्वमानविशेषाः । तेभ्यो मात्रचो लुक् । इतरयोरसम्भवात् । अत्र 'आयामस्तु प्रमाणं स्यात्' इत्येव गृह्यते । एवञ्च ऊरुद्वयसमित्यादौ न लुक् । **द्विगोर्नित्यमिति** ॥ प्रमाणान्ताद्विगोः परस्य द्वयसजादेर्नित्यं लुक् स्यादित्यर्थः । प्रमाणान्तस्य द्विगोः प्रमाणवृत्तित्वात् सामर्थ्यादिह तदन्तविधिः । पूर्ववार्तिकेन तु नात्र प्राप्तिरस्ति । द्विगोः प्रमाणत्वाभावात् । **द्विशममिति** ॥ ताद्धितार्थे द्विगुः । ततो मात्रचः अनेन लुक् । "विकल्पस्याप्रकृतत्वादेव सिद्धे नित्यग्रहणं संशये वक्ष्यमाणस्य मात्रचः लुगर्थः । अन्यथा शममात्रमित्यत्रेव द्विशमशब्दादपि सः मात्रच् न लुप्येत" इति भाष्ये स्पष्टम् । **प्रमाणेति** ॥ प्रमाणवाचिनः परिमाणवाचिनः सङ्ख्यावाचिनश्च संशये मात्रज्वक्तव्य इत्यर्थः । अत्र प्रमाणमायाम एव गृह्यते । "आयामस्तु प्रमाणं स्यात्" इति वचनात् । अत एव परिमाणग्रहणमर्थवत् । **शममात्रमित्यादि** ॥ शमस्यान्न वेत्यादि विग्रहः । **वत्वन्तादिति** ॥ वार्तिकमिदम् । **पुरुषहस्तिभ्यामण् च** ॥ उक्तविषये इति शेषः । चात् द्वयसजादयस्त्रयः । **यत्तदेतेभ्यः** ॥ तदस्येत्यनुवर्तते । अस्य तत्परिमाणमित्यर्थे परिमाणवाचिनः प्रथमान्तेभ्यः किम्, यद्, तद्, एतद्, एभ्यः वतुप् स्यादित्यर्थः । **यावानिति** ॥ यच्छब्दाद्वतुप् । उपावितौ । 'आ सर्वनाम्नः' इत्यात्त्वम्, सुः, 'उगिदचाम्'

१८४१ । किमिदम्भ्यां वो घः । (५-२-४०)

आभ्यां वतुप् स्याद्वस्य च घः । कियान् । इयान् ।

१८४२ । किमः सङ्ख्यापरिमाणे डति च । (५-२-४१)

चाद्वतुप् । तस्य च वस्य घः स्यात् । का सङ्ख्या एषां ते कति–कियन्तः । क्षेपेतु न । का सङ्ख्या एषां दशानाम् ।

१८४३ । सङ्ख्याया अवयवे तयप् । (५-२-४२)

पञ्च अवयवाः अस्य पञ्चतयं दारु ।

१८४४ । द्वित्रिभ्यां तयस्यायज्वा । (५-२-४३)

इति नुम्, 'अत्वसन्तस्य' इति दीर्घः, हल्ङ्याबिसंयोगान्तलोपौ । एवं तावान्, एतावान् । **किमिदंभ्यां वो घः** ॥ तदस्य इति, परिमाणे वतुबिति चानुवर्तते । तदाह । **आभ्यां वतुप् स्यादिति** ॥ आभ्यां प्रथमान्ताभ्याम् अस्य तत्परिमाणमित्यर्थे वतुप् स्यादित्यर्थः । **वस्य च घ इति** ॥ वकारस्य घकार इत्यर्थः । **कियानिति** ॥ किं परिमाणमस्येति विग्रहः । किंशब्दात् वतुप् । उपावितौ । वकारस्य घकारः इयादेशः, किम् इयत् इति स्थिते 'इदङ्किमोरीश्की' इति इदमः कीभावे 'यस्येति च' इति ईकारलोपे कियत्शब्दात्सौ 'उगिदचाम्' इति नुमि 'अत्वसन्तस्य' इति दीर्घे, हल्ङ्याबिसंयोगान्तलोपाविति भावः । **इयानिति** ॥ इदंशब्दात् वतुपि वकारस्य घकारे इयादेशे इदम् इयत् इति स्थिते 'इदङ्किमोरीश्की' इति शित्त्वादिदमः ईकारे सर्वादेशे 'यस्येति च' इति ईकारस्य लोपे इत् इति प्रत्ययमात्रं शिष्यते । ततः सौ नुमादि पूर्ववत् । **किमः सङ्ख्या** ॥ तदस्येत्यनुवर्तते । सङ्ख्यायाः परिमाणं परिच्छेदः । किंशब्दः प्रश्ने वर्तते । का अस्य सङ्ख्येत्येवं सङ्ख्यापरिच्छेदविषयकप्रश्ने विद्यमानात् किंशब्दात्प्रथमान्तात् अस्येत्यर्थे डतिप्रत्ययश्च स्यादित्यर्थः । **का सङ्ख्या एषां ते कतीति** ॥ का सङ्ख्या अस्येति, का सङ्ख्या अनयोरिति च प्रश्नो न सम्भवति । अस्येत्यनेन एकत्वस्य अनयोरित्यनेन द्वित्वस्य च ज्ञातत्वात् । ज्ञाते च प्रश्नासम्भवात् । का सङ्ख्या एषामिति तु प्रश्नः सम्भवति । तत्र एषामित्यनेन बहुत्वस्य ज्ञातत्वेऽपि तद्व्याप्यत्रित्व-चतुष्ट्वादिसङ्ख्यानामज्ञातत्वात् । उक्तञ्च भाष्ये 'न ह्येकयोः प्रश्नोऽस्ति' इति । ततश्च नित्य-बहुवचनान्तोऽयं कतिशब्दः 'डति च' इति षट्संज्ञकत्वात् 'षड्भ्यो लुक्' इति जश्शसोर्लुक् । **कियन्त इति** ॥ कियानितिवत्प्रक्रिया । बहुवचनं विशेषः । सङ्ख्यापरिमाणे इत्युक्तेः किमः क्षेपार्थकत्वे डतिर्न भवति । **का सङ्ख्या एषां दशानामिति** ॥ दशावरा परिषदित्यत्र ब्राह्मणब्रुवाणां मेळने इदं वाक्यं प्रवृत्तम् । सङ्ख्येयद्वारा सङ्ख्यायाः कुत्सात्र गम्यते । अव्रताना-ममन्त्राणां जातिमात्रोपजीविनाम् । सहस्रशः समेतानाम्परिषत्त्वं न विद्यते" इति स्मरणात् । **सङ्ख्यायाः** ॥ तदस्येत्यनुवर्तते । द्वित्र्यादिसङ्ख्याका अवयवाः अस्यावयविनः इति विग्रहे अवयवीभूतसङ्ख्यावाचिनः प्रथमान्तात् अस्यावयविनः इत्यर्थे तयबित्यर्थः । **पञ्चतयमिति** ॥

द्वयम्—द्वितयम् । त्रयम्—त्रितयम् ।

१८४५ । उभादुदात्तो नित्यम् । (५-२-४४)

उभशब्दात्तयप आदेशोऽयच् स्यात्, स चोदात्तः । उभयम् ।

इति पाञ्चमिकाः ।

अथ तद्धिते मत्वर्थीयप्रकरणम् ।

१८४६ । तदस्मिन्नधिकमिति दशान्ताड्डः । (५-२-४५)

एकादश अधिकाः अस्मिन्नेकादशम् । 'शतसहस्रयोरेवेष्यते' (वा ३१४१) । नेह । एकादश अधिकाः अस्यां विंशतौ । 'प्रकृतिप्रत्ययार्थयोः समानजातीयत्वमेवेष्यते' (वा ३१४०) । नेह । एकादश माषाः अधिकाः अस्मिन्सुवर्णशते ।

१८४७ । शदन्तविंशतेश्च । (५-२-४६)

डः स्यादुक्तेऽर्थे । त्रिंशदधिका अस्मिन् त्रिंशं शतम् । विंशम् ।

पञ्चावयवकः समुदाय इत्यर्थः । **द्वित्रिभ्याम्** ॥ द्वित्रिभ्याम्परस्य तयपः अयज्वा स्यादित्यर्थः । **द्वयमिति** ॥ द्विशब्दात्तयपः अयचि 'यस्येति च' इति इकारलोपः । द्व्यवयवकसमुदाय इत्यर्थः । एवं त्रयम् । **उभादुदात्तो नित्यम्** ॥ **स चोदात्त इति** ॥ आद्युदात्त इत्यर्थः । "अन्तोदात्तत्वस्य चित्त्वेनैव सिद्धेः" इति भाष्ये स्पष्टम् । "अत्र अयच् प्रत्यय एव विधीयते, नतु तयप आदेशः" इति स्थानिवत्सूत्रभाष्ये स्पष्टम् । तयप आदेश इति मूलन्तु वार्तिकानुरोधेन ॥

इति पाञ्चमिकाः ।

अथ मत्वर्थीयाः—**तदस्मिन्नधिकम्** ॥ तदधिकमस्मिन् इति विग्रहे प्रथमान्तात् दशन्शब्दान्तात् समासात् अस्मिन्नित्यर्थे डप्रत्ययः स्यादित्यर्थः । प्रत्ययविधौ तदन्तविधिप्रतिषेधादन्तग्रहणम् । अत एव निर्देशात् पञ्चम्यर्थे सप्तमीत्याहुः । "औपश्लेषिकेऽधिकरणे सप्तमी" इति भाष्यम् । "सामीपिकमधिकरणम्" इति कैयटः । **एकादश माषाः अधिकाः अस्मिन्निति** ॥ अस्मादित्यर्थः । अस्मिन् उपश्लिष्टा इति वा । नच व्यपदेशिवत्त्वेन केवलदशन्शब्दादपि स्यादिति शङ्क्यम् । 'व्यपदेशिवद्भावोऽप्रातिपदिकेन' इत्युक्तेः । **शदन्तविंशतेश्च** ॥ शेषपूरणेन सूत्रं व्याचष्टे । **डः स्यादुक्तेऽर्थे इति** ॥ दशान्तत्वाभावात्पूर्वेण प्राप्तिः । **त्रिंशं शतमिति** ॥ डे सति 'टेः' इति टिलोपः । **विंशमिति** ॥ विंशतिः अस्मिन्नधिकमिति विग्रहः । 'ति विंशतेः' इति तिशब्दस्य लोपः । अन्तग्रहणादेकत्रिंशं शतमिति सिद्धम् । अन्यथा प्रत्ययग्रहणपरिभाषया तदादिनियमः स्यात् । 'विंशतावप्यन्तग्रहणम्' इति वार्तिकात् एकविंशं

१८४८ । सङ्ख्याया गुणस्य निमाने मयट् । (५-२-४७)

भागस्य मूल्ये वर्तमानात्प्रथमान्तात्सङ्ख्यावाचिनः षष्ठ्यर्थे मयट् स्यात् । यवानां द्वौ भागौ निमानमस्योदश्विद्भागस्य द्विमयमुदश्विद्यवानाम् । 'गुणस्य' इति किम् । द्वौ व्रीहियवौ निमानमस्योदश्वितः । 'निमाने' किम् । द्वौ गुणौ क्षीरस्य एकस्तैलस्य द्विगुणं क्षीरं पच्यते तैलेन ।

१८४९ । तस्य पूरणे डट् । (५-२-४८)

एकादशानां पूरणः एकादशः ।

१८५० । नान्तादसङ्ख्यादेर्मट् । (५-२-४९)

डटो मडागमः स्यात् । पञ्चानां पूरणः पञ्चमः । 'नान्तात्' किम् । विंशः । 'असङ्ख्यादेः' किम् । एकादशः ।

१८५१ । षट्कतिकतिपयचतुरां थुक् । (५-२-५१)

एषां थुगागमः स्याड्डटि । षण्णां पूरणः षष्ठः । कतिथः । कतिपयशब्द-

---

शतमित्यादि सिद्धम् । **सङ्ख्याया गुणस्य ॥** तदस्येत्यनुवर्तते । गुणः भागः अंशः निमीयते विक्रीयतेऽनेनेति निमानं मूल्यद्रव्यम् । 'मेङ् प्रणिदाने' करणे ल्युट् । तदाह । भागस्य मूल्य इत्यादि । **षष्ठ्यर्थे इति ॥** अस्येत्यर्थे इत्यर्थः । यवानान्द्वौ भागौ निमानमस्योदश्विद्भागस्येति विग्रहवाक्यम् । द्वाभ्यां यवप्रस्थाभ्याम् एक उदश्वित्प्रस्थो विक्रीयते यत्र तत्रेदं वाक्यम्प्रयुज्यते । द्विमयमुदश्विद्यवानामित्युदाहरणम् । यवानामिति सम्बन्धसामान्ये षष्ठी । यवप्रस्थद्वयेन विक्रेतव्यमुदश्विदित्यर्थः । द्विशब्दस्य भागवृत्तेर्नित्यसापेक्षत्वाद्यवानामित्येतत्सापेक्षत्वेऽपि प्रत्ययः । **द्वौ व्रीहियवौ निमानमस्योदश्वित इति ॥** द्वित्वसङ्ख्याविशिष्टौ व्रीहियवराशी यौ तौ अस्य उदश्विनो निमानमित्यर्थः । तत्र उदश्विद्यावत् तदपेक्षया व्रीहियवराश्योर्द्विगुणत्वन्न विवक्षितम् । किन्तु राशिद्वित्वमेत्र विवक्षितमिति द्विशब्दस्य भागवृत्तित्वाभावान्न प्रत्ययः । **तस्य पूरणे डट् ॥** सङ्ख्याया इत्यनुवर्तते । सङ्ख्येयार्थकसङ्ख्यावाचिनः षष्ठ्यन्तात्प्रत्ययनिर्मितसङ्ख्यायाः पूरणे वाच्ये डट्प्रत्ययः स्यादित्यर्थः । पूर्यते अनेनेति पूरणः अवयवः सः प्रत्ययार्थः । **एकादश इति ॥** एकादशत्वसङ्ख्यायाः पूरकोऽवयव इत्यर्थः । यस्मिन् अनुपात्ते एकादशत्वसङ्ख्या न सम्पद्यते, यस्मिन्नुपात्ते सा पूर्यते सोऽवयवः एकदेश इति यावत् । प्रवृत्तिनिमित्तेति किम् । पञ्चानाङ्घटानां पूरणं जलादि । **नान्तादसङ्ख्यादेर्मट् ॥ डटो मडागमः स्यादिति ॥** शेषपूरणमिदम् । डटि टकार इत् । अकार उच्चारणार्थः । **पञ्चम इति ॥** पञ्चन्शब्दात् डटि तस्य मडागमे सति नलोपः । "यद्यपि मटः प्रत्ययत्वेऽपि न रूपभेदः । तथापि स्वरविशेषार्थम्मडागमाश्रयणम्" इति भाष्ये स्पष्टम् । **षट्कति ॥** थुकि ककार इत् । उकार उच्चारणार्थः । कित्त्वादन्त्यादचः परः । **षष्ठ इति ॥** अपदान्तत्वात् षस्य न जश्त्वम् ।

स्यासङ्ख्यात्वेऽप्यत एव ज्ञापकाड्डट्। कतिपयथः। चतुर्थः। 'चतुरश्छयताचाद्यक्षरस्य लोपश्च' (वा ३१५८)। तुरीयः–तुर्यः।

१८५२। बहुपूगगणसङ्घस्य तिथुक्। (५-२-५२)

'डटि' इत्येव। पूगसङ्घयोरसङ्ख्यात्वेऽप्यत एव डट्। बहुतिथः इत्यादि।

१८५३। वतोरिथुक्। (५-२-५३)

'डटि' इत्येव। यावतिथः।

१८५४। द्वेस्तीयः। (५-२-५४)

डटोऽपवादः। द्वयोः पूरणः द्वितीयः।

१८५५। त्रेः सम्प्रसारणं च। (५-२-५५)

तृतीयः।

१८५६। विंशत्यादिभ्यस्तमडन्यतरस्याम्। (५-२-५६)

एभ्यो डटस्तमडागमो वा स्यात्। विंशतितमः–विंशः। एकविंशतितमः–एकविंशः।

१८५७। नित्यं शतादिमासार्धमाससंवत्सराच्च। (५-२-५७)

चतुर्थः इति॥ अपदान्तत्वान्न रेफस्य विसर्गः। **चतुरः इति॥** वार्तिकमिदम्। चतुर्शब्दात् षष्ठ्यन्तात्पूरणे छयतौ स्तः। **आद्यक्षरस्य लोपश्चेति॥** सङ्घातस्य लोपश्चेत्यर्थः। **बहुपूगगण॥** बहु, पूग, गण, सङ्घ, एषाण्डटि तिथुगागमः स्यादित्यर्थः। ककार इत्। उकार उच्चारणार्थः। कित्त्वादन्त्यादचः परः। **इत्यादीति॥** पूगतिथः, गणतिथः, सङ्घतिथः। **वतोरिथुक्॥ डटीत्येवेति॥** वतुबन्तस्य इथुगागमः स्यात् डटीत्यर्थः। **यावतिथ इति॥** यावतां पूरण इति विग्रहः। बहुगणेति सङ्ख्यात्वात् 'तस्य पूरणे' इति डटि प्रकृतेरिथुक्। **द्वेस्तीयः॥** द्विशब्दात् षष्ठ्यन्तात् पूरणे तीयप्रत्ययः स्यादित्यर्थः। **त्रेः सम्प्रसारणञ्च॥** त्रेस्तीयः स्यात्प्रकृतेः सम्प्रसारणञ्चेत्यर्थः। **तृतीयः इति॥** त्रयाणां पूरण इति विग्रहः। तीयप्रत्यये सति रेफस्य सम्प्रसारणम् ऋकारः। 'सम्प्रसारणाच्च' इति पूर्वरूपम्। 'हलः' इति दीर्घस्तु न भवति। 'ढ्रलोपे' इत्यतः अण इत्यनुवृत्तेः। **विंशत्यादिभ्यः॥** तमटि टकार इत्, मकारादकार उच्चारणार्थः। अत्र 'पङ्क्तिविंशति' इति सूत्रानुक्रान्ता एव विंशत्यादयो गृह्यन्ते। नतु लोकप्रसिद्धा एकविंशत्यादयोऽपि। विप्रकर्षात्" इति कैयटः। एकविंशतितमः इत्यत्र तु तदन्तविधिना तमडित्यग्रे वक्ष्यते। **नित्यं शतादिमासार्धमाससंवत्सराच्च॥** शतादिभ्यः

शतस्य पूरणः शततमः । एकशततमः । मासादेरत एव डट् । मासतमः । अर्धमासतमः । संवत्सरतमः ।

१८५८ । षष्ट्यादेश्चासङ्ख्यादेः । (५-२-५८)

षष्टितमः । संख्यादेस्तु विंशत्यादिभ्यः (सू १८५६) इति विकल्प एव । एकषष्टः—एकषष्टितमः ।

१८५९ । मतौ छः सूक्तसाम्नोः । (५-२-५९)

मत्वर्थे छः स्यात् । अच्छावाकशब्दोऽस्मिन्नस्ति अच्छावाकीयं सूक्तम् । वारवन्तीयं साम ।

१८६० । अध्यायानुवाकयोर्लुक् । (५-२-६०)

मासात् अर्धमासात् सवत्सराच्च परस्य डटो नित्यं तमडागमः स्यादित्यर्थः । ननु षष्ठ्यादेश्चेत्युत्तरसूत्रेण शततमः सिद्ध्यतीत्यत आह । **एकशततमः इति** ॥ 'असङ्ख्यादेः' इति पर्युदासादुत्तरसूत्रस्य नात्र प्रवृत्तिरिति भावः । ननु मासार्धमाससंवत्सरशब्दानां सङ्ख्या वाचित्वाभावात् तेभ्यो डट एवाप्रसक्तेः तस्य कथन्तमड्विधिरित्यत आह । **मासादेरिति** ॥ **मासतम इति** ॥ मासस्य पूरणः अर्धमासादिरवयवः । **अर्धमासतम इति** ॥ अर्धमासस्य पूरणः तिथ्यादिरवयवः । **संवत्सरतम इति** ॥ संवत्सरस्य पूरणः मासादिरवयवः । **षष्ठ्यादेश्चासङ्ख्यादेः** ॥ असङ्ख्यापूर्वपदात् षष्ठ्यादेः परस्य डटो नित्यं तमडागमः स्यादित्यर्थः । 'विंशत्यादिभ्यः' इति विकल्पस्यापवादः । **एकषष्टः–एकषष्टितमः इति** ॥ सङ्ख्यादित्वान्नित्यस्य तमटोऽभावे विंशत्यादिभ्य इति डटस्तमड्विकल्पः । तमडभावे डटि 'यस्येति च' इति इकारलोपे एकषष्ट इति रूपम् । ननु केवलात् षष्ठ्यादेर्विहितस्य नित्यतमटः सङ्ख्यादेः कथं प्रसक्तिः । तमडागमविधेरप्रत्ययविधित्वेऽपि 'ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति' इति निषेधादिति चेन्मैवम् । सङ्ख्यादेरिति हि इह प्रकरणे ग्रहणवता प्रातिपदिकेन तदन्तविधि ज्ञापयति । तेन 'विंशत्यादिभ्यः' इति पूर्वसूत्रम् एकविंशतितमः इत्यादावपि प्रवर्तते इति भाष्ये स्पष्टम् । एवञ्च एकान्नविंशतितमः इत्यपि सिद्धम् । **मतौ छः सूक्तसाम्नोः** ॥ मतुशब्दो मत्वर्थे लाक्षणिक इत्याह । **मत्वर्थे इति** ॥ **अच्छावाकीयं सूक्तमिति** ॥ अच्छावाकशब्दः अस्यास्ति अस्मिन्नस्तीति वा विग्रहः । अच्छावाकशब्दयुक्तमित्यर्थः । अच्छावाकशब्दात् शब्दस्वरूपपरात् प्रथमान्ताच्छः । **वारवन्तीयं सामेति** ॥ अश्वं नत्वा वारवन्तमित्यस्यामृच्ययद्व्यूढमित्यर्थः । एवमस्य वामीयमित्यपि । अस्य वामस्येत्यस्य एकदेशानुकरणमस्य वामेति । तस्माच्छः । अस्यवामशब्दसंयुक्तमित्यर्थः । प्रकृतिवदनुकरणमित्यस्यानित्यत्वात्सुपो लुक् । **अध्यायानुवाकयोर्लुक्** ॥ नन्वध्यायानुवाकयोरभिधेये छस्य कथं प्राप्तिः । सूक्तसाम्नोरिति नियमादित्यत आह । **अत एवेति** ॥ **विधानेति** ॥ "मतुप्प्रकरण

मत्वर्थस्य छस्य । अत एव ज्ञापकात्तत्र छः । विधानसामर्थ्याच्च विकल्पेन लुक् । गर्दभाण्डः–गर्दभाण्डीयः ।

१८६१ । विमुक्तादिभ्योऽण् । (५-२-६१)

मत्वर्थेऽण् स्यादध्यायानुवाकयोः । विमुक्तशब्दोऽस्मिन्नस्ति वैमुक्तः । दैवासुरः ।

१८६२ । गोषदादिभ्यो वुन् । (५-२-६२)

मत्वर्थेऽध्यायानुवाकयोः । गोषदकः । इषेत्वकः ।

१८६३ । तत्र कुशलः पथः । (५-२-६३)

वुन् स्यात् । पथि कुशलः पथिकः ।

१८६४ । आकर्षादिभ्यः कन् । (५-२-६४)

आकर्षे कुशलः आकर्षकः । 'आकषादिभ्यः' इति रेफरहितो मुख्यः पाठः । आकषो निकषः ।

१८६५ । धनहिरण्यात्कामे । (५-२-६५)

कामः इच्छा । धने कामो धनको देवदत्तस्य । हिरण्यकः ।

१८६६ । स्वाङ्गेभ्यः प्रसिते । (५-२-६६)

केशेषु प्रसितः केशकः । तद्रचनायां तत्पर इत्यर्थः ।

एवास्मिन्सूत्रे कर्तव्ये अत्र प्रकरणे छस्य लुग्विधानसामर्थ्यात्" इति कैयट । ज्ञापकसिद्धः, विधानसामर्थ्यादित्यन्ये । भाष्ये तु "अध्यायानुवाकयोर्वा लुग्वक्तव्यः" इति वचनमेवारब्धम् । **गर्दभाण्डः–गर्दभाण्डीय इति** ॥ गर्दभाण्डशब्दसंयुक्तोऽध्यायोऽनुवाको वेत्यर्थः । भाष्योदाहरणादेव क्वचिदेतन्नामकोऽध्यायोऽनुवाको वा अन्वेष्यः । **विमुक्तादिभ्योऽण्** ॥ **वैमुक्त इति** ॥ विमुक्तशब्दयुक्तोऽध्यायोऽनुवाको वेत्यर्थः । **गोषदादिभ्यो वुन्** ॥ **गोषदक इति** ॥ गोषदशब्दसंयुक्तोऽध्यायोऽनुवाको वेत्यर्थः । **इषेत्वक इति** ॥ इषेत्वा इति शब्दयुक्त इत्यर्थः । अस्य वामीयमित्यत्रोक्तरीत्या सुपो न लुक् । **तत्र कुशलः पथः** ॥ **वुन् स्यादिति** ॥ सप्तम्यन्तात्पथिन्शब्दात्कुशल इत्यर्थे वुनित्यर्थः । **पथिक इति** ॥ अकादेशे 'नस्तद्धिते' इति टिलोपः । **आकर्षादिभ्यः कन्** ॥ **आकर्षक इति** ॥ यद्यपि वुनैवानुवृत्तेनेदं सिद्ध्यति । तथापि शकुनिक इत्याद्यर्थङ्कन्ग्रहणम् । **धनहिरण्यात्कामे** ॥ तत्रेत्यनुवर्तते । धनशब्दात् हिरण्यशब्दाच्च सप्तम्यन्तात्कामे वाच्ये कन् स्यादित्यर्थः । **काम इच्छेति** ॥ नतु कामयिता । व्याख्यानादिति भावः । **स्वाङ्गेभ्यः प्रसिते** ॥ तत्रेत्यनुवर्तते । स्वाङ्गेभ्यः

१८६७। उदराट्ठगाद्यूने। (५-२-६७)

अविजिगीषौ ठक् स्यात्कनोऽपवादः। बुभुक्षयात्यन्तपीडितः उदरे प्रसितः औदरिकः। 'आद्यूने' किम्। उदरकः। उदरपरिमार्जनादौ प्रसक्त इत्यर्थः।

१८६८। सस्येन परिजातः। (५-२-६८)

कन् स्वर्यते न तु ठक्। सस्यशब्दो गुणवाची न तु धान्यवाची। 'शस्येन' इति पाठान्तरम्। सस्येन गुणेन परिजातः सम्बद्धः सस्यकः साधुः।

१८६९। अंशं हारी। (५-२-६९)

'हारी' इत्यावश्यके णिनिः। अत एव तद्योगे षष्ठी न। अंशको दायादः।

१८७०। तन्त्रादचिरापहृते। (५-२-७०)

तन्त्रकः पटः। प्रत्यग्र इत्यर्थः।

१८७१। ब्राह्मणकोष्णिके संज्ञायाम्। (५-२-७१)

सप्तम्यन्तेभ्यः प्रसितेऽर्थे कन् स्यादित्यर्थः। प्रसितः उत्सुकः। **तद्रचनायामिति** ॥ वेण्यादिप्रथने इत्यर्थः। अत्रैवार्थे अस्य साधुत्वम्। व्याख्यानादिति भावः। **उदराट्ठगाद्यूने** ॥ तत्र प्रसित इत्यनुवर्तते। सप्तम्यन्तादुदरशब्दात् आद्यूने प्रसितेऽर्थे ठगित्यर्थः इत्यभिप्रेत्य आद्यूनशब्दं विवृण्वन्नाह। **अविजिगीषाविति** ॥ 'दिवोऽविजिगीषायाम्' इत्यविजिगीषायामेव दिवो निष्ठानत्वविधानादिति भावः। **बुभुक्षयेति** ॥ क्षुधा पीडित एव सन् उदरपरिमार्जने प्रसितः, नतु मल्लवद्युद्धे विजिगीषयेत्यर्थः। **उदरक इति** ॥ मल्ल इति शेषः। स हि युद्धे विजिगीषया उदरपरिमार्जनादौ उत्सुको भवति। तदाह। **उदरपरिमार्जनादौ प्रसक्त इति** ॥ विजिगीषयेति शेषः। **सस्येन परिजातः** ॥ तृतीयान्तात् सस्यशब्दात्परिजात इत्यर्थे कन् स्यादित्यर्थः। सन्निहितष्ठगेव कुतो नानुवर्तत इत्यत आह। **कन् स्वर्यते नतु ठगिति** ॥ स्वरितत्वप्रतिज्ञायान्तु पाणिनीयपरम्परैव प्रमाणम्। **सस्यशब्दो गुणवाचीति** ॥ व्याख्यानमेवात्र शरणम्। **शस्येनेतीति** ॥ 'शंसु स्तुतौ' इति धातौ कर्मणि यति शस्यशब्दः स्तुत्यपर्यायः। स्तुत्यश्च गुण एवेति भावः। परिजात इत्यस्य विवरणं सम्बद्ध इति। **अंशं हारी** ॥ द्वितीयान्तात् अंशशब्दात् हारीत्यर्थे कन् स्यादित्यर्थः। ननु कृद्योगषष्ठीप्रसङ्गादंशमिति कथं द्वितीयेत्यत आह। **आवश्यके णिनिरिति** ॥ 'आवश्यकाधमर्ण्ययोः' इत्यनेनेति शेषः। **षष्ठी नेति** ॥ 'अकेनोः' इति तन्निषेधादिति भावः। **तन्त्रादचिरापहृते** ॥ तन्त्रशब्दात् पञ्चम्यन्तात् अचिरापहृतेऽर्थे कनित्यर्थः। तन्त्रं तन्तुवायशलाका। अचिरेण कालेन अपहृतः अचिरापहृतः। 'कालाः परिमाणिना' इति समासः। **प्रत्यग्र इति** ॥ नूतन इत्यर्थः। **ब्राह्मणकोष्णिके** ॥ आयुधजीविविषयब्राह्मणशब्दात् प्रथमान्तात् अस्मिन्नित्यर्थे

आयुधजीविनो ब्राह्मणाः यस्मिन्देशे सः ब्राह्मणकः । अल्पमन्नं यस्यां सा उष्णिका यवागूः । अल्पान्नशब्दस्योष्णादेशो निपात्यते ।

१८७२ । शीतोष्णाभ्यां कारिणि । (५-२-७२)

शीतं करोतीति शीतकोऽलसः । उष्णं करोतीत्युष्णकः शीघ्रकारी ।

१८७३ । अधिकम् । (५-२-७३)

अध्यारूढशब्दात्कनुत्तरपदलोपश्च ।

१८७४ । अनुकाभिकाभीकः कमिता । (५-२-७४)

अन्वभिभ्यां कन्नभेः पाक्षिको दीर्घश्च । अनुकामयते अनुकः । अभिकामयते अभिकः—अभीकः ।

१८७५ । पार्श्वेनान्विच्छति । (५-२-७५)

अनृजुरुपायः पार्श्वम्, तेनान्विच्छति पार्श्वकः ।

१८७६ । अयःशूलदण्डाजिनाभ्यां ठक्ठञौ । (५-२-७६)

तीक्ष्णः उपायोऽयःशूलं, तेनान्विच्छति आयःशूलिकः । साहसिकः । दण्डाजिनं दम्भः । तेनान्विच्छति दाण्डाजिनिकः ।

कन् निपात्यते इत्यर्थः । **अल्पान्नशब्दस्येति** ॥ अल्पान्नशब्दात् प्रथमान्तात् अस्मिन्नित्यर्थे कन्प्रत्ययः प्रकृतेरुष्णादेशश्च निपात्यते इत्यर्थः । **शीतोष्णाभ्याङ्कारिणि** ॥ शीतमिव शीतं मन्दमित्यर्थः । उष्णमिव उष्णम् शीघ्रमित्यर्थः । आभ्यां क्रियाविशेषणाभ्यां द्वितीयान्ताभ्याङ्कन् स्यादित्यर्थः । "यः आशु कर्तव्यानर्थान् चिरेण करोति सः शीतक उच्यते, यस्तु अनाशु कर्तव्यान् आश्वेव करोति सः उष्णक उच्यते" इति भाष्ये । संज्ञायामित्यननुवृत्तेरयमर्थो लभ्यते" इति कैयटः । तदाह । **शीतकोऽलस इति** ॥ **उष्णकः शीघ्रकारीति च** ॥ **अधिकम्** ॥ **अध्यारूढशब्दादिति** ॥ व्युत्पादनमात्रमिदम् । शुद्धरूढ एवायमिति बोध्यम् । **अनुकाभिक** ॥ अनुक, अभिक, अभीक, एषां समाहारद्वन्द्वः । सौत्रम्पुंस्त्वम् । **पार्श्वेनान्विच्छति** ॥ तृतीयान्तात्पार्श्वशब्दात् अन्विच्छतीत्यर्थे संज्ञायां कन् स्यादित्यर्थः । अन्वेषणं मार्गणम् । पार्श्वमिव पार्श्वम् । अनृजुरुपायः । ऋजूपायेन अन्वेष्टव्यान् अर्थान् यः अनृजुना उपायेनान्विच्छति सः पार्श्वक इति भाष्यम् । तदाह । **अनृजुरित्यादि** ॥ **अयःशूलदण्डाजिनाभ्यां ठक्ठञौ** ॥ अयःशूल, दण्डाजिन आभ्यान्तृतीयान्ताभ्यां अन्विच्छतीत्यर्थे सञ्ज्ञायाण्ठक्ठञौ स्त इत्यर्थः । अयःशूलमिव अयःशूलम् । साहसमित्यर्थः । "यो मृदुनोपायेन अन्वेष्टव्यानर्थान् तीक्ष्णोपायेनान्विच्छति सः आयःशूलिकः" इति भाष्यम् । तदाह । **तीक्ष्णोपाय इत्यादि** ॥ **दण्डाजिनं दम्भ इति** ॥ दम्भार्थत्वाद्दण्डाजिनशब्दो दम्भे

१८७७ । तावतिथं ग्रहणमिति लुग्वा । (५-२-७७)

कन् स्यात्पूरणप्रत्ययस्य च लुग्वा । द्वितीयकं—द्विकं वा ग्रहणं देवदत्तस्य । द्वितीयेन रूपेण ग्रहणमित्यर्थः । 'तावतिथेन गृह्णातीति कन्वक्तव्यो नित्यं च लुक्' (वा ३१७२) । षष्ठेन रूपेण गृह्णाति षट्को देवदत्तः । पञ्चकः ।

१८७८ । स एषां ग्रामणीः । (५-२-७८)

देवदत्तो मुख्यो एषां देवदत्तकाः । त्वत्काः । मत्काः ।

१८७९ । शृङ्खलमस्य बन्धनं करभे । (५-२-७९)

शृङ्खलकः करभः ।

१८८० । उत्क उन्मनाः । (५-२-८०)

उद्गतमनस्कवृत्तेरुच्छब्दात्स्वार्थे कन् । उत्कः उत्कण्ठितः ।

१८८१ । कालप्रयोजनाद्रोगे । (५-२-८१)

लाक्षणिक इति भावः । **तावतिथम्** ॥ तावताम्पूरणन्तावतिथमिति पूरणप्रत्ययान्तानां सामान्यनिर्देशः । तृतीयार्थे प्रथमा । ग्रहणमिति भावे ल्युडन्तम् । तथाच तृतीयान्तात्पूरणप्रत्ययान्तात् ग्रहणमित्यर्थे कन् स्यात्पूरणप्रत्ययस्य च लुग्वेत्यर्थः इत्यभिप्रेत्य आह । **कन् स्यादि-त्यादि** ॥ पूरणप्रत्ययान्तस्य तु प्रकृतिभूतस्य न लुक् । किन्तु पूरणप्रत्ययमात्रस्य "षष्ठेन गृह्णाति षट्कः" इति भाष्योदाहरणात् । **द्वितीयेन रूपेणेति** ॥ अनेन द्वितीयैव समर्थविभक्तिरिति सूचितम् । इतिना लोकानुसारित्वङ्गम्यते । एवञ्च ग्रन्थविषये एवमेव ग्रहणमिह फलति तेन द्वितीयङ्ग्रहणन्देवदत्तेन दण्डस्येत्यादौ न भवति । **तावतिथेनेति** ॥ ग्रहणेऽर्थे विहितङ्गृहीतरि न प्राप्नोतीत्यारम्भः । **षट्को देवदत्त इति** ॥ भाष्ये एवमेवोदाहृतत्वात् पूरणप्रत्ययस्यैव लुगिति गम्यते । नतु तदन्तस्य । **स एषाङ्ग्रामणीः** ॥ ग्रामणीविशेषवाचकात् शब्दात्प्रथमान्तात् अस्येत्यर्थे कन् स्यादित्यर्थः । **देवदत्तो मुख्यो एषामिति** ॥ एतेन ग्रामणीशब्दो मुख्यपर्याय इति सूचितम् । "ग्रामणीर्नापिते पुंसि श्रेष्ठे ग्रामाधिपे त्रिषु" इत्यमरः । **त्वत्काः, मत्काः इति** ॥ त्वमहं वा मुख्यो एषामिति विग्रहः । प्रत्ययोत्तरपदयोश्चेति त्वमौ । **शृङ्खलमस्य** ॥ षष्ठ्यर्थे प्रथमा । बन्धनमिति करणे ल्युट् । अस्य करभस्य शृङ्खलं बन्धनमिति विग्रहे बन्धनविशेषणकात् प्रथमान्तात् अस्य करभस्येत्यर्थे कन् स्यादित्यर्थः । **शृङ्खलकः करभ इति** ॥ शृङ्खलेन बद्ध इति यावत् । करभः उष्ट्रः । **उत्क उन्मनाः** ॥ **उद्गतमनस्कवृत्तेरिति** ॥ उत्कण्ठितवृत्तेरित्यर्थः । **कालप्रयोजनाद्रोगे** ॥ काल, प्रयोजन, अनयोः समाहारद्वन्द्वः । तदाह । **कालवचनात्**

कालवचनात्प्रयोजनवचनाच्च कन् स्याद्रोगे। द्वितीयेऽह्नि भवो द्वितीयको ज्वरः। प्रयोजनं कारणं रोगस्य फलं वा। विषपुष्पैर्जनितो विषपुष्पकः। उष्णं कार्यमस्य उष्णकः। 'रोगे' किम्। द्वितीयो दिवसोऽस्य।

१८८२। तदस्मिन्नन्नं प्रायेण संज्ञायाम्। (५-२-८२)

प्रथमान्तात्सप्तम्यर्थे कन्स्याद्यत्प्रथमान्तमन्नं चेत्प्रायविषयं तत्। गुडापूपाः प्रायेणान्नमस्यां गुडापूपिका पौर्णमासी। 'वटकेभ्य इनिर्वाच्यः' (वा ३१७५)। वटकिनी।

१८८३। कुल्माषादञ्। (५-२-८३)

कुल्माषाः प्रायेणान्नमस्यां कौल्माषी।

१८८४। श्रोत्रियंश्छन्दोऽधीते। (५-२-८४)

श्रोत्रियः। 'वा' इत्यनुवृत्तेश्छान्दसः।

१८८५। श्राद्धमनेन भुक्तमिनिठनौ। (५-२-८५)

श्राद्धी—श्राद्धिकः।

१८८६। पूर्वादिनिः। (५-२-८६)

पूर्वं कृतमनेन पूर्वी।

प्रयोजनवचनाच्चेति ॥ यथोक्तविभक्त्यन्तादिति शेषः। कालशब्देनात्र कालवृत्तिपूरणप्रत्ययान्तो द्वितीयादिशब्द एव गृह्यते, न तु मासादिशब्दः। व्याख्यानात्। तदाह। **द्वितीयेऽहनीति** ॥ प्रयुज्यतेऽनेनेति करणे ल्युटि प्रयोजनं साधनम्। कर्मणि ल्युटि तु फलम्। तदाह। **प्रयोजनङ्करणं रोगस्य फलं वेति** ॥ **तदस्मिन्नन्नम्** ॥ प्रथमान्तादन्नवाचकात् अस्मिन्नित्यर्थे कन् स्यात् अन्नस्य बाहुल्ये गम्ये संज्ञायामित्यर्थः। **वटकेभ्यः इति** ॥ संज्ञायामित्येव। **वटकिनीति** ॥ वटकाः प्रायेण अन्नमस्याम्पौर्णमास्यामिति विग्रहः। **कुल्माषादञ्** ॥ कनोऽपवादः। "स्याद्यावकस्तु कुल्माषः चणको हरिमन्थकः" इत्यमरः। **श्रोत्रियंश्छन्दोऽधीते** ॥ द्वितीयान्ताच्छन्दश्शब्दात् अधीते इत्यर्थे घन्, प्रकृतेः श्रोत्र देशश्च निपात्यते। अध्येत्रणोऽपवादः। **वेत्यनुवृत्तेरिति** ॥ 'तावतिथम्' इति सूत्रान्मण्डूकप्लुत्येति शेषः। ततश्च घनभावे पूर्वसूत्रादनुवृत्तोऽणिति भावः। वाग्रहणाननुवृत्तौ तु घना अध्येत्रणो बाधः स्यादिति बोध्यम्। **श्राद्धमनेन** ॥ प्रथमान्तात् श्राद्धशब्दात् भुक्तमनेनेत्यर्थे इनिठनौ एतौ स्त इत्यर्थः। श्राद्धसाधनद्रव्ये श्राद्धशब्दो लाक्षणिकः। इनिप्रत्यये नकारादिकार उच्चारणार्थः। **पूर्वादिनिः** ॥ अनेनेति कर्तृतृतीयान्तमनुवर्तते। काङ्क्रियाम्प्रति कर्तेत्याकाङ्क्षायाम्भुक्तं पीतमित्यादि यत्किञ्चित्क्रियापदमध्याहार्यम्। उपस्थितत्वात् कृञर्थभूतक्रियासामान्यमेव प्रतीयते।

१८८७ । सपूर्वाच्च । (५-२-८७)

कृतपूर्वी कटम् ।

१८८८ । इष्टादिभ्यश्च । (५-२-८८)

इष्टमनेन इष्टी । अधीती ।

१८८९ । छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि । (५-२-८९)

लोके तु परिपन्थिशब्दो न न्याय्यः ।

१८९० । अनुपद्यन्वेष्टा । (५-२-९०)

अनुपदमन्वेष्टा गवामनुपदी ।

१८९१ । साक्षाद्द्रष्टरि संज्ञायाम् । (५-२-९१)

साक्षाद्द्रष्टा साक्षी ।

१८९२ । क्षेत्रियच् परक्षेत्रे चिकित्स्यः । (५-२-९२)

क्षेत्रियो व्याधिः । शरीरान्तरे चिकित्स्यः । अप्रतिकार्य इत्यर्थः ।

ततश्च पूर्वङ्कृतमनेनेति विग्रहे कृतमित्यादिक्रियाविशेषणात्पूर्वशब्दात् अनेनेत्यर्थे इनिः स्यादित्यर्थः । **सपूर्वाच्च** ॥ विद्यमानपूर्वादपि पूर्वशब्दादुक्तविषये इनिः स्यादित्यर्थः । पूर्वान्तादिति यावत् । प्रातिपदिकविशेषणत्वेऽपि प्रत्ययविधौ तदन्तविधिप्रतिषेधादन्तग्रहणम् । **कृतपूर्वी कटमिति** ॥ अत्र यद्वक्तव्यन्तत्कर्तृकर्मणोः कृतीत्यत्रोक्तम् । **इष्टादिभ्यश्च** ॥ इष्टादिभ्यः तृतीयान्तेभ्यः अनेनेत्यर्थे इनिः स्यादित्यर्थः । **छन्दसि परिपन्थि** ॥ परिपन्थिन् परिपरिन् एतौ शब्दौ छन्दसि निपात्येते पर्यवस्थातरि वाच्ये । पर्यवस्थातृशब्दादिनिप्रत्यये अवस्थातृशब्दस्य पन्थादेशे परिपन्थिन्शब्दः । पर्यवस्थातृशब्दादिनिप्रत्यये अवस्थातृशब्दस्य पर इत्यादेशे परिपरिन्शब्दः । "माविदन्परिपन्थिनः, मात्वा परिपरीविदत्" इति श्रुतौ उदाहरणम् । इदं सूत्रं वैदिकप्रक्रियायामेव व्याख्यातुमुचितम् । **अनुपद्यन्वेष्टा** ॥ पदस्य पश्चादनुपदम् । पश्चादर्थे अव्ययीभावः । सप्तम्या अम्भावः । अनुपदमित्यस्मात् अन्वेष्टरि अर्थे इनिप्रत्ययो निपात्यते । **साक्षाद्द्रष्टरि संज्ञायाम्** ॥ साक्षादित्यव्ययम्, इह शब्दस्वरूपपरं लुप्तपञ्चमीकन् । साक्षादित्यव्ययात् द्रष्टर्यर्थे इनिः स्यादित्यर्थः । **साक्षीति** ॥ यः कर्मणि स्वयं न व्याप्रियते, किन्तु कर्म क्रियमाणम्पश्यति सोऽयं साक्षीत्युच्यते । साक्षादित्यव्ययादिनिप्रत्ययः 'अव्ययानाम्भमात्रे' इति टिलोपः । **क्षेत्रियच्** ॥ परम् अन्यत् क्षेत्रं शरीरं परक्षेत्रम् । चिकित्स्यः प्रतीकार्यः 'कितेर्व्याधिप्रतीकारे' इत्युक्तेः । परक्षेत्रशब्दात् सप्तम्यन्तात् चिकित्स्य इत्यर्थे घच्, परशब्दस्य लोपश्च निपात्यते । **शरीरान्तरे इति** ॥ भाविनि शरीरे चिकित्स्यः, नतु वर्तमाने शरीरे

१८९३ । इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा । (५-२-९३)

इन्द्र आत्मा, तस्य लिङ्गं करणेन कर्तुरनुमानात् । इतिकरणं प्रकारार्थम् । इन्द्रेण दुर्जयमिन्द्रियम् ।

१८९४ । तदस्यास्त्यस्मिन्निति मतुप् । (५-२-९४)

गावोऽस्यास्मिन्वा सन्ति गोमान् ।

'भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने ।
संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः ॥' (वा ३१८३)

१८९५ । रसादिभ्यश्च । (५-२-९५)

मतुप् । रसवान् । रूपवान् । अन्यमत्वर्थीयनिवृत्त्यर्थं वचनम् । रस, रूप, वर्ण, गन्ध, स्पर्श, शब्द, स्नेह, भाव, 'गुणात्' (ग. सू. ११२) 'एकाचः' (ग. सू. ११३) । स्ववान् । गुणग्रहणं रसादीनां विशेषणम् ।

इत्यर्थः । फलितमाह । **अप्रतिकार्यः इति** ॥ **इन्द्रियम्** ॥ इन्द्रलिङ्गमित्याद्यर्थेषु इन्द्रियमिति भवति । इन्द्रशब्दात् यथायोगं षष्ठी। तृतीयान्तात् लिङ्गमित्याद्यर्थेषु घच् निपात्यते इति यावत् । **"इन्द्र आत्मेति** ॥ स एतमेव पुरुषं ब्रह्मततममपश्यदिदमदर्शमिति । तस्मादिदन्द्रो नामेदंद्रोहवै नाम तमिदंद्रं सन्तमिन्द्रमित्याचक्षते" इति श्रुतेरिति भावः। **तस्य लिङ्गमिति** ॥ आत्मनोऽनुमापकमित्यर्थः । लिङ्गत्वमुपपादयति । **करणेनेति** ॥ चक्षुरादीन्द्रियाङ्किञ्चित्कर्त्रोधिष्ठितम्भवितुमर्हति, करणत्वात्, घटकरणदण्डादिवदित्यनुमानादित्यर्थः। मम चक्षुरित्येवमिन्द्रेण दृष्टं ज्ञातमिन्द्रियम् । इन्द्रेण सृष्टमिन्द्रियम् । इन्द्रेण जुष्टं सेवितम्प्रीणितं वा इन्द्रियम् । रूढशब्दोऽयङ्कथञ्चिद्व्युत्पादितः । इन्द्रेण दुर्जयमिन्द्रियमिति साधयितुमाह । **इति करणमिति** ॥ इतिशब्द इत्यर्थः । **तदस्यास्त्यस्मिन्निति मतुप्** ॥ तदस्यास्तीति तदस्मिन्नस्तीति विग्रहे अस्तिसमानाधिकरणात्प्रथमान्तात् अस्य अस्मिन्निति चार्थे मतुप् स्यादित्यर्थः । उपावितौ । इतिशब्दो विषयविशेषलाभार्थः । तदाह । **भूमनिन्देति** ॥ श्लोकवार्तिकमिदम् । भूमा बहुत्वम् । यथा गोमान्, यवमान् । निन्दायां ककुदावर्तिनी कन्या । प्रशंसायां रूपवान् । नित्ययोगे क्षीरिणो वृक्षाः। अतिशायने उदरिणी कन्या । संसर्गे दण्डी छत्री । वृत्तिनियामकः संसर्गविशेषो विवक्षितः । तेन पुरुषी दण्ड इति नास्ति । **रसादिभ्यश्च** ॥ **मतुबिति** ॥ शेषपूरणमिदम् । उक्तविषये इति शेषः । पूर्वेणैव सिद्धे किमर्थमिदमित्यत आह । **अन्यमत्वर्थीयेति** ॥ 'अत इनिठनौ' इत्यादि निवृत्त्यर्थमित्यर्थः । रसादीन् पठति । रस रूपेत्यादि भावेत्यन्तम् । **गुणादिति** ॥ **एकाच इति** ॥ गणसूत्रम् । उदाहरति । **स्ववानिति** ॥ **गुणग्रहणमिति** ॥ गुणादित्येतत् रसादीनां

१८९६ । तसौ मत्वर्थे । (१-४-१९)

तान्तसान्तौ भसंज्ञौ स्तो मत्वर्थे प्रत्यये परे । 'वसोः सम्प्रसारणम्' (सू ४३५) । विदुष्मान् । 'गुणवचनेभ्यो मतुपो लुगिष्टः' (वा ३१८५) । शुक्लो गुणोऽस्यास्तीति शुक्लः पटः । कृष्णः ।

१८९७ । मादुपधायाश्च मतोर्वोऽयवादिभ्यः । (८-२-९)

मवर्णावर्णान्तान्मवर्णावर्णोपधाच्च यवादिवर्जात्परस्य मतोर्मस्य वः स्यात् । किंवान् । ज्ञानवान् । विद्यावान् । लक्ष्मीवान् । यशस्वान् । भास्वान् । यवादेस्तु यवमान् । भूमिमान् ।

१८९८ । झयः । (८-२-१०)

झयन्तान्मतोर्मस्य वः स्यात् । अपदान्तत्वान्न जश्त्वम् । विद्युत्वान् ।

१८९९ । संज्ञायाम् । (८-२-११)

षण्णां विशेषणमित्यर्थः । तेन गुणवाचकानामेव एषाङ्ग्रहणात् जलादिवाचकानां रसादिशब्दानां द्रव्यवाचिनाञ्च ग्रन्थादिशब्दानाम् इह न ग्रहणमिति भावः । 'रसिको नटः, स्पर्शिकं वारि' इत्यादि प्रयोगदर्शनात् इद सूत्रं भाष्ये प्रत्याख्यातम् । ननु विद्वच्छब्दान्मतुपि यजादिस्वादिपरकत्वाभावेन भत्वाभावात् 'वसोः सम्प्रसारणम्' इति कथं सम्प्रसारणमित्यत आह । **तसौ मत्वर्थे** ॥ मत्वर्थः प्रत्ययाक्षिप्तप्रातिपदिकविशेषणत्वात्तदन्तविधिमभिप्रेत्य आह । **तान्तसान्ताविति** ॥ तकारसकारान्तावित्यर्थः । **गुणवचनेभ्य इति** ॥ वार्तिकमिदम् । गुणे गुणवति च ये प्रसिद्धाः शुक्लादिशब्दाः त एव गृह्यन्ते । नतु रूपादिशब्दा अपि । तेन रूपं वस्त्रमित्यादि न भवति । अत्र यद्वक्तव्यं तदध्वरमीमांसाकौतूहले अरुणाधिकरणे प्रपञ्चितमस्माभिः । **मादुपधायाश्च** ॥ मात् उपधायाश्चेति च्छेदः । मादित्यावर्तते । म् च अश्चेति समाहारद्वन्द्वात्पञ्चम्येकवचनम् । मतुप्प्रत्ययाक्षिप्तप्रातिपदिकविशेषणत्वात्तदन्तविधिः । मवर्णान्तादवर्णान्तात्प्रातिपदिकात्परस्य मतोः मस्य वः स्यादित्येकोऽर्थः । मादित्युपधाविशेषणम् । मकारात्मिका अकारात्मिका च या उपधा ततः परस्य मतोर्मस्य वः स्यादित्यन्योऽर्थः । फलितमाह । **मवर्णेत्यादिना** ॥ मान्तादुदाहरति । **किंवानिति** ॥ किमस्यास्मिन्वास्तीति विग्रहः । एवमग्रेऽपि । अकारान्तादुदाहरति । **ज्ञानवानिति** ॥ अत्र तपरकरणाभावादाकारस्यापि ग्रहणमिति मत्वा आह । **विद्यावानिति** ॥ मोपधादुदाहरति । **लक्ष्मीवानिति** ॥ अदुपधादुदाहरति । **यशस्वानिति** ॥ 'तसौ मत्वर्थे' इति भत्वान्न रुत्वम् । आकारोपधादुदाहरति । **भास्वानिति** ॥ अथ विद्युत्वान् । मकारान्तत्वाभावान्मकाराकारोपधत्वाभावाच्च मादुपधाया इति वत्वाप्राप्तावाह । **झयः** ॥ **अपदान्तत्वादिति** ॥ 'तसौ मत्वर्थे' इति भत्वेन पदत्वबाधादिति भावः । **संज्ञायाम्** ॥ अहीवतीत्यादिनदीविशेषस्य

मतोर्मस्य वः स्यात् । अहीवती । मुनीवती । 'शरादित्वात्' दीर्घः ।

१९०० । आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती । (८-२-१२)

एते षट् संज्ञायां निपात्यन्ते । आसनशब्दस्यासन्दीभावः । आसन्दीवान्ग्रामः । अन्यत्रासनवान् । अस्थिशब्दस्याष्ठीभावः । अष्ठीवान् । अस्थिमानन्यत्र । चक्रशब्दस्य चक्रीभावः । चक्रीवान्नाम राजा । चक्रवानन्यत्र । कक्ष्यायाः सम्प्रसारणम् । कक्षीवान्नामर्षिः । कक्ष्यावानन्यत्र । लवणशब्दस्य रुमण्भावः । रुमण्वान्नाम पर्वतः । लवणवानन्यत्र । चर्मणो नलोपाभावो णत्वं च । चर्मण्वती नाम नदी । चर्मवत्यन्यत्र ।

१९०१ । उदन्वानुदधौ च । (८-२-१३)

उदकस्योदन्भावो मतावुदधौ संज्ञायां च । उदन्वान्समुद्रः ऋषिश्च ।

१९०२ । राजन्वान्सौराज्ये । (८-२-१४)

राजन्वती भूः । राजवानन्यत्र ।

१९०३ । प्राणिस्थादातो लजन्यतरस्याम् । (५-२-९६)

चूडालः—चूडावान् । 'प्राणिस्थात्' किम् । शिखावान्दीपः । 'आतः' किम् । हस्तवान् । 'प्राण्यङ्गादेव' (वा ३१८९) । नेह । मेधावान् । प्रत्यय-

---

नगरीविशेषस्य वा संज्ञा । **शरादित्वादिति** ॥ 'शरादीनाञ्च' इति दीर्घ इत्यर्थः । **आसन्दीवत्** ॥ समाहारद्वन्द्वे ह्रस्वत्वं निपात्यन्ते इति कक्षीभावादिकमेवात्र निपात्यते । वत्वन्तु संज्ञायामिति सिद्धम् । कक्ष्यायाः सम्प्रसारणमिति निपात्यत इति शेषः । 'न सम्प्रसारणे' इति सूत्रभाष्ये तु 'कक्ष्यायाः संज्ञायां मतौ सम्प्रसारणं वक्तव्यम्' इत्यारब्धम् । अतोऽत्र सूत्रे कक्षीवच्छब्दपाठः अनार्ष इत्याहुः । **उदन्वानुदधौ च** ॥ **उदधौ संज्ञायाञ्चेति** ॥ वस्तुतस्तु उदन्वांश्चेत्येव सूत्रयितुमुचितम् । संज्ञायामित्यनुवृत्त्यैव समुद्रेऽपि उदन्वच्छब्दस्य सिद्धत्वात् । **राजन्वान् सौराज्ये** ॥ सु शोभनो राजा यस्य देशस्य सः सुराजा, तस्य भावः सौराज्यम् । तस्मिन्नर्थे राजन्शब्दात् मतुपि 'मादुपधायाः' इति वत्वं सिद्धम् । नलोपाभावो निपात्यते । **प्राणिस्थात्** ॥ आदन्तात्प्राणिस्थवाचिनः शब्दात् मत्वर्थे लच् वा स्यादित्यर्थः । **शिखावान् दीप इति** ॥ अत्र शिखाशब्दस्य दीपाग्रवाचिनः प्राणिस्थवाचित्वाभावात् न लजिति भावः । **प्राण्यङ्गादेवेति** ॥ भाष्ये तथा वचनादिति भावः । ननु लचश्चित्करणं व्यर्थम् । चित इत्यन्तोदात्तत्वस्य प्रत्ययस्वरेणैव सिद्धेरित्यत आह । **प्रत्ययस्वरेणेति** ॥

स्वरेणैव सिद्धे अन्तोदात्तत्वे चूडालोऽसीत्यादौ 'स्वरितो वानुदात्ते पदादौ' (सू ३६५९) इति स्वरितबाधनार्थश्चकारः ।

१९०४ । सिध्मादिभ्यश्च । (५-२-९७)

लज्वा स्यात् । सिध्मलः—सिध्मवान् । अन्यतरस्यांग्रहणं मतुप्समुच्चयार्थं, न तु प्रत्ययविकल्पार्थम् । तेन आकारान्तेभ्य इनिठनौ न । 'वातदन्तबल ललाटानामूङ् च' (ग सू ११५) । वातूलः ।

१९०५ । वत्सांसाभ्यां कामबले । (५-२-९८)

आभ्यां लज्वा स्याद्यथासङ्ख्यं कामवति बलवति चार्थे । वत्सलः । अंसलः ।

१९०६ । फेनादिलच्च । (५-२-९९)

चाल्लच् । अन्यतरस्यांग्रहणं मतुप्समुच्चयार्थमनुवर्तते । फेनिलः—फेनलः—फेनवान् ।

चूडालोऽसीति ॥ तत्र असीत्येतत् 'तिङ्ङतिङः' इति निहतम् । चूडालात्सो रुत्वे उत्वे तस्य सुप्त्वेनानुदात्तस्याद्गुणस्य 'एकादेश उदात्तेन' इत्युदात्तत्वे तस्य परेण पूर्वरूपैकादेशे तस्य पदाद्यनुदात्तेन सहैकादेशत्वात् 'स्वरितो वाऽनुदात्ते' इत्यस्य प्राप्तौ तन्निवृत्त्यर्थं चित्करणमित्यर्थः । **सिध्मादिभ्यश्च** ॥ **लज्वा स्यादिति** ॥ मत्वर्थे इति शेषः । **अन्यतरस्यामिति** ॥ पूर्वसूत्रादन्यतरस्यामित्यनुवृत्तं न लच्प्रत्ययविकल्पार्थकम् । किन्तु मतुप्प्रत्ययसमुच्चयार्थकमेव । अन्यतरस्यामित्यस्याव्ययत्वेनानेकार्थकत्वात् । ततश्च 'सिध्मादिभ्यः' इति लच् मतुप् च स्यादिति लभ्यते । नन्वन्यतरस्यामित्यस्यात्र लच्प्रत्ययविकल्पार्थकत्वेऽपि तदभावे मतुप् सिद्ध इति वाच्यम् । लजभावे मतुबेव भवति, नतु 'अत इनिठनौ' इत्येतदर्थं समुच्चयविधानात् । तदाह । **तेनेति** ॥ सिध्मादिषु ये अकारान्ताः तेभ्य इनिठनौ नेत्यर्थः । एतत्सर्वं भाष्ये स्पष्टम् । सिध्म, मणि, विजय, पांसु, हनु, पार्ष्णि, इत्यादयः सिध्मादिषु पठिताः । एवञ्च लज्वा स्यादिति विवरणवाक्ये वाशब्दश्चार्थे । इदमन्यतरस्याङ्ग्रहणमुत्तरसूत्रेषु सर्वत्र मत्वर्थीयविधिष्वनुवर्तते, नतु रूढशब्देषु । अतो न तेषु मतुप्समुच्चयः इत्यास्तां तावत् । **वातदन्तबलललाटानामूङ् चेति** ॥ सिध्मादिगणसूत्रमिदम् । एभ्यो लच् प्रकृतेरूङ्चादेशः । ङकारस्तु आदेशत्वसूचनार्थः । अन्यथा प्रत्ययत्वशङ्का स्यात् । वातूलः, एवं दन्तूलः, बलूलः, ललाटूलः । **वत्सांसाभ्यां कामबले** ॥ **लज्वा स्यादिति** ॥ मत्वर्थे इति शेषः । कामबलशब्दौ तद्वति लाक्षणिकावित्यभिप्रेत्य आह । **कामवति बलवति चेति** ॥ **फेनादिलच्च** ॥ मत्वर्थे इति शेषः । **चाल्लजिति** ॥ सन्निहितत्वादिति भावः । नन्वेवं सति मतुप् नैव स्यादित्यत आह । **अन्यतरस्याङ्ग्रहणमिति** ॥ सिध्मादिसूत्रे व्याख्यातमिदम् ।

१९०७ । लोमादिपामादिपिच्छादिभ्यः शनेलचः । (५-२-१००)

लोमादिभ्यः शः । लोमशः—लोमवान् । रोमशः—रोमवान् । 'पामादिभ्यो नः' । पामनः । 'अङ्गात्कल्याणे' (ग सू ११८) । अङ्गना । 'लक्ष्म्या अच्च' (ग सू १२१) । लक्ष्मणः । 'विष्वगित्युत्तरपदलोपश्चाकृतसन्धेः' (वा ३१९४) । विषुणः । 'पिच्छादिभ्य इलच् । पिच्छिलः—पिच्छवान् । उरसिलः—उरस्वान् ।

१९०८ । प्रज्ञाश्रद्धार्चाभ्यो णः । (५-२-१०१)

प्राज्ञो व्याकरणम् । प्राज्ञा । श्राद्धः । आर्चः । 'वृत्तेश्च' (वा ३१९५) वार्तः ।

१९०९ । तपःसहस्राभ्यां विनीनी । (५-२-१०२)

लोमादि ॥ श न इलच् एते त्रिभ्यो गणेभ्यो यथासङ्ख्यं स्युर्मत्वर्थे । **अङ्गात्कल्याणे इति** ॥ पामादिगणसूत्रम् । कल्याणं सुन्दरं तद्विशेषकादङ्गशब्दात् मत्वर्थे नप्रत्यय इत्यर्थः । **अङ्गनेति** ॥ कल्याणानि अङ्गानि अस्याः इति विग्रहः । 'लक्ष्म्या अच्च' इत्यपि पामादिगणसूत्रम् । लक्ष्मीशब्दात् मत्वर्थे नप्रत्ययः स्यात् प्रकृतेरकारोऽन्तादेशश्च । **लक्ष्मण इति** ॥ लक्ष्मीरस्यास्तीति विग्रहः । नप्रत्यये प्रकृतेरकारे अन्तादेशे णत्वम् । **विष्वगिति** ॥ इदमपि पामादिगणसूत्रमिति केचित् । भाष्ये तु नप्रकरणे इदं वार्तिकं पठितम् । विषु इत्यव्यय सर्वतः इत्यर्थे । विषु अञ्चतीति विष्यङ् । सर्वतो गामीत्यर्थः इति धूर्तस्वामी । विषु इति तिर्यगर्थे इति भवस्वामी । पराङ्मुख इति भट्टभास्करः । विषु अञ्च् इत्यस्मात् अकृतसन्धेर्मत्वर्थे नप्रत्ययः स्यात्, उत्तरपदलोपश्चेत्यर्थः । **विषुण इति** ॥ विष्वङ् अस्यास्तीति लौकिक विग्रहः । विषु, अञ्च्, इत्यलौकिकविग्रहवाक्यम् । कृतसन्धेर्नप्रत्यये तु विष्वक्शब्दे उत्तरपदस्य लोपे 'लोपो व्योः' इति यलोपे विषुण इति स्यादिति भावः । समर्थानामित्यस्यापवादोऽयम् । **प्रज्ञाश्रद्धार्चाभ्यो णः** ॥ प्रज्ञा, श्रद्धा, अर्चा, एभ्यो मत्वर्थे णप्रत्ययः स्यादित्यर्थः । **प्राज्ञो व्याकरणमिति** ॥ प्रज्ञानं प्रज्ञा । स्त्रियामित्यधिकारे प्रपूर्वकात् ज्ञाधातोः 'आतश्चोपसर्गे' इति भावे अङ् । प्रज्ञा अस्यास्तीति विग्रहः । उपसर्जनभूतामपि प्रज्ञानक्रियां प्रति व्याकरणस्य कर्मत्वाद्द्वितीया । कृयोगषष्ठी नात्र प्रवर्तते । 'कर्तृकर्मणोः कृति' इत्यत्र कृद्ग्रहणेन तद्धितयोगे तन्निषेधात् । अत्र यद्वक्तव्यं तत्कर्तृकर्मणोः कृतीत्यत्र प्रपञ्चितम् । नच प्रजानातीति प्रज्ञः 'इगुपध' इति कः । प्रज्ञशब्दात् स्वार्थे अणि प्राज्ञ इति सिध्यतीति शङ्क्यम् । तथासति स्त्रियां ङीप्प्रसङ्गात् । तदाह । **प्राज्ञेति** । **श्राद्ध इति** ॥ श्रद्धा अस्यास्तीति विग्रहः । **आर्च इति** ॥ अर्चा अस्यास्तीति विग्रहः । **वृत्तेश्चेति** ॥ वार्तिकम् । मत्वर्थे णप्रत्यय इति शेषः । **वार्त इति** ॥ वृत्तिरस्यास्तीति विग्रहः । **तपःसहस्राभ्याम्** ॥ विनिश्च इनिश्चेति द्वन्द्वः । मत्वर्थे इति शेषः । यथासङ्ख्यमन्वयः । विनिप्रत्यये इनिप्रत्यये च नकारादिकारौ उच्चारणार्थौ ननु नकारयोः इत्संज्ञा कुतो

विनीन्योरिकारो नकारपरित्राणार्थः । तपस्वी । सहस्री । असन्तत्वाद्-दन्तत्वाच्च सिद्धे पुनर्वचनमणा बाधा मा भूदिति । सहस्रात्तु ठनोऽपि बाधनार्थम् ।

१९१० । अण् च । (५-२-१०३)

योगविभाग उत्तरार्थः । तापसः । साहस्रः । 'ज्योत्स्नादिभ्य उपसङ्ख्यानम्' (वा ३१९७) । ज्यौत्स्नः । तामिस्रः ।

१९११ । सिकताशर्कराभ्यां च । (५-२-१०४)

सैकतो घटः । शार्करः ।

१९१२ । देशे लुबिलचौ च । (५-२-१०५)

चादण्मतुप् च । सिकताः सन्त्यस्मिन्देशे सिकताः—सिकतिलः—सैकतः—सिकतावान् । एवं शर्करेत्यादि ।

न स्यात् । नच प्रयोजनाभावः, नित्स्वरस्यैव फलत्वादित्यत आह । **विनीन्योरिकारो नकारपरित्राणार्थ इति** ॥ तथा च उपदेशे अन्त्यत्वाभावान्नेत्संज्ञेति भावः । यद्यपि 'अस्मायामेधा' इत्यसन्तत्वादेव तपःशब्दाद्विन्सिद्धः । सहस्रशब्दात्तु 'अत इनिठनौ' इत्येवेन्सिद्धः । तथापि विशिष्य उत्तरसूत्रविहितेन अणा असन्तादन्तलक्षणयोः विनीन्योः सामान्यविहितयोः बाधो माभूदिति विशिष्येह तपस्सहस्रशब्दान्तयोः विधानम् । सहस्रशब्दात्तु अदन्तलक्षणठनोऽपि बाधनार्थमिह अन्विधानम् । एतत्समाधानं क्वचिन्मूलपुस्तकेषु दृश्यते । **अण् च** ॥ तपस्सहस्राभ्यां मत्वर्थे इति शेषः । ननु तपःसहस्राभ्यां विनीन्यणः इत्येकमेव सूत्रमस्तु । नच तपःसहस्राभ्यां विनीन्योर्यथासङ्ख्यार्थं पृथक्सूत्रकरणम् । अन्यथा त्रयोऽपि प्रत्यया द्वाभ्यां स्युरिति वाच्यम् । 'तपःसहस्राभ्यामण्विनीनी' इति सूत्रकरणे भिन्नविभक्त्युच्चारणादेव अणः उभयसम्बन्धस्य विनीन्योर्यथासङ्ख्यत्वस्य च सिद्धेरित्यत आह । **योगविभाग उत्तरार्थ इति** ॥ उत्तरसूत्रे अण एवानुवृत्त्यर्थ इत्यर्थः । **ज्यौत्स्न इति** ॥ शुक्लपक्ष इति शेषः । ज्योत्स्ना चन्द्रिका । सा अस्यास्तीति विग्रहः । **तामिस्र इति** ॥ कृष्णपक्ष इति शेषः । तमिस्राः तमोयुक्ता रात्रयः । ता अस्य सन्तीति विग्रहः । ज्योत्स्नादित्वादण् । **सिकताशर्कराभ्याञ्च** ॥ मत्वर्थे अणिति शेषः । **सैकतो घट इति** ॥ सिकता अस्य सन्तीति विग्रहः । देशे लुपो वक्ष्यमाणत्वात् घट इति विशेष्यम् । "अप्सुमनःसमासिकतावर्षाणाम्बहुत्वञ्च" इति लिङ्गानुशासनसूत्रात् सिकताशब्दो नित्यम्बहुवचनान्तः । **देशे लुबिलचौ च** ॥ पूर्वसूत्रविहितस्याणो लुप् इलच स्यादित्यर्थः । **चादणिति** ॥ सन्निहितत्वादिति भावः । तर्हि अपवादेन मुक्ते उत्सर्गस्याप्रवृत्तेर्मतुप् नैव स्यादित्यत आह । **मतुप् चेति** ॥ समुच्चयार्थकान्यतरस्याङ्ग्रहणानुवृत्तेरिति भावः । **सिकता इति** ॥ सिकताशब्दात् नित्यम्बहुवचनान्तादणो लुपि प्रातिपदिकावयवत्वात् सुपो लुकि युक्तवद्भावाद्विशेष्यस्य देशस्य एकत्वेऽपि बहुवचनमिति भावः ।

१९१३ । दन्त उन्नत उरच् । (५-२-१०६)

उन्नता दन्ताः सन्त्यस्य दन्तुरः ।

१९१४ । ऊषसुषिमुष्कमधो रः । (५-२-१०७)

ऊषरः । सुषिरः । मुष्कोऽण्डः मुष्करः । मधु माधुर्यम्—मधुरः । रप्रकरणे 'खमुखकुञ्जेभ्य उपसङ्ख्यानम्' (वा ३१९८) । खरः । मुखरः । कुञ्जो हस्तिहनुः । कुञ्जरः । 'नगपांसुपाण्डुभ्यश्च' (वा ३१९९) । नगरम् । पांसुरः । पाण्डुरः । पाण्डरशब्दस्त्वव्युत्पन्न एव । 'कच्छ्वा ह्रस्वत्वं च' (वा ३२००) । कच्छुरः ।

१९१५ । द्युद्रुभ्यां मः । (५-२-१०८)

द्युमः । द्रुमः ।

१९१६ । केशाद्वोऽन्यतरस्याम् । (५-२-१०९)

'हयवरट्' इति सूत्रे 'एका च सिकता तैलादाने असमर्था' इति भाष्ये प्रयोगात् सिकताशब्दः एकवचनान्तोऽप्यस्तीति लिङ्गानुशासने मूलकारो वक्ष्यति । **दन्त उन्नत उरच्** ॥ उन्नतविशेषणकाद्दन्तशब्दात् मत्वर्थे उरच् स्यादित्यर्थः । उन्नत इति प्रकृतिविशेषणम् । दन्त इति सप्तमी पञ्चम्यर्थे । **ऊषसुषि** ॥ ऊष, सुषि, मुष्क, मधु, एषां समाहारद्वन्द्वात्पञ्चम्येकवचनम् । सौत्रं पुंस्त्वम् । एभ्यो मत्वर्थे रप्रत्ययः स्यादित्यर्थः । **ऊषर इति** ॥ ऊषः क्षारमृत्तिकाविशेषोऽस्यास्तीति विग्रहः । **सुषिर इति** ॥ सुषिः बिलं अस्यास्तीति विग्रहः । मधुशब्दः क्षौद्रे द्रव्ये, माधुर्यात्मकरसविशेषे च गुणे वर्तते । तत्र रसविशेषवाचिन एवात्र ग्रहणमित्याह । **मधु माधुर्यमिति** ॥ तथा भाष्यादिति भावः । अन्यथा मधुद्रव्यवति घटेऽपि मधुरपदप्रयोगः स्यात् । खरो गर्दभः, धिष्ण्यो वा । मुखरः शब्दं कुर्वन् । कुञ्जरो हस्ती । रूढशब्दा एते । **नगपांस्विति** ॥ वार्तिकमिदम् । नगरमिति जातिविशेषवाची । अत एव नगरीति ङीष् । **पांसुर इति** ॥ पांसुः अस्यास्तीति विग्रहः । **पाण्डुर इति** ॥ पाण्डुः शुक्लवर्णः, सः अस्यास्तीति विग्रहः । कथं पाण्डरशब्द इत्यत आह । **पाण्डरशब्दस्त्वति** ॥ "हरिणः पाण्डरः पाण्डुः" इत्यमरः । **कच्छ्वा इति** ॥ वार्तिकमिदम् । कच्छूशब्दाद्रप्रत्ययः, प्रकृतेर्ह्रस्वश्च अन्तादेश इत्यर्थः । कच्छुरः शुनां रोगविशेषः । **द्युद्रुभ्यां मः** ॥ 'दिव उत्' इति कृतोत्वस्य दिव्शब्दस्य द्यु इति निर्देशः । दिव्शब्दात् द्रुशब्दाच्च मप्रत्ययः स्यादित्यर्थः । **द्युमः द्रुम इति** ॥ रूढशब्दावेतौ । **केशाद्वोऽन्यतरस्याम्** ॥ मत्वर्थे इति शेषः । नन्विहान्यतरस्याङ्ग्रहणं व्यर्थम् । समर्थानामिति वाग्रहणेनैव वाक्यस्य सिद्धत्वात् । नच महाविभाषायाः अपवादेन मुक्ते औत्सर्गिकस्याप्रवृत्तेः 'पारेमध्ये षष्ठ्या वा' इत्युक्तत्वादिह मतुपोऽप्रवृत्त्यापत्तौ तत्प्रवृत्त्यर्थमन्यतरस्याङ्ग्रहणमिति वाच्यम् । प्राणिस्थादिति

प्रकृतेनान्यतरस्यांग्रहणेन मतुपि सिद्धे पुनर्ग्रहणमिनिठनोः समावेशार्थम्। केशवः—केशी—केशिकः—केशवान्। 'अन्येभ्योऽपि दृश्यते' (वा ३२१०)। मणिवो नागविशेषः। हिरण्यवो निधिविशेषः। 'अर्णसो लोपश्च' (वा ५०५३)। अर्णवः।

१९१७। गाण्ड्यजगात्संज्ञायाम्। (५-२-११०)

ह्रस्वदीर्घयोर्यणा तन्त्रेण निर्देशः। गाण्डिवम्। गाण्डीवमर्जुनस्य धनुः। अजगवं पिनाकः।

१९१८। काण्डाण्डादीरन्नीरचौ। (५-२-१११)

काण्डीरः। आण्डीरः।

१९१९। रजःकृष्यासुतिपरिषदो वलच्। (५-२-११२)

रजस्वला स्त्री। कृषीवलः। 'वले' (सू १०४०) इति दीर्घः। आसुतीवलः। शौण्डिकः। परिषद्वलः। 'पर्षत्' इति पाठान्तरम्। पर्षद्वलम्। 'अन्येभ्योऽपि दृश्यते' (वा ३२१०)। भ्रातृवलः। पुत्रवलः। शत्रुवलः। 'वले' (सू १०४०) इत्यत्र 'संज्ञायाम्' इत्यनुवृत्तेर्नेह दीर्घः।

सूत्रादन्यतरस्याङ्ग्रहणस्य समुच्चयार्थकस्यानुवृत्त्यैव तत्सिद्धेरित्यत आह। **प्रकृतेनेति॥ इनिठनोरिति॥** इनिठनोरपीत्यर्थः। अन्यथा सिध्मादिभ्यश्चेत्यत्रैव मतुबेव समुच्चीयेत नत्विनिठनाविति भावः। तथाच वप्रत्यये इनिठनोर्मतुपि च चत्वारि रूपाणीत्याह। **केशव इत्यादि। अन्येभ्योऽपीति॥** वार्तिकमिदम्। केशादन्येभ्योऽपि मत्वर्थे वो दृश्यते इत्यर्थः। **अर्णस इति॥** वार्तिकमिदम्। अर्णसो वप्रत्ययः प्रकृतेः सकारश्चान्तादेश इत्यर्थः। **अर्णव इति॥** अर्णः जलम्। तत्प्रभूतमस्तीति विग्रहः। इदन्तु वार्तिकम्भाष्ये न दृश्यते। **गाण्ड्यजगात्संज्ञायाम्॥ ह्रस्वदीर्घयोरिति॥** गाण्डिशब्दस्य गाण्डीशब्दस्य च कृतयणोः गाण्ड्य इति युगपन्निर्देशः। 'ख्यत्यात्परस्य' इत्यत्र खितिशब्दयोः खीतीशब्दयोश्च यथेत्यर्थः। ततश्च गाण्डिशब्दात् गाण्डीशब्दात् अजगशब्दाच्च मत्वर्थे यथासङ्ख्यं ईरन् ईरच्प्रत्ययश्च स्यादित्यर्थः। रूढशब्दत्वादिह न मतुप्समुच्चयः। **काण्डाण्डादीरन्नीरचौ॥** काण्ड, आण्ड, अभ्यां ईरन्, ईरच् इति प्रत्ययौ मत्वर्थे स्त इत्यर्थः। **रजःकृषि॥** रजस्, कृषि, आसुति, परिषद् एभ्यो मत्वर्थे वलच् स्यादित्यर्थः। **आसुतीवल इति॥** 'षुञ् अभिषवे'। आङ्पूर्वात् स्त्रियां क्तिन्। 'वले' इति दीर्घः। **अन्येभ्योऽपीति॥** वार्तिकमिदम्। 'रजःकृषि' इत्यादिसूत्रोपात्तादन्येभ्योऽपि वलच् दृश्यते इत्यर्थः। भ्रातृवलः 'ढ्लोपे' इत्यतः अण इत्यनुवृत्तेः 'वले' इति न दीर्घः। पुत्रवल

---

१. भाष्ये न दृश्यते—इति शेखरकृत्। रूपसिद्धिस्तु पृषोदरादित्वात्।

१९२० । दन्तशिखात्संज्ञायाम् । (५-२-११३)

दन्तावलो हस्ती । शिखावलः केकी ।

१९२१ । ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः । (५-२-११४)

मत्वर्थे निपात्यन्ते । ज्योतिष उपधालोपो नश्च प्रत्ययः । ज्योत्स्ना । तमस उपधाया इत्वं रश्च । तमिस्रा । स्त्रीत्वमतन्त्रम् । तमिस्रम् । शृङ्गादिनच् । शृङ्गिणः । ऊर्जसो वलच् । तेन बाधा माभूदिति विनिरपि । ऊर्जस्वी । ऊर्जस्वलः । 'ऊर्जोऽसुगागमः' इति वृत्तिस्तु चिन्त्या । 'ऊर्जस्वतीः' इतिवदसुन्नन्तत्वेनैवोपपत्तेः । गोशब्दान्मिनिः । गोमी । मलशब्दादिनच् । मलिनः । ईमसच्च । मलीमसः ।

१९२२ । अत इनिठनौ । (५-२-११५)

दण्डी—दण्डिकः ।

इत्यादौ 'वले' इति दीर्घमाशङ्क्य आह । **वले इत्यत्रेति** ॥ **दन्तशिखात्संज्ञायाम्** ॥ समाहारद्वन्द्वात्पञ्चमी । दन्तशब्दात् शिखाशब्दाच्च मत्वर्थे वलच् स्यात्संज्ञायामित्यर्थः । **ज्योत्स्ना** ॥ **ज्योतिष इति** ॥ ज्योतिरवयवाः ज्योतींषि, तान्यस्यां सन्तीति विग्रहे ज्योतिष्शब्दात् नप्रत्ययः उपधाभूतस्य इकारस्य लोपश्च निपात्यते । सति च इकारस्य लोपे इणः परत्वाभावात् षत्वनिवृत्तौ ज्योत्स्नेति रूपम् । "चन्द्रिका कौमुदी ज्योत्स्ना" इत्यमरः । **तमस इति** ॥ तमः अस्यास्तीति विग्रहे तमस्शब्दात् रक्प्रत्ययः । उपधाभूतस्य मकारादकारस्य इत्वञ्च निपात्यते इत्यर्थः । "तमिस्रा तामसी रात्रिः" इत्यमरः । ननु 'तमिस्रा' इति स्त्रीलिङ्गनिर्देशात् तमिस्रङ्गहमिति कथमित्यत आह । **स्त्रीत्वमतन्त्रमिति** ॥ निपात्यते इति शेषः । **शृङ्गिण इति** ॥ शृङ्गमस्यास्तीति विग्रहः । इनचि णत्वम् । **ऊर्जसो वलजिति** ॥ निपात्यते इति शेषः । ऊर्जस इत्यव्युत्पन्नं प्रातिपदिकम् । ननु 'अस्मायामेधा' इति विनिना सिद्धेरूर्जस्विन्निति निपातनं व्यर्थमित्यत आह । **तेनेति** ॥ विशेषविहितेन वलचा अस्मायेति सामान्यविहितस्य विनो निवृत्तिर्माभूदित्येतदर्थं विनो निपातनमित्यर्थः । **ऊर्जस्वल इति** ॥ ऊर्जशब्दाद्वलचि प्रकृतेरसुगागम इति वृत्तिग्रन्थः अनुपपन्न इत्यर्थः । कुत इत्यत आह । **ऊर्जस्वतीरितिवदिति** ॥ ऊर्जस्वतीरित्यत्र वलभावेन तत्सन्नियोगशिष्टस्य असुगागमस्याप्रसक्तेः तत्र ऊर्जस् इत्यव्युत्पन्नं प्रातिपदिकमवश्यमभ्युपेयम् । तेनैव ऊर्जस्विन्नूर्जस्वलयोः वलज्मात्रनिपातनोपपत्तेरित्यर्थः । **ईमसच्चेति** ॥ मलशब्दात् निपात्यते इति शेषः । **अत इनिठनौ** ॥ अदन्तान्मत्वर्थे इनिठन् एतौ स्त इत्यर्थः । समुच्चयार्थकान्यतरस्याङ्ग्रहणानुवृत्तेर्मतुबपि भवति । "एकाक्षरात्कृतो जातेः सप्तम्याश्च न तौ स्मृतौ" इति भाष्यम् । एकाक्षरात् स्ववान्, कृतः कारकवान्, जातेः

१९२३ । व्रीह्यादिभ्यश्च । (५-२-११६)

व्रीही–व्रीहिकः । न च सर्वेभ्यो व्रीह्यादिभ्य इनिठनाविष्येते । किं तर्हि । 'शिखामालासंज्ञादिभ्य इनिः, यवखलादिभ्य इकः' (वा ३२०९) । अन्येभ्य उभयम् ।

१९२४ । तुन्दादिभ्य इलच्च । ५-२-११७)

चादिनिठनौ मतुप्च । तुन्दिलः–तुन्दी–तुन्दिकः–तुन्दवान् । उदर, पिचण्ड, यव, व्रीहि, 'स्वाङ्गाद्विवृद्धौ' (ग. सू. १२४) 'विवृद्ध्युपाधिकात्स्वाङ्गवाचिन इलजादयः स्युः । विवृद्धौ कर्णौ यस्य स कर्णिलः–कर्णी–कर्णिकः–कर्णवान् ।

१९२५ । एकगोपूर्वाट्ठञ्नित्यम् । (५-२-११८)

एकशतमस्यास्तीति ऐकशतिकः । ऐकसहस्रिकः । गौशतिकः । गौसहस्रिकः ।

१९२६ । शतसहस्रान्ताच्च निष्कात् । (५-२-११९)

निष्कात्परौ यौ शतसहस्रशब्दौ तदन्तात्प्रातिपदिकाट्ठञ्स्यान्मत्वर्थे । नैष्कशतिकः । नैष्कसहस्रिकः ।

वृक्षवान्, सप्तम्यां दण्डाः अस्यां शालायां सन्ति दण्डवती, इदं प्रायिकम् । तेन "कार्यी–कार्यिकः, तण्डुली–तण्डुलिकः इत्यादि सिद्धम्" इति भाष्ये स्पष्टम् । **व्रीह्यादिभ्यश्च** ॥ मत्वर्थे इनिठनौ इति शेषः । **शिखामालेत्यादि** ॥ वार्तिकमिदम् । शिखा, माला, संज्ञा, वीणा, बडबा, बालका, पताका, वर्मन्, शर्मन् एभ्यः इनिरेव नतु ठनित्यर्थः । **यवखलेति** ॥ यवखल नौ कुमारी एभ्यः ठनेव, नत्विनिरित्यर्थः । परिशिष्टेभ्यस्तु व्रीह्यादिगणपठितेभ्यः उभावित्यर्थसिद्धम् । इदं वृत्तौ स्पष्टम् । **तुन्दादिभ्य इलच्च** ॥ **मतुप्चेति** ॥ समुच्चयार्थकान्यतरस्याङ्ग्रहणानुवृत्तेरिति भावः । उदरादयश्चत्वारस्तुन्दादिगणपठिताः । **स्वाङ्गाद्विवृद्धाविति** ॥ गणसूत्रमिदम् । वृद्धविषयात् स्वाङ्गादिलच् इनिठनौ मतुप्चेत्यर्थः । **कर्णिल इति** ॥ वृद्धौ कर्णौ अस्येति विग्रहः । **एकगोपूर्वाट्ठञ्नित्यम्** ॥ एकपूर्वात् गोपूर्वाच्च नित्यण्ठञ् स्यादित्यर्थः । यद्यपि नित्यग्रहणाभावेऽपि ठञा इनिठनोर्निवृत्तिः सिद्ध्यति । तथापि समुच्चयार्थकान्यतरस्याङ्ग्रहणानुवृत्त्या मतुप् समुच्चीयेत । तन्निवृत्त्यर्थं नित्यग्रहणम् । **ऐकशतिक इति** ॥ 'पूर्वकाल' इति समासः । 'सङ्ख्यायाः संवत्सर' इत्युत्तरपदवृद्धिस्तु न । तत्र प्रतिपदोक्तताद्धितार्थसमासस्यैव ग्रहणात् । **शतसहस्र** ॥ **निष्कात् पराविति** ॥ असामर्थ्येऽपि सौत्रत्वात् समास इति भावः ।

१९२७ । रूपादाहतप्रशंसयोर्यप् । (५-२-१२०)

आहतं रूपमस्यास्तीति रूप्यः कार्षापणः । प्रशस्तं रूपमस्यास्तीति रूप्यो गौः । 'आहत—' इति किम् । रूपवान् । 'अन्येभ्योऽपि दृश्यते' (वा ३२१०) । हिम्याः पर्वताः । गुण्याः ब्राह्मणाः ।

१९२८ । अस्मायामेधास्रजो विनिः । (५-२-१२१)

यशस्वी—यशस्वान् । मायावी । व्रीह्यादिपाठादिनिठनौ । मायी—मायिकः । क्विन्नन्तत्वात्कुः । स्रग्वी । 'आमयस्योपसङ्ख्यानं दीर्घश्च' (वा ३२१३) । आमयावी । 'शृङ्गवृन्दाभ्यामारकन्' (वा ३२१४) । शृङ्गारकः । वृन्दारकः । 'फलबर्हाभ्यामिनच्' (वा ३२१५) । फलिनः । बर्हिणः । 'हृदयाच्चालुरन्यतरस्याम्' (वा ३२१६) । इन्ठनौ मतुप्च । हृदयालुः—हृदयी—हृदयिकः—हृदयवान् । 'शीतोष्णतृप्रेभ्यस्तदसहने—' (वा ३२१७) । शीतं न सहते शीतालुः । उष्णालुः । 'स्फायितञ्चि' इति रक् । तृप्रः पुरोडाशः, तं न सहते

रूपादाहत ॥ आहतेति भावे क्तः । आहतविशेषणकात् प्रशंसाविशेषणकाच्च रूपशब्दात् मत्वर्थे यप् स्यादित्यर्थः । **आहतं रूपमिति** ॥ आहतेन निष्पन्नं स्वरूपं यस्येति विग्रहे रूपशब्दाद्यपि रूप्यशब्द इत्यर्थः । **रूप्यः कार्षापण इति** ॥ परिमाणविशिष्ट रजत-सुवर्णादिर्मुद्रिकाविशेषयुक्तः कार्षापण इत्युच्यते । तत्स्वरूपञ्च स्वर्णकारकृताहननिष्पाद्यमिति बोध्यम् । **रूप्यो गौरिति** ॥ प्रशस्तरूपसम्पन्न इत्यर्थः । **अन्येभ्योऽपीति** ॥ वार्तिकमिदम् । रूपशब्दादन्येभ्योऽपि यप् दृश्यत इत्यर्थः । **हिम्याः पर्वताः इति** ॥ भूम्नि यप् बहुळं हिम-मेष्वस्तीति विग्रहः । **गुण्या ब्राह्मणा इति** ॥ प्रशंसायां यप् । प्रशस्तगुणसम्पन्ना इत्यर्थः । **अस्मायामेधास्रजो विनिः** ॥ असिस्रनेन असन्तं विवक्षितम् । असन्त, माया, मेधा, स्रज्, एभ्यः विनिप्रत्ययः स्यादित्यर्थः । प्रत्यये नकारादिकार उच्चारणार्थः । **यशस्वीति** ॥ 'तसौ मत्वर्थे' इति भत्वान्न रुत्वमिति भावः । **यशस्वानिति** ॥ 'एकगोपूर्वात्' इति सूत्रे नित्यग्रहणेन निवृत्तमपि समुच्चयार्थमन्यतरस्यांग्रहणमिह मण्डूकप्लुत्या अनुवर्तते । 'तसौ मत्वर्थे' इति सूत्रे यशस्वानिति भाष्योदाहरणादिति भावः । स्रग्वीत्यत्र 'व्रश्च' इति षत्वमाशङ्क्य आह । **क्विन्नन्तत्वादिति । आमयस्येति** ॥ आमयशब्दात् मत्वर्थे विनिः, प्रकृतेर्दीर्घश्चेत्यर्थः । **शृङ्गवृन्दाभ्यामिति, फलबर्हाभ्यामिति, हृदयाच्चालुरन्यतरस्यामिति** ॥ वार्तिक-मिदं त्रयम् । **मतुप्चेति** ॥ वक्तव्यः इति शेषः । भाष्ये तथोक्तत्वात् । चुटू इति चकारस्येत्संज्ञा । अन्यतरस्याङ्ग्रहणाच्चालोरभावे इनिठनौ । समुच्चयार्थकान्यतरस्याङ्ग्रहणानुवृत्तेर्मतुबपि । तथाचात्र चत्वारः प्रत्ययाः । तदाह । **हृदयालुरित्यादि** ॥ शीतोष्णतृप्रेभ्यः तदसहने चालुर्वक्तव्य इति वाचनिकमर्थतः सङ्गृह्णाति । **शीतेति** ॥ शीत, उष्ण, तृप्र, एभ्यः द्वितीयान्तेभ्यः न सहते इत्यर्थे चालुर्वक्तव्य इत्यर्थः । **तृप्रः पुरोडाश इति** ॥ मन्त्रभाष्ये 'स्फायिताञ्चि' इति सूत्रे तथोक्त-

तृप्रालुः । 'तृप्रं दुःखम्' इति माधवः । 'हिमाच्चेलुः' (वा ३२१८) । हिमं न सहते हिमेलुः । 'बलादूलः' (वा ३२१९) । बलं न सहते बलूलः । 'वातात्समूहे च' (वा ३२२०) । वातं न सहते वातस्य समूहो वा वातूलः । 'तप्पर्वमरुद्भ्याम्' (वा ३२२१) । पर्वतः । मरुत्तः ।

१९२९ । ऊर्णाया युस् । (५-२-१२३)

सित्त्वात्पदत्वम् । ऊर्णायुः । अत्र 'छन्दसि' इति केचिदनुवर्तयन्ति । युक्तं चैतत् । अन्यथा हि 'अहंशुभमोः—' (सू १९४६) इत्यत्रैवोर्णाग्रहणं कुर्यात् ।

१९३० । वाचो ग्मिनिः । (५-२-१२४)

वाग्मी ।

१९३१ । आलजाटचौ बहुभाषिणि । (५-२-१२५)

'कुत्सित इति वक्तव्यम्' (वा ३२२३) । कुत्सितं बहु भाषते वाचालः । वाचाटः । यस्तु सम्यग्बहु भाषते स वाग्मीत्येव ।

१९३२ । स्वामिन्नैश्वर्ये । (५-२-१२६)

त्वादिति भावः । **हिमाच्चेलुरिति** ॥ वार्तिकमिदम् । हिमशब्दात् द्वितीयान्तात् न सहते इत्यर्थे चेलुः स्यादित्यर्थः । चकार इत् । **बलादूल इति** ॥ तन्न सहते इत्यर्थे वक्तव्य इति शेषः । **वातात्समूहे चेति** ॥ षष्ठ्यन्ताद्वातशब्दात् समूहेऽर्थे, द्वितीयान्तात् न सहते इत्यर्थे च, ऊलप्रत्ययो वाच्य इत्यर्थः । **तप्पर्वमरुद्भ्यामिति** ॥ वार्तिकमिदम् । पर्वमरुद्भ्यान्तप् वक्तव्य इत्यर्थः । तन्वक्तव्य इति वृत्तिकृत्, हरदत्तश्च । प्रौढमनोरमायान्तु नित्त्वं निराकृतम् । शब्देन्दुशेखरे तु हरदत्तसम्मतं नित्त्वमेव स्थापितम् । रूढत्वादवयवार्थाभावान्न मतुप् । **ऊर्णाया युस्** ॥ ऊर्णायुशब्दे 'यस्येति च' इति लोपमाशङ्क्य आह । **सित्त्वादिति । अनुवर्तयन्तीति** ॥ 'बहुळं छन्दसि' इत्यस्मादिति शेषः । **वाचो ग्मिनिः** ॥ वाच्शब्दात् मत्वर्थे ग्मिनिप्रत्ययः स्यादित्यर्थः । नकारादिकार उच्चारणार्थः । अतद्धित इति पर्युदासात् गकारस्य नेत्संज्ञा । **वाग्मीति** ॥ वाच्शब्दात् ग्मिनिप्रत्यये कुत्वं, जश्त्वम् । प्रत्यये गकारोच्चारणन्तु 'प्रत्यये भाषायाम्, इत्यनुनासिकाभावार्थम् । **आलजाटचौ** ॥ वाच्शब्दात् आलच्, आटच्, एतौ मत्वर्थे बहुभाषिणीत्यर्थः । ग्मिनोऽपवादः । **यस्तु सम्यगिति** ॥ नच अबहु, अकुत्सितञ्च यो वदति तत्रापि वाग्मीति कुतो न भवतीति वाच्यम् । यो हि सम्यक् बहु भाषते वाग्मीत्येव स भवतीति भाष्यबलेन पूर्वसूत्रस्य सम्यक् बहुभाषिण्येव प्रवृत्तेरभ्युपगमात् इति भावः । **स्वामिन्नैश्वर्ये** ॥ ऐश्वर्ये इति प्रकृतिविशेषणमित्यभिप्रेत्य आह । **ऐश्वर्यवाचकादिति** ॥

ऐश्वर्यवाचकात्स्वशब्दान्मत्वर्थे आमिनच् । स्वामी ।

१९३३ । अर्शआदिभ्योऽच् । (५-२-१२७)

अर्शांस्यस्य विद्यन्ते अर्शसः । आकृतिगणोऽयम् ।

१९३४ । द्वन्द्वोपतापगर्ह्यात्प्राणिस्थादिनिः । (५-२-१२८)

द्वन्द्वः । कटकवलयिनी । शङ्खनूपुरिणी । उपतापो रोगः । कुष्ठी । किलासी । गर्ह्यं निन्द्यम् । ककुदावर्ती । काकतालुकी । 'प्राणिस्थात्' किम् । पुष्पफलवान्घटः । 'प्राण्यङ्गान्न' । पाणिपादवती । 'अतः' इत्येव । चित्रकललाटिकावती । सिद्धे प्रत्यये पुनर्वचनं ठनादिबाधनार्थम् ।

१९३५ । वातातीसाराभ्यां कुक्च । (५-२-१२९)

चादिनिः । वातकी । अतीसारकी । 'रोगे चायमिष्यते' । नेह । वातवती गुहा । 'पिशाचाच्च' (वा ३२२४) । पिशाचकी ।

आमिनजिति ॥ निपात्यते इति शेषः । **स्वामीति** ॥ स्वं ऐश्वर्यं, तद्वानित्यर्थः । नियन्तेति यावत् । ऐश्वर्येत्युक्तेर्धनवानित्यर्थे स्वामीति न भवति । **अर्श आदिभ्योऽच्** ॥ अर्शस्शब्दः आदिः एषामिति विग्रहः । **अर्शस इति** ॥ अर्शः गुदरोगविशेषः । **द्वन्द्वोपताप** ॥ द्वन्द्वसमासात् उपतापवाचकात् गर्ह्यवाचकाच्च प्राणिस्थविषयेभ्यो मत्वर्थे इनिः स्यादित्यर्थः । द्वन्द्वेति उदाहरणसूचनम् । **कटकवलयिनीति** ॥ कटकवलययोः काञ्चिदाकृतिभेदम्परिकल्प्य द्वन्द्वः उपपाद्यः । उपताप इत्यस्य विवरणं रोग इति । किलासः कुष्ठभेदः । गर्ह्यमित्यस्य विवरणं निन्द्यमिति । **ककुदावर्तीति** ॥ ककुदङ्ग्रीवाया अधस्तात्पृष्ठभागः । तत्र आवृतः ककुदावर्तः, सः अस्यास्तीति विग्रहः । **काकतालुकिनीति** ॥ काकस्येव तालुके काकतालुके, ते अस्याः स्त इति विग्रहः । **प्राण्यङ्गान्नेति** ॥ व्याख्यानमेवात्र शरणम् । एवंविधवार्तिकस्य भाष्ये अदर्शनात् । **अत इत्येवेति** ॥ समासान्त इति सूत्रभाष्यरीत्या मण्डूकप्लुत्या तदनुवृत्तेरिति भावः । **चित्रकललाटिकावतीति** ॥ चित्रकञ्च ललाटिका चेति द्वन्द्वः । अदन्तत्वाभावादिनिर्नेति भावः । ननु 'अत इनिठनौ' इत्यतोऽनुवृत्त्यैव सिद्धे पुनरिह इनिग्रहणङ्किमर्थमित्यत आह । **सिद्धे प्रत्यये इति** ॥ **ठनादीनि** ॥ आदिना मतुपः सङ्ग्रहः । **वातातीसाराभ्यां कुक्च** ॥ **चादिनिरिति** ॥ वात, अतीसार, आभ्यां मत्वर्थे इनिः स्यात् प्रकृतेः कुक् चेत्यर्थः । कुकि ककार इत् । उकार उच्चारणार्थः । कित्त्वादन्तावयवः । **वातकीति** ॥ वातरोगवानित्यर्थः । **अतीसारकीति** ॥ अतीसाररोगवानित्यर्थः । **रोगे चायमिति** ॥ व्याख्यानादिति भावः । रोग एवेत्यर्थः । **वातवती गुहेति** ॥ अत्र रोगस्याप्रतीतेरिनि कुकौ नेति भावः । **पिशाचाच्चेति** ॥ वार्तिकमिदम् । पिशाचादिनिः प्रकृतेः कुक्चेत्यर्थः ।

१९३६ । वयसि पूरणात् । (५-२-१३०)

पूरणप्रत्ययान्तान्मत्वर्थे इनिः स्याद्वयसि द्योत्ये । मासः संवत्सरो वा पञ्चमोऽस्यास्तीति पञ्चम्युष्ट्रः । ठनादिबाधनार्थमिदम् । 'वयसि' किम् । पञ्चमवान् ग्रामः ।

१९३७ । सुखादिभ्यश्च । (५-२-१३१)

इनिर्मत्वर्थे । सुखी । दुःखी । 'माला क्षेपे' (ग. सू ११६) । माली ।

१९३८ । धर्मशीलवर्णान्ताच्च । (५-२-१३२)

धर्माद्यन्तादिनिर्मत्वर्थे । ब्राह्मणधर्मी । ब्राह्मणशीली । ब्राह्मणवर्णी ।

१९३९ । हस्ताज्जातौ । (५-२-१३३)

हस्ती । 'जातौ' किम् । हस्तवान्पुरुषः ।

१९४० । वर्णाद्ब्रह्मचारिणि । (५-२-१३४)

वर्णी ।

१९४१ । पुष्करादिभ्यो देशे । (५-२-१३५)

पुष्करिणी । पद्मिनी । 'देशे' किम् । पुष्करवान्करी । 'बाहूरुपूर्वपदाद्बलात्' (वा ३२२५) । बाहुबली । ऊरुबली । 'सर्वादेश्च' (वा ३२२६) । सर्वधनी । सर्वबीजी । 'अर्थाच्चासन्निहिते' (वा ३२२७) । अर्थी । सन्निहिते तु अर्थवान् । 'तदन्ताच्च' (वा ३२२८) । धान्यार्थी । हिरण्यार्थी ।

वयसि पूरणात् ॥ अत इनिठनाविस्येव इनिसिद्धेः किमर्थमिदमित्यत आह । **ठनादिबाधनार्थमिति** ॥ **सुखादिभ्यश्च** ॥ **इनिर्मत्वर्थे इति** ॥ इनिरेव नतु ठनित्यर्थः । **माला क्षेपे इति** ॥ सुखादिगणसूत्रमिदम् । **धर्मशील** ॥ **धर्माद्यन्तादिति** ॥ धर्म, शील, वर्ण, एतदन्तादिनिरेवेत्यर्थः । **हस्ताज्जातौ** ॥ हस्तान्मत्वर्थे इनिरेव, समुदायेन जातिविशेषे गम्ये इत्यर्थः । **वर्णाद्ब्रह्मचारिणि** ॥ वर्णशब्दान्मत्वर्थे इनिरेव । समुदायेन ब्रह्मचारिणि गम्ये इत्यर्थः । **वर्णीति** ॥ वर्णः ब्राह्मणादितत्तद्वर्णोचितवसन्तादिकालमुपनयनम्, सोऽस्यास्तीति विग्रहः । **पुष्करादिभ्यो देशे** ॥ पुष्करशब्दान्मत्वर्थे इनिरेव स्यात् देशे गम्ये । **बाहूरुपूर्वपदात् बलादिति** ॥ वार्तिकमिदम् । बाहु, ऊरु, एतत्पूर्वपदकात् बलशब्दान्तान्मत्वर्थे इनिरेवेत्यर्थः । **सर्वादेश्चेति** ॥ वार्तिकमिदम् । इनिरेवेति शेषः । **अर्थाच्चासन्निहिते इति** ॥ वार्तिकमिदम् । असन्निहितविषयकादर्थशब्दात् इनिरेवेत्यर्थः । **अर्थीति** ॥ असन्निहितः

१९४२ । बलादिभ्यो मतुबन्यतरस्याम् । (५-२-१३६)

बलवान्—बली । उत्साहवान्—उत्साही ।

१९४३ । संज्ञायां मन्माभ्याम् । (५-२-१३७)

मन्नन्तान्मान्ताच्चेनिर्मत्वर्थे । प्रथिमिनी । दामिनी । मा । होमिनी । सोमिनी । 'संज्ञायाम्' किम् । सोमवान् ।

१९४४ । कंशम्भ्यां बभयुस्तितुतयसः । (५-२-१३८)

'कम्' 'शम्' इति मान्तौ । 'कम्' इत्युदकसुखयोः । 'शम्' इति सुखे । आभ्यां सप्त प्रत्ययाः स्युः । युस्यसोः सकारः पदत्वार्थः । **कंवः । कंभः । कंयुः । कंतिः । कंतुः । कंतः । कंयः । शंवः । शंभः । शंयुः । शंतिः । शंतुः । शंयः ।** अनुस्वारस्य वैकल्पिकः परसवर्णः । वकारयकारपरस्यानुनासिकौ वयौ ।

१९४५ । तुन्दिवलिवटेर्भः । (५-२-१३९)

वृद्धा नाभिस्तुन्दिः । 'मूर्धन्योपधोऽयम्' इति माधवः । **तुन्दिभः । वलिभः । वटिभः ।** पामादित्वाद्वलिनोऽपि ।

अर्थः अस्येति विग्रहः । अर्थो नास्तीति यावत् । अत्र विरोधादस्तीति न सम्बध्यते । अर्थोऽसन्निहितोऽस्येत्यर्थे अप्राप्त एव इनिर्विधीयते इति कैयटः। प्रत्ययविधौ तदन्तविधिनिषेधादाह। **तदन्ताच्चेति** ॥ अर्थशब्दान्तादपि इनिर्वक्तव्य इत्यर्थः । **बलादिभ्यो** ॥ मतुबभावपक्षे सन्निहितः इनिरित्यभिप्रेत्योदाहरति । **बलवान् बलीति** ॥ **संज्ञायां मन्माभ्याम्** ॥ **प्रथिमिनीति** ॥ 'पृथ्वादिभ्य इमनिज्वा' इति इमनिजन्तः प्रथिमन्शब्दः । अत्र मनोऽनर्थकत्वेऽपि 'अनिनस्मन्' इति तदन्तविधिना इमनिजन्तोऽपि गृह्यते । प्रथिमन्शब्दादिनिप्रत्यये टिलोपे नान्तलक्षणङीपि प्रथिमिनीशब्दः । **दामिनीति** ॥ दामन्शब्दादिनौ टिलोपे ङीबिति भावः । **मेति** ॥ मान्तोदाहरणसूचनमिदम् । **होमिनी । सोमिनीति** ॥ होमशब्दात्सोमशब्दाच्च इनौ ङीबिति भावः । **कंशंभ्याम्** ॥ व, भ, युस्, ति, तु, त, यस्, एषां सप्तानां द्वन्द्वात् प्रथमाबहुवचनम् । **सप्त प्रत्ययाः स्युरिति** ॥ मत्वर्थे इति शेषः । **पदत्वार्थ इति** ॥ अन्यथा कम् इत्यस्मात् युप्रत्यये यप्रत्यये च कृते भत्वात् पदत्वाभावादनुस्वारो न स्यादिति भावः । **वकारयकारपरस्येति** ॥ बहुव्रीहिः। वकारपरकस्य यकारपरकस्य चानुस्वारस्येत्यर्थः । **तुन्दिवलि** ॥ तुन्दि, वलि, वटि, एभ्यो मत्वर्थे भप्रत्ययः स्यादित्यर्थः । समाहारद्वन्द्वात्पञ्चम्येकवचनम् । पुंस्त्वमार्षम् । **वटिभ इति** ॥ 'वट वेष्टने' । वटनं वटिः अस्या-

१९४६ । अहंशुभमोर्युस् । (५-२-१४०)

'अहम्' इति मान्तमव्ययमहङ्कारे । शुभमिति शुभे । अहंयुः—अहङ्कारवान् । शुभंयुः, शुभान्वितः ।

इति तद्धिते पञ्चमाध्यायस्य द्वितीयपादे मत्वर्थीयप्रकरणम् ।

अथ तद्धिते तृतीयपादे प्राग्दिशीयप्रकरणम् ॥

१९४७ । प्राग्दिशो विभक्तिः । (५-३-१)

दिक्छब्देभ्यः इत्यतः प्राग्वक्ष्यमाणाः प्रत्ययाः विभक्तिसंज्ञाः स्युः । अथ स्वार्थिकाः प्रत्ययाः । 'समर्थानाम्' इति 'प्रथमात्' इति च निवृत्तम् । 'वा' इति त्वनुवर्तत एव ।

१९४८ । किंसर्वनामबहुभ्योऽद्व्यादिभ्यः । (५-३-२)

किमः सर्वनाम्नो बहुशब्दाच्चेति प्राग्दिशोऽधिक्रियते ।

स्तीति विग्रहः । **अहंशुभमोर्युस्** ॥ अहंयुरशुभंयुरित्यत्र सुब्लुकमाशङ्क्य आह । **अहमित्यादीति** ॥ सित्त्वं पदत्वार्थम् । तेन पदत्वादनुस्वारे परसवर्णः सिद्ध्यति ॥

इति तद्धिते पञ्चमाध्यायस्य द्वितीयपादे मत्वर्थीयप्रकरणम् ।

अथ पञ्चमाध्यायस्य तृतीयपादे प्राग्दिशीयप्रकरणं निरूप्यते—**प्राग्दिशो विभक्तिः** ॥ दिक्छब्देन तद्घटितं सूत्रं विवक्षितमित्यभिप्रेत्य आह । **दिक्छब्देभ्य इत्यत इति** ॥ **विभक्तिसंज्ञका इति** ॥ तत्फलन्तु 'न विभक्तौ तुस्माः' इति निषेधः । त्यदाद्यत्वम् । 'इदमस्तृतीयादिर्विभक्तिः' इति स्वरश्च । **स्वार्थिका इति** ॥ स्वीयप्रकृत्यर्थे भवाः इत्यर्थः । तसिलादिष्वर्थनिर्देशाभावात् अतिशायने इत्यादीनां प्रकृत्यर्थविशेषणत्वाच्चेति भावः । **निवृत्तमिति** ॥ अत्रोपपत्तिः 'समर्थानाम्' इत्यत्रोक्ता । **अनुवर्तते एवेति** ॥ व्याख्यानमेवात्र शरणम् । **किंसर्वनाम** ॥ अद्व्यादिभ्य इति च्छेदः । प्राग्दिश इत्यनुवर्तते । तदाह । **प्राग्दिशोऽधिक्रियते इति** ॥ विधेयानिर्देशादधिकारोऽयमिति भावः । किमः सर्वनामत्वेऽपि द्व्यादिपर्युदासात् पृथग्ग्रहणम् । द्व्यादिषु किंशब्दपाठस्तु त्वञ्च कश्च कौ, अहञ्च कश्च कौ, इत्यत्र 'त्यदादीनां मिथः सहोक्तौ' इति किमः शेषत्वार्थः । अथ वक्ष्यमाणतसिलादिप्रत्यये परे

१९४९ । इदम इश् । (५-३-३)

प्राग्दिशीये परे ।

१९५० । एतेतौ रथोः । (५-३-४)

इदंशब्दस्य 'एत' 'इत्' इत्यादेशौ स्तो रेफादौ थकारादौ च प्राग्दिशीये परे । इशोऽपवादः ।

१९५१ । एतदोऽन् । (५-३-५)

योगविभागः कर्तव्यः । 'एतदः' एतेतौ स्तो रथोः । 'अन्' 'एतदः' इत्येव । अनेकाल्त्वात्सर्वादेशः । 'नलोपः प्रातिपदिकान्तस्य' (सू २३६) ।

१९५२ । सर्वस्य सोऽन्यतरस्यां दि । (५-३-६)

प्राग्दिशीये दकारादौ प्रत्यये परे सर्वस्य सो वा स्यात् ।

१९५३ । पञ्चम्यास्तसिल् । (५-३-७)

पञ्चम्यन्तेभ्यः किमादिभ्यस्तसिल्वा स्यात् ।

कार्यविशेषानाह । इदम इश् इत्यादिना । **इदम इश्** ॥ **प्राग्दिशीये परे इति** ॥ शेषपूरणम् । प्रकरणलभ्यमिदम् । शित्त्वात् सर्वादेशः । इत इत्युदाहरणम् । **एतेतौ रथोः** ॥ **इदम** इत्यनुवर्तते । एतश्च इच्चेति द्वन्द्वात्प्रथमाद्विवचनम् । रश्च थ् च तयोरिति द्वन्द्वः । रेफादकार उच्चारणार्थः । रेफथकाराभ्यां प्राग्दिशीयं प्रकरणलभ्यं विशेष्यते । 'यस्मिन्विधिः' इति तदादिविधिः । तदाह । **इदंशब्दस्येत्यादिना** ॥ तत्र रेफादौ परे एतः, थादौ तु इदिति, यथासङ्ख्यं बोध्यम् । एतर्हि, इत्थम् । **एतदोऽन्** ॥ प्राग्दिशीये प्रत्यये परे एतद्शब्दस्य अन् स्यादित्यर्थः प्रतीयते । एवं सति एतच्छब्दस्य अनेव स्यात् । नत्वेतेतौ । तत्राह । **योगविभाग इति** ॥ **एतद इति** ॥ प्रथमसूत्रमिदम् । तस्य शेषपूरणम् 'एतेतौ रथोः' इति । एतच्छब्दस्य एतेतौ स्तो रेफथकारादौ प्रत्यये परे इत्यर्थः । एतर्हि, इत्थम्, इत्युदाहरणम् । **अन्निति** ॥ द्वितीयं सूत्रम् । **एतद इत्येवेति** ॥ रथोः इति तु नानुवर्तत इति भावः । तथाच एतद इत्यस्य अन् स्यात्प्राग्दिशीये परे इति फलति । अतः, अत्र, इत्युदाहरणम् । ननु अनादेशे नकारस्य इत्संज्ञायां अकारोऽन्तादेशः स्यादित्यत आह । **अनेकाल्त्वादिति** ॥ नकारस्य प्रयोजनाभावात् नेत्संज्ञा । नित्स्वरस्य प्रत्ययविषयत्वादिति भावः । तर्हि अत इत्यादौ नकारस्य श्रवणं स्यादित्यत आह । **नलोप इति** ॥ **सर्वस्य सोऽन्यतरस्यान्दि** ॥ दि इति सप्तम्येकवचनं प्राग्दिशीयविशेषणम् 'यस्मिन्विधिः' इति तदादिविधिः । तदाह । **प्राग्दिशीये दकारादाविति** ॥ सदा इत्युदाहरणम् । तदेवन्तसिलादिप्रत्ययेषु प्राग्दिशीयेषु परेषु कतिपयान् आदेशान् विधाय तसिलादिप्रत्ययान्वक्तुमुपक्रमते । **पञ्चम्यास्तसिल्** ॥ **किमादिभ्य इति** ॥ किंसर्वनामबहुभ्य इत्यर्थः । **वा स्यादिति** ॥ 'समर्थानाम्' इत्यतो

१९५४। कु तिहोः। (७-२-१०४)

किमः कुः स्यात्तादौ हादौ च विभक्तौ परतः। कुतः। कस्मात्। यतः। ततः। अतः। इतः। अमुतः। बहुतः। द्यादेस्तु द्वाभ्याम्।

१९५५। तसेश्च। (५-३-८)

किंसर्वनामबहुभ्यः परस्य तसेस्तसिलादेशः स्यात्। स्वरार्थम् विभक्त्यर्थं च वचनम्।

१९५६। पर्यभिभ्यां च। (५-३-९)

आभ्यां तसिल्स्यात्। 'सर्वोभयार्थाभ्यामेव' (वा ३२४०)। परितः सर्वत इत्यर्थः। अभितः उभयत इत्यर्थः।

१९५७। सप्तम्यास्त्रल्। (५-३-१०)

कुत्र। यत्र। तत्र। बहुत्र।

वाग्रहणस्यानुवृत्तेरिति भावः। **कु तिहोः॥** कु इति लुप्तप्रथमाकम्। 'किमः कः' इत्यस्मात् किमः इत्यनुवर्तते। 'अष्टन आ' इत्यतो विभक्ताविति। तिश्च ह् च तयोरिति द्वन्द्वः। इकार उच्चारणार्थः। ताभ्यां विभक्तिर्विशेष्यते। तदादिविधिः। तदाह। **किमः कुः स्यादि-त्यादिना॥ कुत इति॥** किंशब्दात् पञ्चम्यन्तात्तसिल्। सुब्लुक्। किमः कुभावः। 'तसिलादयः प्राक् पाशपः' इत्युक्तेरव्ययत्वम्। वेत्यनुवृत्तेः फलमाह। **कस्मादिति॥** तिहोरित्युक्तेरत्र न कुभावः सर्वनाम्न उदाहरति। **यत इति॥** यद्शब्दात् पञ्चम्यन्तात् सुब्लुक्, तसिलो विभक्तित्वात् तस्मिन्परे त्यदाद्यत्वं पररूपम्। एवन्तच्छब्दात्तत इति रूपम्। पक्षे तस्मादिति भवति। **अत इति॥** एतद्शब्दात् पञ्चम्यन्तात् तसिल्, सुब्लुक्, एतदोऽन्, सर्वादेशः, नलोपः। पक्षे एतस्मादिति भवति। **इत इति॥** इदंशब्दात्पञ्चम्यन्तात् तसिल्, सुब्लुक्, इदम इश्। पक्षे अस्मादिति भवति। **अमुत इति॥** अदस्शब्दात् पञ्चम्यन्तात् तसिल्, उत्वमत्वे च। पक्षे अमुष्मादिति भवति। **बहुत इति॥** पक्षे बहुभ्य इति भवति। **द्यादेस्त्विति॥** सर्वनामत्वात् प्राप्तस्तसिल् द्यादिपर्युदासान्नेत्यर्थः। **तसेश्च॥ परस्य तसेरिति॥** 'प्रतियोगे पञ्चम्यास्तसिः' 'अपादाने चाहीयरुहोः' इति वक्ष्यमाणस्य तसेरित्यर्थः। ननु तसेस्तसिल् किमर्थमित्यत आह। **स्वरार्थमिति॥** लित्स्वरार्थमित्यर्थः। **विभक्त्यर्थमिति॥** विभक्तिनिमित्तकत्यदाद्यत्वाद्यर्थमित्यर्थः। अन्यथा परत्वात्तसौ कृते तस्य अप्राग्दिशीयत्वात् विभक्तित्वाभावात् त्यदाद्यत्वादिकन्न स्यादित्यर्थः। **पर्यभिभ्याञ्च॥ सर्वोभयार्थाभ्यामेवेति॥** वार्तिकमिदम्। परिषिञ्चति, अभिषिञ्चति, इत्यादौ वाग्रहणात् पक्षे न तसिल्। **सप्तम्यास्त्रल्॥** किमादिभ्यः

१९५८ । इदमो हः । (५-३-११)

त्रलोऽपवादः । इशादेशः । इह ।

१९५९ । किमोऽत् । (५-३-१२)

वाग्रहणमपकृष्यते । सप्तम्यन्तात्किमोऽद्वा स्यात् । पक्षे त्रल् ।

१९६० । क्वाति । (७-२-१०५)

किमः क्वादेशः स्यादति । क्व । कुत्र ।

१९६१ । वा ह च च्छन्दसि । (५-३-१३)

'कुह स्थः' । 'कुह जग्मथुः' ।

१९६२ । एतदस्त्रतसोस्त्रतसौ चानुदात्तौ । (२-४-३३)

अन्वादेशविषये एतदोऽश् स्यात्स चानुदात्तस्त्रतसोः परतः, तौ चानुदात्तौ स्तः । एतस्मिन्ग्रामे सुखं वसामः । अतोऽत्राधीमहे । अतो न गन्तारः स्मः ।

१९६३ । इतराभ्योऽपि दृश्यन्ते । (५-३-१४)

सप्तम्यन्तेभ्यः अद्यादिभ्यस्त्रलित्यर्थः । कुत्र इत्यादिरूपाणि, कुत इत्यादिवत् । **इदमो हः ॥** इदंशब्दात् सप्तम्यन्तात् हप्रत्ययः स्यादित्यर्थः । **किमोऽत् ॥ अपकृष्यते इति ॥** 'वा ह च छन्दसि' इत्युत्तरसूत्रादिति शेषः । अपकर्षे व्याख्यानमेव शरणम् । अत्प्रत्यये तकार इत् । न विभक्ताविति निषेधस्तु न भवति । 'तवर्गस्येत्त्वप्रतिषेधोऽतद्धिते' इति वार्तिकात् । **क्वाति ॥** क्व अतीति छेदः । क्वेति लुप्तप्रथमाकं 'किमः कः' इत्यतः किम इत्यनुवर्तते । तदाह । **किमः क्वेति ॥** किंशब्दात् सप्तम्यन्तात् अत्प्रत्ययः, तकार इत्, किमः क्वादेश इति भावः । **कुत्रेति ॥** अत्प्रत्ययाभावपक्षे त्रलि 'कुतिहोः' इति कुभावे रूपम् । केचित्तु 'किमोऽत्' इत्यत्र उत्तरसूत्राद्वाग्रहणापकर्षे प्रमाणाभावात्तूलम्बाधित्वा नित्य एव अत्प्रत्ययः कुत्रेति त्वपशब्द एवेत्याहुः। **वा ह च छन्दसि ॥** हेति लुप्तप्रथमाकम् । किमः सप्तम्यन्तात् हप्रत्ययः स्यादित्यर्थः । चादत् त्रल् च । यद्यपि वैदिकप्रक्रियायामिदमुपन्यसनीयम् । तथापि वाग्रहणस्य पूर्वसूत्रे अपकर्षज्ञानायात्र तदुपन्यासः । **एतदस्त्रतसोः ॥** 'इदमोऽन्वादेशे' इत्यस्मात् अन्वादेशे अशनुदात्त इत्यनुवर्तते । तदाह । **अन्वादेशेत्यादिना ॥ अतोऽत्रेति ॥** एतद्शब्दात् त्रलि प्रकृतेरशादेशे अत्रेति रूपम् । **अतो न गन्तारः स्म इति ॥** एतस्माद्ग्रामादित्यर्थः । एतद्शब्दात्तसिल् प्रकृतेरशादेशः । 'एतदोऽन्' इत्येव सिद्धे अनुदात्तार्थं वचनम् । नच लित्स्वरे सति शेषनिघातेन तसेरुदात्तत्वं सिद्धमिति शङ्क्यम् । लित्स्वरापवादे अशोऽनुदात्तत्वे कृते लित्स्वराप्राप्त्या प्रत्ययस्वरेणात्र तसेरुदात्तत्वे प्राप्ते तद्विधानार्थत्वात् । **इतराभ्योऽपि दृश्यन्ते ॥**

पञ्चमीसप्तमीतरविभक्त्यन्तादपि तसिलादयो दृश्यन्ते। 'दृशिग्रहणाद्भवदादियोग एव' (वा ३२४४)। स भवान्। ततो भवान्। तत्र भवान्। तं भवन्तम्। ततो भवन्तम्। तत्र भवन्तम्। एवं दीर्घायुः। देवानाम्प्रियः। आयुष्मान्।

१९६४। सर्वैकान्यकिंयत्तदः काले दा। (५-३-१५)

सप्तम्यन्तेभ्यः कालार्थेभ्यः स्वार्थे दा स्यात्। सर्वस्मिन्काले। सदा। सर्वदा। एकदा। अन्यदा। यदा। कदा। तदा। 'काले' किम्। सर्वत्र देशे।

१९६५। इदमो र्हिल्। (५-३-१६)

सप्तम्यन्तात्काले इत्येव। ह्स्यापवादः। अस्मिन्काले एतर्हि। 'काले' किम्। इह देशे।

१९६६। अधुना। (५-३-१७)

इदमः सप्तम्यन्तात्कालवाचिनः स्वार्थे अधुनाप्रत्ययः स्यात्। इश्। 'यस्य—' (सू ३११) इति लोपः। अधुना।

१९६७। दानीं च। (५-३-१८)

इदानीम्।

१९६८। तदो दा च। (५-३-१९)

पञ्चमीसप्तमीतरविभक्तिभ्योऽपीत्यर्थः। फलितमाह। **पञ्चमीसप्तमीतरविभक्त्यन्तादपीति**॥ किमादेरिति शेषः। **एवमिति**॥ स दीर्घायुः, ततो दीर्घायुः, तत्र दीर्घायुरित्याद्यूह्यमित्यर्थः। **सर्वैकान्य**॥ **सप्तम्यन्तेभ्य इति**॥ किमादिभ्य इति शेषः। सप्तम्या इत्येवानुवर्तते। व्याख्यानादिति भावः। **सदा—सर्वदेति**॥ 'सर्वस्य सोऽन्यतरस्यान्दि' इति सभावविकल्पः। **कदेति**॥ किंशब्दात् दाप्रत्यये सति तस्य 'किमः कः' इति कादेशः। **इदमो र्हिल्**॥ इदमः र्हिल् इति छेदः। **एतर्हीति**॥ इदम्शब्दात् र्हिल्, 'एतेतौ रथोः' इत्येतादेशः। **अधुना**॥ इदम इति सप्तम्या इति काले इति चानुवर्तते। तदाह। **इदम इति**॥ **इशिति**॥ 'इदम इश्' इत्यनेनेति शेषः। **अधुनेति**॥ इयदितिवत् प्रत्ययमात्रं शिष्यते। पठन्ति चाभियुक्ताः "उदितवति परस्मिन्प्रत्यये शास्त्रयोनौ गतवति विलयञ्च प्राकृतेऽपि प्रपञ्चे। सपदि पदमुदीतङ्केवलः प्रत्ययो यत् तदियदिति मिमीते कोऽधुना पण्डितोऽपि" इति वैयाकरणीमौपनिषदीञ्च प्रक्रियामाश्रित्य प्रवृत्तो ह्यर्थोऽयं श्लोकः। **दानीञ्च**॥ इदमः सप्तम्यन्तात् कालवाचिनः स्वार्थे दानीमिति च प्रत्ययः स्यादित्यर्थः। **इदानीमिति**॥ इदंशब्दात् दानीम्प्रत्ययः, इश्। **तदो दा च**॥

तदा—तदानीम् । 'तदो दावचनमनर्थकं, विहितत्वात्' (वा ३२४३) ।

१९६९ । अनद्यतने र्हिलन्यतरस्याम् । (५-३-२१)

कर्हि—कदा । यर्हि—यदा । तर्हि—तदा । एतस्मिन्काले एतर्हि ।

१९७० । सद्यःपरुत्परार्यैषमःपरेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः । (५-३-२२)

एते निपात्यन्ते । 'समानस्य सभावो द्यस् चाहनि' (वा ३२४५) । समानेऽहनि सद्यः। 'पूर्वपूर्वतरयोः परभाव उदारी च संवत्सरे' (वा ३२४६) । पूर्वस्मिन्वत्सरे परुत् । पूर्वतरे वत्सरे परारि । 'इदम (इश्) समसण्' (वा ३२४७) । अस्मिन्संवत्सरे ऐषमः । 'परस्मादेद्यव्यहनि' (वा ३२४८) परस्मिन्नहनि परेद्यवि । 'इदमोऽश्भावो द्यश्च' (वा ३२४९) अस्मिन्नहनि अद्य । 'पूर्वान्यान्यतरेतरापराधरोभयोत्तरेभ्य एद्युस् च' (वा ३२५०) । पूर्वस्मिन्नहनि पूर्वेद्युः । अन्यस्मिन्नहनि अन्येद्युः । उभयोरह्नोरुभयेद्युः । 'द्युश्चोभयाद्वक्तव्यः' (वा ३२५१) । उभयद्युः ।

१९७१ । प्रकारवचने थाल् । (५-३-२३)

प्रकारवृत्तिभ्यः किमादिभ्यस्थाल्स्यात्स्वार्थे । तेन प्रकारेण तथा । यथा ।

सप्तम्यन्तात्कालवृत्तेः तद्शब्दात् दाप्रत्ययः, दानीम्प्रत्ययश्च स्यादित्यर्थः । **तदो दावचनमिति** ॥ वार्तिकमिदम् । **विहितत्वादिति** ॥ 'सर्वैकान्य' इत्यनेनेति शेषः । **अनद्यतने र्हिल्** ॥ अनद्यतनकालवृत्तिभ्यः किमादिभ्यः सप्तम्यन्तेभ्यः र्हिल्प्रत्ययो वा स्यादित्यर्थः । पक्षे दाप्रत्ययः । **एतस्मिन्काले एतर्हीति** ॥ एतद्शब्दात् र्हिल् । एतद इति योगविभागात् रेफादौ एतादेशः । **सद्यः परुत्** ॥ "समानस्य सभावो द्यस् चाहनि" इति भाष्यवाक्यमिदम् । अहर्वृत्तेः समानशब्दात् सप्तम्यन्तात् द्यस्प्रत्ययः । समानस्य सभावश्च निपात्यते इत्यर्थः । समानेऽहनीत्यर्थः । "पूर्वपूर्वतरयोः परभाव उदारी च संवत्सरे" इत्यपि भाष्यवाक्यम् । उच्च आरिश्चेति द्वन्द्वः । सप्तम्यन्तादिमौ प्रत्ययौ संवत्सरे अभिधेये । "इदम (इश्) समसण्" इत्यपि भाष्यवाक्यम् । **ऐषम इति** ॥ समसणि णकार इत्, सकारादकार उच्चारणार्थः । णित्त्वादादिवृद्धिः । "परस्मादेद्यव्यहनि" इत्यपि भाष्यवाक्यम् । सप्तम्यन्तात् एद्यविरिकारान्तः प्रत्ययः । "इदमोऽश्भावो द्यश्च" इत्यपि भाष्यवाक्यम् । सप्तम्यन्तात् अकारान्तो द्यस्प्रत्ययः "पूर्वान्यान्यतरेतरापराधरोभयोत्तरेभ्य" इत्यपि भाष्यवाक्यम् । **प्रकारवचने थाल्** ॥ पञ्चम्यर्थे सप्तमीत्याह । **प्रकारवृत्तिभ्य इति** ॥ सामान्यस्य भेदको विशेषः प्रकारः। यथा बहुभिः प्रकारैर्भुङ्क्ते इति विशेषैरिति गम्यते । सादृश्यं त्विह न

१९७२। इदमस्थमुः। (५-३-२४)

थालोऽपवादः। 'एतदो वाच्यः' (वा ३२३५)। अनेन एतेन वा प्रकारेण इत्थम्।

१९७३। किमश्च। (५-३-२५)

केन प्रकारेण कथम्।

इति तद्धिते प्राग्दिशीयप्रकरणम्।

अथ तद्धिते प्रागिवीयप्रकरणम्।

१९७४। दिक्छब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः। (५-३-२७)

सप्तम्याद्यन्तेभ्यो दिशि रूढेभ्यो दिग्देशकालवृत्तिभ्यः स्वार्थेऽस्तातिप्रत्ययः स्यात्।

१९७५। पूर्वाधरावराणामसिपुरधवश्चैषाम्। (५-३-३९)

गृह्यते सर्वथेत्यादौ तदप्रतीतेः। तेन प्रकारेणेत्यनन्तरं विशिष्ट इति शेषः। 'यथा हरिः तथा हरः' इत्यादौ यत्प्रकारवान् हरिः तत्प्रकारवान् हरः इति बोधे सति हरिसदृशो हर इति फलति। तदभिप्रायेण यथाशब्दस्य सादृश्यार्थकत्वोक्तिः। **इदमस्थमुः** ॥ इदंशब्दात्प्रकारवृत्तेः थमुप्रत्ययः स्यादित्यर्थः। प्रत्यये उकार उच्चारणार्थः। मकारस्य उपदेशे अन्त्यत्वाभावान्नेत्त्वम्। यद्यपि 'न विभक्तौ' इति निषेधादेव मस्येत्त्वं न भवति। तथापि तदनित्यत्वज्ञापनार्थं मकारोच्चारणमित्याहुः। **इत्थमिति** ॥ 'एतेतौ रथोः' इति प्रकृतेरिदमः इदादेशः। एतच्छब्दात् थमुप्रत्यये तु एतद इति योगविभागात् इदादेशः। **किमश्च** ॥ प्रकारवृत्तेस्थमुरिति शेषः। **कथमिति** ॥ 'किमः कः' इति कादेशः॥

इति तद्धिते प्राग्दिशीयानां विभक्तिसंज्ञकानां पूर्णोऽवधिः।

अथ प्रागिवीयप्रकरणमारभ्यते—**दिक्छब्देभ्यः** ॥ **सप्तम्याद्यन्तेभ्य इति** ॥ सप्तमीपञ्चमीप्रथमान्तेभ्य इत्यर्थः। **रूढेभ्य इति** ॥ शब्दग्रहणलभ्यमिदम्। अस्तातिप्रत्यये इकार उच्चारणार्थः। तकारान्तः प्रत्ययः। 'सङ्ख्याया विधार्थे धा' इतिसूत्रपर्यन्तमिदं सूत्रमस्तातिवर्जमनुवर्तते। अत्र विभक्तीनां दिगादीनाञ्च न यथासङ्ख्यं, व्याख्यानात्। **पूर्वाधरावराणाम्** ॥

एभ्योऽस्तात्यर्थेऽसिप्रत्ययः स्यात्, तद्योगे चैषां क्रमात् 'पुर्' 'अध्' 'अव्' इत्यादेशाः स्युः ।

१९७६ । अस्ताति च । (५-३-४०)

अस्तातौ परे पूर्वादीनां पुरादयः स्युः । पूर्वस्याम्—पूर्वस्याः—पूर्वा वा दिक् । पुरः—पुरस्तात् । अधः—अधस्तात् । अवः—अवस्तात् ।

१९७७ । विभाषाऽवरस्य । (५-३-४१)

अवरस्यास्तातौ परेऽव् स्याद्वा । अवस्तात्—अवरस्तात् । एवं देशे काले च । 'दिशि रूढेभ्यः' किम् । ऐन्द्र्यां वसति । 'सप्तम्याद्यन्तेभ्यः' किम् । पूर्वं ग्रामं गतः । 'दिगादिवृत्तिभ्यः' किम् । पूर्वस्मिन्गुरौ वसति । 'अस्ताति च' (सू १९७६) इति ज्ञापकादसिरस्तातिं न बाधते ।

१९७८ । दक्षिणोत्तराभ्यामतसुच् । (५-३-२८)

अस्तातेरपवादः । दक्षिणतः, उत्तरतः ।

असीति लुप्तप्रथमाकम् । पुर्, अध्, अव्, एषां द्वन्द्वात्प्रथमाबहुवचनम् । **अस्तात्यर्थे इति** ॥ दिक्देशकालवृत्तिभ्य इत्यर्थः । **अस्ताति च** ॥ अस्तातीति लुप्तसप्तमीकम् । अस्तातीति तकारान्तात् सप्तम्येकवचनं वा । पूर्वाधरावराणामिति पुरधव इति चानुवर्तते । तदाह । **अस्ताताविति** ॥ यद्यपि सूत्रक्रमे 'पूर्वाधर' इति 'अस्ताति च' इति 'सङ्ख्याया विधार्थे' इत्यतः प्राक् पठितम् । तत्र अस्तातौ पुराद्यादेशविधानाय 'अस्ताति च' इति सूत्रमुपन्यसनीयम् । तत्रानुवृत्तिप्रदर्शनाय 'पूर्वाधर' इत्यपि सूत्रमिहैवोपन्यस्तम् । **पुर इति** ॥ पूर्वाशब्दात् असिप्रत्ययः प्रकृतेः पुर् आदेशः । **पुरस्तादिति** ॥ पूर्वाशब्दात् अस्तातिप्रत्ययः प्रकृतेः पुर् आदेशः । **अधः, अधस्तादिति** ॥ अधरशब्दात् असिप्रत्यय अस्तातिप्रत्यये च प्रकृतेः अध् आदेशे रूपम् । **अव इति** ॥ अवरशब्दात् असिप्रत्यये प्रकृतेः अव् आदेशे रूपम् । **विभाषाऽवरस्य** ॥ 'अस्ताति च' इति पूर्वसूत्रादस्तातीत्यनुवर्तते । तदाह । **अवरस्येति** ॥ **एवमिति** ॥ पूर्वस्मिन् पूर्वस्मात् पूर्वो वा देशः, कालो वा पुरस्तादित्यादि । **पूर्वस्मिन्गुराविति** ॥ पूर्वकालिकाध्यापनकर्तरीत्यर्थः । ननु 'दिक्छब्देभ्यः' इति सामान्यविहितस्य परादिशब्देषु सावकाशस्य पूर्वाधरावरशब्देषु असिना विशेषविहितेन बाधः स्यादित्यत आह । **अस्ताति चेतीत्यादि** ॥ **दक्षिणोत्तराभ्याम्** ॥ दिग्देशकालवृत्तिभ्यामिति शेषः । **दक्षिणतः, उत्तरत इति** ॥ नच तसुजेव प्रत्ययोऽस्तु । दिग्वर्तित्वं तु 'सर्वनाम्नो वृत्तिमात्रे' इति पुंवत्त्वेनैन दक्षिणतः इत्यादि सिद्धमिति वाच्यम् । स्पष्टार्थत्वात् । अत एव भाष्ये अकारः प्रत्याख्यातः । केचित्तु अकारोच्चारणमन्यतो विधानार्थम् । तेन पुरत इति सिद्धमित्याहुः ।

१९७९। विभाषा परावराभ्याम्। (५-३-२९)

परतः। अवरतः। परस्तात्। अवरस्तात्।

१९८०। अञ्चेर्लुक्। (५-३-३०)

अञ्चत्यन्ताद्दिक्छब्दादस्तातेर्लुक्स्यात्। 'लुक्तद्धितलुकि' (सू १४०८)। प्राच्यां प्राच्याः प्राची वा दिक् प्राक्। उदक्। एवं देशे काले च।

१९८१। उपर्युपरिष्टात्। (५-३-३१)

अस्तातेर्विषये ऊर्ध्वशब्दस्योपादेशः स्याद्रिलिरिष्टातिलौ च प्रत्ययौ। उपरि–उपरिष्टाद्वा वसति, आगतो, रमणीयं वा।

१९८२। पश्चात्। (५-३-३२)

अपरस्य पश्चभाव आतिश्च प्रत्ययोऽस्तातेर्विषये।

१९८३। उत्तराधरदक्षिणादातिः। (५-३-३४)

उत्तरात्। अधरात्। दक्षिणात्।

१९८४। एनबन्यतरस्यामदूरेऽपञ्चम्याः। (५-३-३५)

उत्तरादिभ्य एनब्वा स्यादवध्यवधिमतोः सामीप्ये पञ्चमीं विना। **उत्तरेण**। अधरेण। दक्षिणेन। पक्षे यथास्वं प्रत्ययाः। इह केचिदुत्तरादीननुवर्त्य दिक्छब्दमात्रादेनपमाहुः। पूर्वेण ग्रामम्। अपरेण ग्रामम्।

समानकालीनमित्यादिवत् पुरत इति प्रामादिकमेवेति बहवः। **विभाषा** ॥ अतसुजिति शेषः। पक्षे अस्तातिः। **अञ्चेर्लुक्** ॥ **प्राच्यामिति** ॥ लिङ्गविशिष्टपरिभाषया अस्तातेर्लुक्। **उपर्युपरिष्टात्** ॥ "ऊर्ध्वस्य उपभावः रिल्प्रत्ययो रिष्टातिल्प्रत्ययश्च" इति भाष्यम्। तदाह। **अस्तातेर्विषये इत्यादिना** ॥ **वसति, आगतो, रमणीयं वेति** ॥ विभक्तित्रयस्य यथासङ्ख्यमन्वयः। **पश्चात्** ॥ "अपरस्य पश्चभावः, आतिश्च प्रत्ययः" इति भाष्यवाक्यमिदम्। प्रत्यये इकार उच्चारणार्थः। **उत्तराधर** ॥ आतिप्रत्यये इकार उच्चारणार्थः। अस्तातेरपवादः। **एनबन्यतरस्याम्** ॥ "अपञ्चम्या इति प्रागस्य" इति भाष्यम्। सूत्रक्रमे 'पूर्वाधर' इत्यसिं वक्ष्यति। ततः प्रागित्यर्थः। **उत्तरादिभ्य इति** ॥ उत्तराधरदक्षिणादित्यनुवर्तत इति भावः। अदूरे इत्येतद्व्याचष्टे। **अवध्यवधिमतोः सामीप्ये इति** ॥ **पञ्चमीं विनेति** ॥ पञ्चम्यन्तान्न भवतीत्यर्थः। **यथास्वमिति** ॥ एनबभावे पक्षे अस्तातिः असिः आतिश्चेत्यर्थः। **दिक्छब्दमात्रादिति** ॥ अञ्चत्यन्तात्तु नेदम्। व्यवस्थितविभाषाश्रयणात्।

---

१. यथाक्रमः सप्तमीपञ्चमीप्रथमाविभक्त्यन्तानामुदाहरणम्।

१९८५ । दक्षिणादाच् । (५-३-३६)

अस्तातेर्विषये । दक्षिणा वसति । 'अपञ्चम्याः' इत्येव । दक्षिणादागतः ।

१९८६ । आहि च दूरे । (५-३-३७)

दक्षिणादूरे आहि स्यात् । चादाच् । दक्षिणाहि—दक्षिणा ।

१९८७ । उत्तराच्च । (५-३-३८)

उत्तराहि—उत्तरा ।

१९८८ । सङ्ख्याया विधार्थे धा । ५-३-४२)

क्रियाप्रकारार्थे वर्तमानात्सङ्ख्याशब्दात्स्वार्थे धा स्यात् । चतुर्धा । पञ्चधा ।

१९८९ । अधिकरणविचाले च । (५-३-४३)

द्रव्यस्य सङ्ख्यान्तरापादने सङ्ख्याया धा स्यात् । एकं राशिं पञ्चधा कुरु ।

१९९० । एकाद्धो ध्यमुञन्यतरस्याम् । (५-३-४४)

ऐकध्यम्—एकधा ।

तेन प्राक् ग्रामेणेत्यादि न भवतीत्याहुः । **दणिणादाच्** ॥ **अस्तातेर्विषये इति** ॥ एतेन अदूरे इति नानुवर्तते इति सूचितम् । एवञ्च आच्प्रत्यये, उत्तराधरदक्षिणादित्यातिप्रत्यये, दक्षिणोत्तराभ्यां इत्यतसुचि च त्रीणि रूपाणि । **आहि च दूरे** ॥ दक्षिणाशब्दादिति शेषः । **चादाजिति** ॥ तथा दूरे उक्तरूपत्रयेण सह चत्वारि रूपाणीति भावः । **उत्तराच्च** ॥ आच् आहि चेति शेषः । अतसुचा आतिना च चत्वारि रूपाणि । **सङ्ख्याया विधार्थे धा** ॥ विधाशब्दस्यार्थः प्रकारः विधार्थः "विधा विधौ प्रकारे च" इत्यमरः । सामान्यस्य भेदको विशेषः प्रकारः । स चाभिधानस्वभावात् क्रियाविषयक एव गृह्यते । तदाह । **क्रियाप्रकारेति** ॥ **चतुर्धा । पञ्चधेति** ॥ गच्छतीत्यादिक्रियापदमध्याहार्यम् । चतुष्प्रकारा गमनादिक्रियेति बोधः । नवधा द्रव्यमित्यादावपि भवतीत्यादिक्रियापदमध्याहार्यम् । **अधिकरणविचाले च** ॥ अधिकरणं द्रव्यं, तस्य विचालः विचालनं सङ्ख्यान्तरापादनम् । तदाह । **द्रव्यस्येति** ॥ सङ्ख्यान्तरापादनञ्च न्यूनसङ्ख्यस्य अधिकसङ्ख्याकरणम् अधिकसङ्ख्यस्य न्यूनसङ्ख्याकरणञ्च । आद्ये उदाहरति । **एकं राशिं पञ्चधा कुर्विति** ॥ द्वितीये तु अनेकमेकधा कुर्वित्युदाहार्यम् । इह राशिविषयक एव प्रकारो गम्यते नतु क्रियाप्रकार इति सूत्रारम्भः । **एकाद्धो ध्यमुञन्यतरस्याम्** ॥ एकात् धः इति छेदः । धाशब्दस्य ध इति पञ्चम्येकवचनम् । एकशब्दात्परस्य धाप्रत्ययस्य ध्यमुञादेशः स्यादित्यर्थः । **ऐकध्यमिति** ॥ नच एकशब्दात् ध्यमुञ्प्रत्ययः स्वतन्त्रो विधीयताम्,

१९९१। द्वित्र्योश्च धमुञ्। (५-३-४५)

आभ्यां 'धा' इत्यस्य धमुञ्स्याद्वा। द्वैधम्–द्विधा। त्रैधम्–त्रिधा। 'धमुञन्तात्स्वार्थे डदर्शनम्' (वा ३२६०)। पथि द्वैधानि।

१९९२। एधाच्च। (५-३-४६)

द्वेधा। त्रेधा।

१९९३। याप्ये पाशप्। (५-३-४७)

कुत्सितो भिषक् भिषकपाशः।

१९९४। पूरणाद्भागे तीयादन्। (५-३-४८)

द्वितीयो भागो द्वितीयः। तृतीयः। स्वरे विशेषः। 'तीयादीकक्स्वार्थे वा वाच्यः' (वा २६९१)। द्वैतीयीकः–द्वितीयः। तार्तीयीकः–तृतीयः। 'न विद्यायाः' (वा २६९२)। द्वितीया, तृतीया, विद्येत्येव।

१९९५। प्रागेकादशभ्योऽछन्दसि। (५-३-४९)

पूरणप्रत्ययान्ताद्भागेऽन्। चतुर्थः। पञ्चमः।

नतु धाप्रत्ययस्यादेश इति वाच्यम्। तथा सति अधिकरणविचाल एव सन्निहितत्वादापत्तेः। **द्वित्र्योश्च धमुञ्**॥ षष्ठी पञ्चम्यर्थे। ध इति अन्यतरस्यामिति चानुवर्तते। तदाह। **आभ्यामिति**॥ परस्येति शेषः। **धमुञन्तादिति**॥ वार्तिकमिदम्। दर्शिग्रहणात् क्वचिदेवायम्। **पथि द्वैधानीति**॥ तृणानीति शेषः। द्वैधमित्यस्मात् डप्रत्यये टिलोपे रूपम्। नच 'तसिलादयः प्राक् पाशपः' इति डप्रत्ययान्तस्याप्यव्ययत्वं शङ्क्यम्। स्वभावतः सत्ववचनत्वेनाव्ययत्वासम्भवात् "द्वैधानि" इति भाष्यप्रयोगाच्च। **एधाच्च**॥ द्वित्रिभ्याम्परस्य धाप्रत्ययस्य एधाजित्यादेशः स्यादित्यर्थः। 'पञ्चम्यास्तसिल्' इत्यारभ्य 'एधाच्च' इत्यन्तैर्विहितप्रत्ययान्तानामव्ययत्वम्। **याप्ये पाशप्**॥ याप्यः कुत्सितः। "निकृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमाः" इत्यमरः। कुत्सिते विद्यमानात् स्वार्थे पाशप् स्यादित्यर्थः "प्रवृत्तिनिमित्तकुत्सायामिदम्। अप्रवृत्तिनिमित्तकुत्सायामपि कुत्सित इति वक्ष्यमाणं भवति" इति भाष्ये स्पष्टम्। **पूरणाद्भाग**॥ पूरणार्थकतीयप्रत्ययान्तात् भागे विद्यमानात्स्वार्थे अन् स्यादित्यर्थः। अन्विधेः प्रयोजनमाह। **स्वरे विशेष इति**॥ 'ञ्नित्यादिः नित्यम्' इति स्वरे इत्यर्थः। **तीयादीकगिति**॥ वार्तिकमिदम्। 'दृष्टं साम' इति सूत्रभाष्ये स्थितम्। **न विद्यायाः इति**॥ वार्तिकमिदमपि तत्रैव स्थितम्। विद्यावृत्तेः तीयप्रत्ययान्तादीकक् नेत्यर्थः। **प्रागेकादशभ्यः**॥ शेषपूरणेन सूत्रं व्याचष्टे। **पूरणप्रत्ययान्तात् भागे अनिति**॥ द्वितीयतृतीयशब्दाभ्याम्पूर्वसूत्रेण सिद्धत्वाच्चतुर्थादिदशशब्दपर्यन्तविषयमभिप्रेत्योदाहरति। **चतुर्थ इति**॥ नचानेनैव सिद्धत्वात्पूर्वसूत्रङ्किमर्थ-

१९९६ । षष्ठाष्टमाभ्यां ञ च । (५-३-५०)

चादन् । षष्ठो भागः षाष्ठः—षष्ठः । आष्टमः—अष्टमः ।

१९९७ । मानपश्वङ्गयोः कन्लुकौ च । (५-३-५१)

षष्ठाष्टमशब्दाभ्यां क्रमेण कन्लुकौ स्तो माने पश्वङ्गे च वाच्ये । षष्ठको भागः मानं चेत् । अष्टमो भागः पश्वङ्गं चेत् । अस्यानो वा लुक् । चकाराद्यथाप्राप्तम् । षष्ठः—षाष्ठः । अष्टमः—आष्टमः । महाविभाषया सिद्धे लुग्वचनं पूर्वत्र ञानौ नित्याविति ज्ञापयति ।

१९९८ । एकादाकिनच्चासहाये । (५-३-५२)

चात्कन्लुकौ । एकः—एकाकी—एककः ।

१९९९ । भूतपूर्वे चरट् । (५-३-५३)

आढ्यो भूतपूर्व आढ्यचरः ।

२००० । षष्ठ्या रूप्य च । (५-३-५४)

षष्ठ्यन्ताद्भूतपूर्वेऽर्थे रूप्यः स्याच्चरट् च । कृष्णस्य भूतपूर्वो गौः कृष्णरूप्यः--कृष्णचरः । तसिलादिषु रूप्यस्यापरिगणितत्वान्न पुंवत् । शुभ्राया भूतपूर्वः शुभ्रारूप्यः ।

मिति शङ्क्यम् । तस्य छन्दस्यपि प्रवृत्त्यर्थत्वात् । **षष्ठाष्टमाभ्यां ञ च** ॥ पूर्वसूत्रविषये इति शेषः । ञेति लुप्तप्रथमाकम् । ञे आदिवृद्धिः । **चादनिति** ॥ इह न यथासङ्ख्यम् । व्याख्यानात् । **मानपश्वङ्गयोः** ॥ **अस्य अनो वेति** ॥ अष्टमशब्दात्पूर्वसूत्रविहितस्य ञप्रत्ययस्य अन्प्रत्ययस्य च अनेन लुगित्यर्थः । **चकाराद्यथाप्राप्तमिति** ॥ ञप्रत्ययः अन्प्रत्ययश्चेत्यर्थः । ननु 'समर्थानाम्' इत्यतो वाग्रहणानुवृत्त्यैव ञानोरभावे सति पश्वङ्गे अष्टमो भाग इत्यस्य सिद्धेरिह लुग्विधानं व्यर्थमित्याशङ्क्य आह । **महाविभाषयेति** ॥ **पूर्वत्रेति** ॥ 'षष्ठाष्टमाभ्यां ञ च' इति सूत्रे इत्यर्थः । एवं षष्ठाष्टमाभ्यां शब्दाभ्यां ञानोरिह नित्यम्प्राप्तयोः कदाचिल्लुग्विधिरर्थवानित्यर्थः । **एकादाकिनच्चासहाये** ॥ असहायवाचकादेकशब्दात्स्वार्थे आकिनच्प्रत्ययः स्यादित्यर्थः । **भूतपूर्वे चरट्** ॥ भूतपूर्वे वर्तमानात्प्रातिपदिकात् स्वार्थे चरट् स्यादित्यर्थः । **षष्ठ्या रूप्य च** ॥ रूप्येति लुप्तप्रथमाकम् । भूतपूर्वे इत्यनुवर्तते । **षष्ठ्यन्तात् भूतपूर्वेऽर्थे इति** ॥ भूतपूर्वेऽर्थे विद्यमानात् षष्ठ्यन्तादित्यन्वयः । भूतपूर्वे इत्यनुवृत्तं हि श्रुतत्वात् षष्ठ्या विशेषणम् । भूतपूर्वे सम्बन्धे या षष्ठी तदन्तात्स्वार्थे रूप्यः स्यादिति फलति । यथाश्रुते तु स्वार्थिकप्रकरणविरोधः । **कृष्णरूप्य इति** ॥ भूतपूर्वगत्या कृष्णसम्बन्धी गौरित्यर्थः । शुभ्रारूप्यशब्दे 'तसिलादिषु' इति पुंवत्त्वमाशङ्क्य 'तसिलादयः प्राक् पाशपः' इत्यादिवार्तिकपरिगणितेषु रूप्यस्यानन्तर्भावात्तस्मिन्परे पुंवत्त्वं नेत्याह । **तसिलादिष्वित्यादि** ॥

२००१। अतिशायने तमबिष्ठनौ। (५-३-५५)

अतिशयविशिष्टार्थवृत्तेः स्वार्थे एतौ स्तः। अयमेषामतिशयेनाढ्यः आढ्यतमः। लघुतमो लघिष्ठः।

२००२। तिङश्च। (५-३-५६)

तिङन्तादतिशये द्योत्ये तमप्स्यात्।

२००३। तरप्तमपौ घः। (१-१-२२)

एतौ घसंज्ञौ स्तः।

शुभ्राया भूतपूर्व इति ॥ गौरिति शेषः। **शुभ्रारूप्य इति** ॥ भूतपूर्वगत्या शुभ्रासम्बन्धी गौरित्यर्थः। **अतिशायने** ॥ अतिपूर्वक शीङ्धातुरुपसर्गवशादुत्कर्षे वर्तते। उत्कर्षश्चाधिक्य-फलको न्यक्कारः, नत्वाधिक्यमात्रम्। तथा सति अकर्मकत्वापातात्। नचेष्टापत्तिः। तथा सति "शुक्लमतिशेते शुक्लतरः, कृष्णमतिशेते कृष्णतरः" इत्यादि भाष्यविरोधात्। "अतिशयिता अतिशायनः, बाहुलकः कर्तरि ल्युट्" इति भाष्यम्। अत एव निपातनाद्दीर्घः। अतिशायने इति प्रकृत्यर्थविशेषणम्। अतिशयितरि विद्यमानात् प्रातिपदिकात् स्वार्थे तमप् स्यादित्यर्थः। फलितमाह। **अतिशयविशिष्टार्थवृत्तेरिति** ॥ यदि तु अतिशायनशब्दस्य भावल्युडन्तत्वं तर्हि प्रत्ययार्थस्य प्राधान्यापत्तौ शुक्लतरादिशब्दात् शुक्लादिगतमतिशयनमिति बोधः स्यात्। नत्वतिशयितशुक्ल इति। तथा च शुक्लतरः शुक्लतरेति पुंस्त्वञ्च स्त्रीत्वञ्च न स्यात्। अतिशायने वर्तमानादित्यर्थे तु अतिशयप्रकर्षादिशब्देभ्य एव स्यात् नतु पट्वादिभ्यः। अतिशयविशिष्टे लक्षणया विद्यमानादित्यर्थे अतिशय्यमानादपि प्रत्ययापत्तिः। अतिशयनकर्तरि लक्षणायान्तु भाष्योक्तमेव साधु इत्यास्तां तावत्। **अयमेषामिति** ॥ द्वयोरेकस्य निर्धारणे तरबीयसुना-वपवादौ वक्ष्येते। अतः परिशेषाद्बहूनामेकस्य निर्धारणे अस्य तमपः प्रवृत्तिरिति भावः। **अतिशयेनाढ्य इति** ॥ द्रव्यस्य जातेर्वा स्वतः प्रकर्षयोगो नास्ति। अन्यथा घटतम इत्याद्यापत्तेः। किन्तु गुणद्वारैव द्रव्यजात्योः प्रकर्षयोगः। तथा च आढ्यतम इत्यत्र उत्कर्षविशिष्टः आढ्यः प्रकृत्यर्थः। तमप्तु तद्द्योतकः। तमपि साति 'सुपो धातु' इति सुपो लुक्। 'घकालतनेषु' इति योगेन सुबन्तादेव तद्धितोत्पत्तेरुक्तत्वात्। अत्र आतिशायनिकप्रत्ययान्ता-दातिशायनिकप्रत्ययोऽनभिधानान्न भवति। "श्रेष्ठतमाय कर्मणे" इति तु छान्दसमिति भाष्ये स्पष्टम्। **लघिष्ठ इति** ॥ लघुशब्दादिष्ठनि ओर्गुणे प्राप्ते 'इष्ठेमेयस्सु' इत्यनुवृत्तौ 'टेः' इति टिलोपः। **तिङश्च** ॥ अत्राप्रातिपदिकादप्राप्ते वचनम्। **तमप् स्यादिति** ॥ 'अजादी गुण-वचनादेव' इति नियमादिष्ठन्नानुवर्तते इति भावः। **तरप्तमपौ घः** ॥ प्रथमस्य प्रथमपादे सूत्र-मिदम्। आतिशायनिकप्रत्ययप्रकरणान्ते पितौ घः, तादी घः, इति वा वक्तव्ये प्रकरणान्तरे पृथ-ग्गुरुसूत्रकरणमत्यन्तस्वार्थिकमपि तरपं ज्ञापयति। तस्य आतिशायनिकप्रकरणबहिर्भूतस्य सत्त्वे तत्सङ्ग्रहणार्थं प्रकरणान्तरे सूत्रकरणस्यावश्यकत्वादित्याहुः। तेन 'अल्पाच्तरं' 'लोपश्च बलवत्तरः'

२००४ । किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे । (५-४-११)

किम एदन्तात्तिङोऽव्ययाच्च यो घस्तदन्तादामुः स्यान्न तु द्रव्यप्रकर्षे । किन्तमाम् । प्राह्णेतमाम् । पचतितमाम् । उच्चैस्तमाम् । द्रव्यप्रकर्षे तु उच्चैस्तमस्तरुः ।

२००५ । द्विवचनविभज्योपपदे तरबीयसुनौ । (५-३-५७)

द्वयोरेकस्यातिशये विभक्तव्ये चोपपदे सुप्तिङन्तादेतौ स्तः । पूर्वयोरपवादः । अयमनयोरतिशयेन लघुः लघुतरः—लघीयान् । उदीच्याः प्राच्येभ्यः पटुतराः—पटीयांसः ।

इत्यादि सिद्धम् । **किमेत्तिङव्यय** ॥ आमु इति छेदः । उकार उच्चारणार्थः । किम्, एत्, तिङ्, अव्यय, एषाञ्चतुर्णां द्वन्द्वः । 'किमेत्तिङव्ययप्रकृतिको घः' इति मध्यपदलोपी समासः । फलितमाह । **किम एदन्तादित्यादिना** ॥ एभ्य इत्यर्थः । **किन्तमामिति** ॥ अत्यन्तस्वार्थिकोऽयं तमप् नत्वातिशायने । एषामतिशयनाद्य इतिवदेषामतिशयेन क इति विग्रहस्यासम्भवात् । जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं हि निर्धारणम् । किंशब्दश्च न जात्याद्यन्यतमप्रवृत्तिनिमित्तकः । एवञ्चात्रातिशयस्याप्रतीतेर्द्रव्यप्रकर्षो दूरापास्त इति भावः । **प्राह्णेतमामिति** ॥ प्राह्णः पूर्वाह्णः । "प्राह्णापराह्णमध्याह्णास्त्रिसन्ध्यम्" इत्यमरः । अतिशयिते पूर्वाह्णे इत्यर्थः । पूर्वावयवगतप्रकर्षादह्नः प्रकर्षो बोध्यः । अत्र अहर्न द्रव्यम् । सूर्योदयादारभ्य सूर्यास्तमयावधिकस्यैव कालस्य अहन्शब्दार्थत्वात् । तस्य च उदयादिक्रियाघटितत्वान्न द्रव्यत्वमिति भावः । **पचतितमामिति** ॥ अतिशयिता पाकक्रियेत्यर्थः । तिङन्तेषु क्रियाविशेष्यकबोधस्यैव "प्रशंसायां रूपप्" इति सूत्रभाष्ये प्रपञ्चितत्वात् । अतोऽत्र क्रियाया एव प्रकर्षो नतु द्रव्यस्येति भावः । **उच्चैस्तमामिति** ॥ आशंसतीत्यध्याहार्यम् । अतिशयेन उच्चैराशंसनादिक्रियेत्यर्थः । अत्रापि क्रियाया एव प्रकर्षो नतु द्रव्यस्य । **उच्चैस्तमस्तरुरिति** ॥ अतिशयेन उच्चैस्तरुरित्यर्थः । अत्र उच्चैस्त्वप्रकर्षस्य तरौ द्रव्ये भानादाम्नेत्यर्थः । किन्तमामित्यादौ 'यस्येति च' इति लोपं परत्वात् बाधित्वा ह्रस्वान्तलक्षणनुटो निवृत्त्यर्थमामु इत्युकारोच्चारणम् । सति तु तस्मिन् 'निरनुबन्धकग्रहणे न सानुबन्धकस्य' इति परिभाषया नुड्विधावस्य न ग्रहणमित्यादि 'आमि सर्वनाम्नः' इति सूत्रभाष्ये प्रपञ्चितम् । **द्विवचन** ॥ उच्यतेऽनेनेति वचनम् । द्वयोरर्थयोर्वचनं द्विवचनम् । द्व्यर्थप्रतिपादकमिति यावत् । न द्विवचनसंज्ञकमिह गृह्यते व्याख्यानात् । विभक्तव्यं विभज्यम् । 'ऋहलोः' इति ण्यतम्बाधित्वा निपातनाद्यत् । द्विवचनं च विभज्यञ्चेति समाहारद्वन्द्वः । द्विवचनविभज्यञ्च तदुपपदञ्चेति कर्मधारयः । द्व्यर्थप्रतिपादके विभक्तव्यविषयके च उपपदे सतीति फलितम् । प्रातिपदिकादिति तिङ इति चानुवर्तते । सुबन्तात्तद्धितोत्पत्तिरिति सिद्धान्तात्सुबन्तत्वम्प्रातिपदिकविशेषणं लभ्यते । फलितमाह । **द्वयोरेकस्येत्यादिना** ॥ द्वयोर्मध्ये अन्यतरापेक्षया अतिशयविशिष्टस्वार्थवृत्तेः विभागप्रयोजकीभूतधर्मवाच-

२००६ । अजादी गुणवचनादेव । (५-३-५८)

इष्ठन्नीयसुनौ गुणवचनादेव स्तः । प्रथिष्ठः—प्रथीयान् । नेह । पाचकतरः—पाचकतमः ।

२००७ । तुश्छन्दसि । (५-३-५९)

तृन्तृजन्तादिष्ठन्नीयसुनौ स्तः ।

२००८ । तुरिष्ठेमेयःसु । (६-४-१५४)

तृशब्दस्य लोपः स्यात् एषु परेषु । अतिशयेन कर्ता करिष्ठः । दोहीयसी धेनुः ।

काच्च शब्दात्स्वार्थे तरबीयसुनौ स्त इति यावत् । यद्यप्यत्र द्वे सुवन्तातिङन्ते प्रकृती, द्वौ च प्रत्ययौ, तथापि न यथासङ्ख्यम् । व्याख्यानात् । अथ द्विवचनोपपदे उदाहरति । **अयमनयोरिति** ॥ अत्र उपोच्चारितमिदं उपपदम्, नतु कृत्रिमम् । तद्धितविधौ तदसम्भवात् । धात्वधिकार एव तत्प्रवृत्तेरुक्तत्वात् । तच्चोपपदं विग्रहवाक्येऽवश्यं प्रयुज्यते । तद्धितवृत्तौ तु गतार्थत्वान्नावश्यकम् । **लघीयानिति** ॥ ईयसुनि नकार इत्, उकार उच्चारणार्थः, उगित्त्वान्नुम्, 'सान्त' इति दीर्घः, हल्ङ्यादिसंयोगान्तलोपौ । अथ विभज्योपपदे उदाहरति । **उदीच्याः प्राच्येभ्य इति** ॥ 'पञ्चमी विभक्ते' इति पञ्चमी । द्विवचनसंज्ञकग्रहणे तु दन्ताः स्निग्धतराः इति न सिध्येत् । "बहुषु पुत्रेषु एतदुपपन्नं भवति । अयम्मे ज्येष्ठः, अयम्मे मध्यमः, अयम्मे कनीयान्" इति 'आद्यन्तवत्' सूत्रस्थभाष्यप्रयोगात् । नैर्देशिकानां वार्ततरका इति 'तस्मिन्' इति सूत्रभाष्यप्रयोगाच्च । अद्व्यर्थोपपदेऽपि तरबीयसुनावित्याहुः । **अजादी** ॥ तरसमपौ इष्ठन्नीयसुनौ चेति चत्वारः प्रत्ययाः अनुक्रान्ताः । तेषाम्मध्ये यौ अजादी इष्ठन्नीयसुनौ तावित्यर्थः । तदाह । **इष्ठन्नीयसुनाविति । पाचकतरः—पाचकतम इति** ॥ क्रियाशब्दत्वादाभ्यामिष्ठन्नीयसुनौ नेति भाव. । गुणवचनादजादी एवेति विपरीतनियमव्यावृत्त्यर्थः एवकारः । तेन पटुतरः पटुतमः इत्यादि सिद्धम् । **तुश्छन्दसि** ॥ तृ इत्यस्य तुरिति पञ्चम्येकवचनम्, तृ इत्यनेन तृन्तृचोः सामान्येन ग्रहणम्, प्रत्ययत्वात्तदन्तग्रहणम् । अजादी इत्यनुवर्तते । तदाह । **तृन्तृजन्तादिति** ॥ अगुणवचनादपि तृप्रत्ययान्तात् प्राप्त्यर्थमारम्भः । एवञ्च पूर्वेण नियमेन व्यावर्तितयोः प्रतिप्रसवोऽयं नत्वपूर्वो विधिरिति सूचयितुं छान्दसमप्यत्रोपन्यस्तम् । तथाच अगुणवचनादपि कर्तृशब्दादिष्ठन्प्रत्यये कर्तृ इष्ठ इति स्थिते 'इष्ठेमेयस्सु' इति विहिते टिलोपे प्राप्ते । **तुरिष्ठेमेयःसु** ॥ तृ इत्यस्य तुरिति षष्ठ्येकवचनम् । **एष्विति** ॥ इष्ठन्, इमन्, ईयस्, इत्येतेष्वित्यर्थः । अयं लोपसामर्थ्यादन्तादेशः । अन्यथा ऋकारस्य 'टेः' इत्येव सिद्धेः । **करिष्ठ इति** ॥ अयमनयोरतिशयेन कर्तेत्यर्थः । **दोहीयसी धेनुरिति** ॥ इयमनयोरतिशयेन दोग्ध्रीत्यर्थः । इष्ठनि 'भस्याढे' इति पुंवत्त्वे ङीपो निवृत्तौ तृप्रत्ययस्य लोपे परनिमित्ताभावात् 'दादेः' इति घत्वस्य निवृत्तौ उगित्त्वात् ङीपि दोहीयसीति रूपम् । 'पुगन्त' इति गुणस्तु न निवर्तते ।

२००९ । प्रशस्यस्य श्रः । (५-३-६०)

अस्य श्रादेशः स्यादजाद्योः ।

२०१० । प्रकृत्यैकाच् । (६-४-१६३)

इष्ठादिष्वेकाच्प्रकृत्या स्यात् । श्रेष्ठः—श्रेयान् ।

२०११ । ज्य च । (५-३-६१)

प्रशस्यस्य ज्यादेशः स्यादिष्ठेयसोः । ज्येष्ठः ।

२०१२ । ज्यादादीयसः । (६-४-१६०)

'आदेः परस्य' (सू ४४) । ज्यायान् ।

२०१३ । वृद्धस्य च । (५-३-६२)

ज्यादेशः स्यादजाद्योः । ज्येष्ठः—ज्यायान् ।

२०१४ । अन्तिकबाढयोर्नेदसाधौ । (५-३-६३)

अजाद्योः । नेदिष्ठः—नेदीयान् । साधिष्ठः—साधीयान् ।

२०१५ । स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः । (६-४-१५६)

लुप्तेऽपि तृचि प्रत्ययलक्षणेन तत्सत्त्वात् । **प्रशस्यस्य श्रः** ॥ **अजाद्योरिति** ॥ इष्ठन्नीयसुनोरित्यर्थः । अजादी इत्यनुवृत्तं सप्तम्या विपरिणम्यते इति भावः । प्रशस्यशब्दस्य क्रियाशब्दतया गुणवचनत्वाभावेऽपि अत एव ज्ञापकादिष्ठन्नीयसुनौ । श्र इष्ठ, श्र ईयस्, इति स्थिते इष्ठेमेयस्सु विहितटिलोपे प्राप्ते । **प्रकृत्यैकाच्** ॥ एकः अच् यस्येति बहुव्रीहिः । **इष्ठादिष्विति** ॥ 'तुरिष्ठेमेयस्सु' इत्यतः तदनुवृत्तेरिति भावः । 'अल्लोपोऽनः, नस्तद्धिते, यस्येति च, टेः' इत्यादेरेतत्प्रकरणस्थलोपस्यायं प्रकृतिभावः" इति भाष्ये स्पष्टम् । **श्रेष्ठः-श्रेयानिति** ॥ अयमनयोरातिशयेन प्रशस्य इत्यर्थः । **ज्य च** ॥ 'ज्य' इति लुप्तप्रथमाकं प्रशस्येति अजादी इति चानुवर्तते । तदाह । **प्रशस्यस्येति** ॥ **ज्येष्ठ इति** ॥ 'प्रकृत्यैकाच्' इति प्रकृतिभावान्न टिलोपः । ईयसुनि ज्यादेशे ज्येयानिति प्राप्ते । **ज्यादादीयसः** ॥ ज्यात्, आत्, इति छेदः । ज्यात् परस्य ईयसः आकारः स्यादित्यर्थः । अन्तादेशत्वे प्राप्ते आह । **आदेः परस्येति** ॥ **वृद्धस्य च** ॥ शेषपूरणेन सूत्रं व्याचष्टे । **ज्यादेशः स्यादजाद्योरिति** ॥ इष्ठन्नीयसुनोरित्यर्थः । **ज्येष्ठ इति** ॥ अयमनयोरातिशयेन वृद्ध इत्यर्थः । **अन्तिकबाढयोः** ॥ **अजाद्योरिति** ॥ शेषपूरणमिदम् । अन्तिक, बाढ, अनयोः इष्ठेयसुनोः परतः नेद, साध, एतावादेशौ स्त इत्यर्थः । **नेदिष्ठः-नेदीयानिति** ॥ अयमनयोरतिशयेनान्तिक इत्यर्थः । **साधिष्ठः-साधीयानिति** ॥ अयमनयोरातिशयेन बाढ इत्यर्थः । बाढो भृशः । "भृशप्रतिज्ञयोर्बाढम्" इत्यमरः । "अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरम्" इति च । **स्थूलदूर** ॥ **एषामिति** ॥

एषां यणादिपरं लुप्यते, पूर्वस्य च गुण इष्ठादिषु। स्थविष्ठः। दविष्ठः। यविष्ठः। ह्रसिष्ठः। क्षेपिष्ठः। क्षोदिष्ठः। एवम् ईयस्। ह्रस्वक्षिप्रक्षुद्राणां पृथ्वादित्वात् ह्रसिमा। क्षेपिमा। क्षोदिमा।

२०१६। प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घबृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रब्द्राघिबृन्दाः। (६-४-१५७)

प्रियादीनां क्रमात्प्रादयः स्युरिष्ठादिषु। प्रेष्ठः। स्थेष्ठः। स्फेष्ठः। वरिष्ठः। बंहिष्ठः। गरिष्ठः। वर्षिष्ठः। त्रपिष्ठः। द्राघिष्ठः। बृन्दिष्ठः। एवमीयसुन्। प्रियोरुबहुळगुरुदीर्घादीनां पृथ्वादित्वात् प्रेमा, इत्यादि।

स्थूल, दूर, युवन्, ह्रस्व, क्षिप्र, क्षुद्र, इत्येतेषामित्यर्थः। **यणादीति**॥ यण् आदिर्यस्येति विग्रहः। परमिति यणादीत्यस्य विशेषणम्, परभूतं यणादीत्यर्थः। **लुप्यते इति**॥ 'अल्लोपोऽनः' इत्यतोऽनुवृत्तं लोपपदमिह कर्मणि घञन्तमाश्रीयते इत्यर्थः। भावसाधनत्वे परमित्यनेन सामानाधिकरण्यासम्भवात्। **पूर्वस्येति**॥ पूर्वत्वं यणपेक्षया बोध्यम्। **इष्ठादिष्विति**॥ 'तुरिष्ठेमेयस्सु' इत्यतस्तदनुवृत्तेरिति भावः। **स्थविष्ठ इति**॥ स्थूलशब्दादिष्ठनि ल इत्यस्य लोपे ऊकारस्य गुण ओकारः, अवादेश इति भावः। ओर्गुणस्तु न प्रवर्तते। यणादिलोपस्याभीयत्वेनासिद्धत्वात्। एवमग्रेऽपि। **दविष्ठ इति**॥ दूरशब्दादिष्ठनि र इत्यस्य लोपे ऊकारस्य गुणे अवादेशः। **यविष्ठ इति**॥ युवन्शब्दादिष्ठनि वनित्यस्य लोपे उकारस्य गुणे अवादेशः। परमित्यनुक्तौ यु इत्यस्यापि यणादेर्लोपः स्यात्। **ह्रसिष्ठ इति**॥ ह्रस्वशब्दादिष्ठनि व इत्यस्य लोपः। परमित्यनुक्तौ अत्र रादेर्लोपः स्यात्। **क्षेपिष्ठ इति**॥ क्षिप्रशब्दादिष्ठनि र इत्यस्य लोपे इकारस्य गुणः। 'इको गुणवृद्धी' इत्युक्तेः न पकारस्य गुणः। **क्षोदिष्ठ इति**॥ क्षुद्रशब्दादिष्ठनि र इत्यस्य लोपः, उकारस्य गुणः। **एवमीयस् इति**॥ स्थवीयान्, दवीयान्, यवीयान्, ह्रसीयान्, क्षेपीयान्, क्षोदीयान्। इमनिजनुवृत्तेः प्रयोजनमाह। **ह्रस्वक्षिप्रेति**॥ **प्रियस्थिर**॥ **प्रियादीनामिति**॥ प्रिय, स्थिर, स्फिर, उरु, बहुळ, गुरु, वृद्ध, तृप्र, दीर्घ, बृन्दारक, एषान्दशानामित्यर्थः। **प्रादय इति**॥ प्र, स्थ, स्फ, वर्, बंहि, गर्, वर्षि, त्रप्, द्राघि, बृन्द, एते दशेत्यर्थः। इष्ठेमेयस्स्वित्यर्थः। 'तुरिष्ठेमेयस्सु' इत्यतः तदनुवृत्तेरिति भावः। **प्रेष्ठ इति**॥ प्रियशब्दादिष्ठनि प्रकृतेः प्रादेशः। यणादिलोपस्याभीयत्वेनासिद्धत्वादकारोच्चारणसामर्थ्याच्च न टिलोपः। आद्गुणः। **स्थेष्ठ इति**॥ स्थिरशब्दादिष्ठनि प्रकृतेः स्थादेशः। प्रकृतिभावान्न टिलोपः। **स्फेष्ठः इति**॥ स्फिरशब्दस्य इष्ठनि स्फादेशः। **वरिष्ठ इति**॥ उरुशब्दात् इष्ठनि वर् आदेशः। **बंहिष्ठ इति**॥ बहुळशब्दस्य बंहि इत्यादेशः। इकार उच्चारणार्थः। अन्यथा यणादिलोपस्याभीयत्वेनासिद्धत्वात् उच्चारणसामर्थ्याद्वा इकारस्य लोपो न स्यात्। **गरिष्ठ इति**॥ गुरुशब्दस्य इष्ठनि गर् आदेशः। **वर्षिष्ठ इति**॥ वृद्धशब्दस्य इष्ठनि वर्षिरादेशः। बंहिवदिकार उच्चारणार्थः। **त्रपिष्ठ इति**॥ तृप्रशब्दस्य

२०१७ । बहोर्लोपो भू च बहोः । (६-४-१५८)

बहोः परयोरिमेयसोर्लोपः स्याद्बहोश्च भूरादेशः । भूमा--भूयान् ।

२०१८ । इष्ठस्य यिट् च । (६-४-१५९)

बहोः परस्य इष्ठस्य लोपः स्यात् यिडागमश्च । भूयिष्ठः ।

२०१९ । युवाल्पयोः कनन्यतरस्याम् । (५-३-६४)

एतयोः कनादेशो वा स्यादिष्ठेयसोः । कनिष्ठः । कनीयान् । पक्षे यविष्ठः । अल्पिष्ठः इत्यादि ।

२०२० । विन्मतोर्लुक् । (५-३-६५)

विनो मतुपश्च लुक्स्यादिष्ठेयसोः । अतिशयेन स्रग्वी । स्रजिष्ठः—स्रजीयान् । अतिशयेन त्वग्वान्—त्वचिष्ठः—त्वचीयान् ।

इष्ठनि त्रप् आदेशः । अदुपधः । तृपधातोस्तृप्त्यर्थकादौणादिके रकि तृप्रशब्दः । **द्राघिष्ठ इति** ॥ दीर्घशब्दस्य इष्ठनि द्राघिरादेशः । बंहिवदिकार उच्चारणार्थः । **बृन्दिष्ठ इति** ॥ बृन्दारकशब्दस्य इष्ठनि बृन्द आदेशः । अकार उच्चारणार्थः । **एवमीयसुन्नीति** ॥ प्रेयान्, स्थेयान्, स्फेयान्, वरीयान्, बंहीयान्, गरीयान्, वर्षीयान्, त्रपीयान्, द्राघीयान्, बृन्दीयान् । अत्र इमनिजननुवृत्तेः प्रयोजनमाह । **प्रियोरुबहुळेति** ॥ **इत्यादीति** ॥ वरिमा, बंहिमा, गरिमा, द्राघिमा, स्थेमा, स्फेमा, वर्षिमा, त्रपिमा, बृन्दिमा । **बहोर्लोपः** ॥ भू इति लुप्तप्रथमाकम् । इष्ठेमेयस्स्वित्यनुवृत्तम् । तत्र इष्ठन् उत्तरसूत्रे कार्यान्तरविधानादिह तस्य न सम्बन्धः । तदाह । **बहोः परयोरिति** ॥ 'आदेः परस्य' इति प्रत्यययोरादिलोपः । **भूमेति** ॥ बहुत्वमित्यर्थः । बहुशब्दात् पृथ्वादित्वादिमनिचि प्रकृतेर्भूभावः, प्रत्ययादेरिकारस्य लोपश्च । **भूयानिति** ॥ अयमनयोरतिशयेन बहुरित्यर्थः । वैपुल्यवाचकात् बहुशब्दादीयसुनि प्रकृतेर्भूभावः, प्रत्ययादेरिकारस्य लोपश्च । भूभावस्याभीयत्वेनासिद्धत्वादो- गुणो न भवति । **इष्ठस्य यिट् च** ॥ **लोपः स्यादिति** ॥ 'आदेः परस्य' इति बोध्यम् । यिटि टकार इत् । इष्ठस्यादिलोपे कृते यिडागमः । ट इत् । टित्त्वात् प्रत्ययस्याद्यवयवः । बहोर्भूभावस्तु पूर्वसूत्रेण सिद्ध एव । 'यदि तु लोप इति निवृत्तं तदा यकार आगमः' इति भाष्यम् । **युवाल्पयोः** ॥ **इष्ठेयसोरिति** ॥ अजादी इत्यनुवृत्तस्य सप्तम्या विपरिणामादिति भावः । **कनिष्ठः-कनीयानिति** ॥ अयमनयोरातिशयेन युवा अल्पो वेत्यर्थः । **पक्षे यविष्ठ इति** ॥ युवन्शब्दादिष्ठनि 'स्थूलदूर' इति वनो लोपे उकारस्य गुणे अवादेशे रूपम् । **अल्पिष्ठ इति** ॥ अल्पशब्दादिष्ठनि टिलोपः । **इत्यादीति** ॥ यवीयान्, अल्पीयानिति रूपद्वयमादिपदग्राह्यम् । **विन्मतोर्लुक्** ॥ **इष्ठेयसोरिति** ॥ अजादी इत्यनुवृत्तस्य सप्तम्या विपरिणामादिति भावः । **स्रजिष्ठ इति** ॥ स्रग्विन्शब्दादिष्ठनि विनो लुकि तन्निमित्तपदत्वभङ्गात् कुत्वनिवृत्तिरिति

२०२१ । प्रशंसायां रूपप् । (५-३-६६)

सुबन्तात्तिङन्ताच्च । प्रशस्तः पटुः पटुरूपः । प्रशस्तं पचति पचतिरूपम् ।

२०२२ । ईषदसमाप्तौ कल्पब्देश्यदेशीयरः । (५-३-६७)

ईषदूनो विद्वान्विद्वत्कल्पः । यशस्कल्पम् । यजुष्कल्पम् । विद्वद्देश्यः । विद्वद्देशीयः । पचतिकल्पम् ।

२०२३ । विभाषा सुपो बहुच्पुरस्तात्तु । (५-३-६८)

ईषदसमाप्तिविशिष्टेऽर्थे सुबन्ताद्बहुज्वा स्यात्स च प्रागेव, न तु परतः । ईषदूनः पटुः बहुपटुः । पटुकल्पः । 'सुपः' किम् । यजतिकल्पम् ।

भावः । **एवं स्रजीयानिति** ॥ **त्वचिष्ठ इति** ॥ त्वग्वच्छब्दादिष्ठनि मतुपो लुकि तन्निमित्तपदत्वभङ्गात् कुत्वनिवृत्तिरिति भावः। एवं त्वचीयान् । अत एव ज्ञापकादाभ्यामिष्ठन्नीयसुनौ । **प्रशंसायां रूपप्** ॥ **सुबन्तात्तिङन्ताच्चेति** ॥ शेषपूरणमिदम् । 'तिङश्च' इत्यनुवृत्तन्, प्रातिपदिकादिति च । 'घकाल' इत्यादिलिङ्गात् सुबन्तादिति लभ्यते इति भावः । प्रशंसाविशिष्टे स्वार्थे वर्तमानात् तिडन्तात्सुबन्ताच्च रूपबिति फलितम् । **पचतिरूपमिति** ॥ प्रशस्ता पाकक्रियेत्यर्थः । अत्र भाष्ये "क्रियाप्रधानमाख्यातं द्रव्यप्रधानन्नाम" इति सिद्धान्तितम् । "पचतोरूपं पचन्तिरूपमित्यत्र च न द्विवचनबहुवचने । तिङैव द्वित्वबहुत्वयोरुक्तत्वात् । एकवचनन्तु उत्सर्गतः करिष्यते, नपुंसकत्वन्तु लोकात्" इत्यपि भाष्ये स्पष्टम् । **ईषदसमाप्तौ** ॥ ईषदसमाप्तिविशिष्टेऽर्थे विद्यमानात् सुबन्तात् स्वार्थे कल्पप्, देश्य, देशीयर्, एते प्रत्ययाः स्युरित्यर्थः । **विद्वत्कल्प इति** ॥ ईषन्न्यूनवैदुष्यवानित्यर्थः । **यशस्कल्पमिति** ॥ असम्पूर्णं यश इत्यर्थः । 'सोऽपदादौ' इति सत्वम् । **यजुष्कल्पमिति** ॥ असम्पूर्णं यजुरित्यर्थः । 'इणष्षः' इति षत्वम् । **विद्वद्देश्य इति** ॥ असम्पूर्णवैदुष्यवानित्यर्थः । **एवं** विद्वद्देशीयः । अत्र सर्वत्र 'स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यनुवर्तन्ते' इति वचनात् प्रकृतिलिङ्गत्वं बोध्यम् । **पचतिकल्पमिति** ॥ असम्पूर्णा पाकक्रियेत्यर्थः । पचतिरूपमितिवल्लिङ्गवचननिर्वाहः। एवं वृषभकल्पः इयङ्गौरित्यादावपि प्रकृतिलिङ्गत्वं बोध्यम् । क्वचित् 'स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते' इति वचनात् गुडकल्पा द्राक्षेत्यादौ प्रकृतिलिङ्गातिक्रमः । एतत्सर्वमत्रैव भाष्ये स्पष्टम् । **विभाषा** ॥ ईषदसमाप्तावित्यनुवर्तते । तदाह । **ईषदसमाप्तिविशिष्ट इति** ॥ **प्रागेवेति** ॥ सूत्रे तुशब्दो अवधारणे इति भावः । **बहुपटुरिति** ॥ पटुशब्दात् सुबन्तात् प्राक् बहुचि कृते प्रातिपदिकावयवत्वात् सुपो लुकि समुदायात् पुनः सुबुत्पत्तिः । नच तद्धितान्तत्वाभावात् समासत्वाभावाच्च पूर्वोत्पन्नसुब्विशिष्टस्य प्रातिपदिकत्वाभावात् कथमिह लुगिति वाच्यम् । 'अर्थवत्' इत्यनेन तस्य प्रातिपदिकत्वसत्त्वात् । पटुरित्यस्य पूर्वोत्पन्नसुप्प्रत्ययान्तत्वेऽपि बहुपटुरिति समुदायस्य प्रत्ययान्तत्वाभावात्। प्रत्ययग्रहणे यस्मात् स विहितस्तदादेरेव ग्रहणात् । नचैवं सति 'कृत्तद्धित' इत्यत्र समासग्रहणं व्यर्थमिति वाच्यम् । पदघटितसङ्घातस्य चेत्

२०२४ । प्रकारवचने जातीयर् । (५-३-६९)

प्रकारवति चायम्, थाल्तु प्रकारमात्रे । पटुप्रकारः । पटुजातीयः ।

२०२५ । प्रागिवात्कः । (५-३-७०)

'इवे प्रतिकृतौ' (सू २०५१) इत्यतः प्राक्काधिकारः ।

२०२६ । अव्ययसर्वनाम्नामकच्प्राक्टेः । (५-३-७१)

'तिङश्च' (सू २००२) इत्यनुवर्तते ।

२०२७ । कस्य च दः । (५-३-७२)

प्रातिपदिकसंज्ञा तर्हि समासस्यैवेति नियमार्थत्वात् । नचैवं सति प्रकृते बहुपटुरिति समुदायस्य पूर्वोत्पन्नसुब्विशिष्टस्य कथम्प्रातिपदिकत्वम्, असमासत्वादिति वाच्यम् । यत्र सङ्घाते पूर्वो भागः पदन्तस्य चेत् प्रातिपदिकसंज्ञा तर्हि समासस्यैवेति नियमशरीराभ्युपगमात्, इति प्रागुक्तं न विस्मर्तव्यम् । न च समर्थानामिति वाग्रहणादेव सिद्धे विभाषाग्रहणं व्यर्थमिति वाच्यम् । बहुजभावपक्षे पूर्वसूत्रविहितकल्पबाद्यर्थत्वात् । अन्यथा महाविभाषया अपवादेन मुक्ते उत्सर्गस्य न प्रवृत्तिः, इति सिद्धान्तात् बहुजभावे वाक्यमेव स्यात् । नच कल्पबादीनाम्बहुचा समानविषयकत्वान्निरवकाशत्वं शङ्कयम् । तेषान्तिङन्ते सावकाशत्वात् इति भाष्ये स्पष्टम् । एतदभिप्रेत्य आह । **पटुकल्प इति** ॥ ननु सुबन्तात्तद्धितोत्पत्तिरिति सिद्धान्तादिह सुब्ग्रहणं व्यर्थमिति पृच्छति । **सुपः किमिति** ॥ तिङश्चेत्यनुवृत्तिनिवृत्त्यर्थं सुब्ग्रहणम् । नच अस्वरितत्वादेव तदनुवृत्तिर्न भविष्यति इति वाच्यम् । "अव्ययसर्वनाम्नाम्' इत्याद्युत्तरसूत्रे तिङश्चेत्यनुवृत्तेरावश्यकतया तस्य स्वरितत्वावश्यकत्वात्" इति भाष्ये स्पष्टम् । एतदभिप्रेत्य आह । **यजतिकल्पमिति** ॥ "तुग्रहणन्तु 'स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यनुवर्तन्ते, क्वचिदतिवर्तन्ते' इति ज्ञापनार्थम्" इति भाष्ये प्रपञ्चितम् । **प्रकारवचने** ॥ 'प्रकारवचने थाल्' इत्यतोऽस्य वैलक्षण्यमाह । **प्रकारवति चायमिति** ॥ प्रकारवत्येवेत्यर्थः । **थाल् तु प्रकारमात्रे इति** ॥ वस्तुतस्तु उभयमपि प्रकारवतीति न्याय्यम् । अविशेषात् । अन्यथा तथेत्यत्र सः प्रकारः इत्येवार्थः स्यात् । नच किमादिभ्यो विशिष्य विहितेन थाला तज्जातीयः इत्याद्यर्थसिद्धिरिति वाच्यम् । 'जात्यन्ताच्छ बन्धुनि' इति तज्जात्यादिशब्दात् छप्रत्ययेनैव तज्जातीत्यादिसिद्धेः । अत एव यथाजातीयक इत्यादि भाष्यप्रयोगाः सङ्गच्छन्ते । जयादित्यस्तु अत्र प्रकारभेदः, थाल्विधौ सामान्यस्य भेदको विशेषः प्रकार इत्याह । वामनस्तु सादृश्य भेदश्चेत्युभयमपि प्रकार इत्याह । **प्रागिवात्कः** ॥ इवशब्दस्तद्धटितसूत्रपर इति मत्वा आह । **इवे प्रतीति** ॥ **अव्ययसर्वनाम्नाम्** ॥ **अनुवर्तते इति** ॥ मण्डूकप्लुत्येति शेषः । अव्ययसर्वनाम्नां तिङन्तानाञ्च टेः प्राक् अकच्प्रत्ययः स्यादित्यर्थः । अकचि ककारादकार उच्चारणार्थः । चकार इत् । ककारान्तः प्रत्ययः । अयमपि प्रागिवादधिकारः । **कस्य च दः** ॥ पूर्वसूत्रे 'अव्ययसर्वनाम्नाम्' इति समासनिर्देशेऽपि एकदेशे स्वरितत्वप्रतिज्ञाबलात् अव्ययग्रहणमेवात्रानुवर्तते । कस्य इत्यत्र ककारादकार उच्चारणार्थः । ककारस्येति विवक्षितम् ।

कान्ताव्ययस्य दकारोऽन्तादेशः स्यादकच्च ।

२०२८ । अज्ञाते । (५-३-७३)

कस्यायमश्वोऽश्वकः । उच्चकैः । नीचकैः । सर्वके । विश्वके । 'ओकारसकारभकारादौ सुपि सर्वनाम्नष्टेः प्रागकच्, अन्यत्र तु 'सुबन्तस्य टेः प्रागकच्' (वा ३२८४) । युवकयोः । आवकयोः । युष्मकासु । अस्मकासु । युष्मकाभिः । अस्मकाभिः । 'ओकार–' इत्यादि किम् । त्वयका मयका । 'अकच्प्रकरणे तूष्णीमः काम्वक्तव्यः' (वा ३२८५) । मित्त्वादन्त्यादचः परः । तूष्णीकामास्ते । 'शीले को मलोपश्च' (वा ३२८६) । तूष्णींशीलः तूष्णीकः । पचतकि । जल्पतकि । धकित् । हिरकुत् ।

तेनाव्ययस्य विशेषणात् तदन्तविधिः । तदाह । **कान्ताव्ययस्येति** ॥ **अकच्चेति** ॥ चकारेण तदनुकर्षादिति भावः । एतेन अकच्सन्नियोगशिष्ट एवायं दकारः इत्युक्तम्भवति । अयमपि प्रागिवाधिकारः । **अज्ञाते** ॥ अज्ञातेऽर्थे विद्यमानात् सुबन्तात्स्वार्थे कप्रत्ययः स्यात् । अव्ययसर्वनाम्नां तिङन्तानाञ्च टेः प्राक् अकच् स्यात् । तत्रापि ककारान्ताव्ययानान्दकारोऽन्तादेशः स्यादित्यर्थः । **कस्यायमिति** ॥ अज्ञातत्वाभिनयोऽयम् । अज्ञातोऽश्व इति विग्रहः स्यादित्यर्थः । **उच्चकैरिति** ॥ उच्चैरित्यव्ययस्य टेः प्रागकच् । **सर्वके** । **विश्वके इति** ॥ ननु 'अव्ययसर्वनाम्नाम्' इति सूत्रे सुपः इत्यनुवृत्तेः सुबन्तानां सर्वनाम्नां टेः प्रागकजिति फलितम् । तथा सति युवयोः आवयोः, युष्मासु अस्मासु, युष्माभिः अस्माभिः, इत्यत्र सुबन्तानां टेः प्रागकचि युवकयोः आवकयोः, युष्मकासु अस्मकासु, युष्मकाभिः अस्मकाभिः, इति न स्युः । युवयकोः आवयकोः, युष्मासकु अस्मासकु, युष्माभकिः अस्माभकिः, इति स्युः । यदि तु सुप इत्यननुवर्त्य प्रातिपदिकादित्येवानुवर्त्य प्रातिपदिकादेव सर्वनाम्नां टेः प्रागकजित्यर्थः स्यात्, तर्हि त्वयका, मयकेति न स्यात् । त्वकया, मकया इति स्यादित्यत आह । **ओकारेति** ॥ वार्तिकमिदम् । ओकारादौ सकारादौ भकारादौ च सुपि सर्वनाम्नष्टेः प्रागकच्, अन्यत्र तु सुबन्तस्यैव सर्वनाम्नष्टेः प्रागकजित्यर्थः । इदन्तु वार्तिकं युष्मदस्मन्मात्रविषयकमेव । भाष्ये तथैवोदाहृतत्वात् । अन्येषान्तु सर्वनाम्नाम्प्रातिपदिकस्यैव टेः प्रागकच्, नतु सुबन्तानाम् । तेन सर्वकेणेत्यादि सिद्धम् । अत एव "विभक्तौ परतो विहितः किमः कादेशः साकच्कार्थः । कः–कौ–के" इति भाष्यं सङ्गच्छन्ते । **त्वयका, मयकेति** ॥ इह त्वया मयेति सुबन्तयोष्टेः प्रागकच् । प्रातिपदिकस्य टेः प्रागकचि तु त्वकया मकयेति स्यादिति भावः । **काम्वक्तव्य इति** ॥ काम्प्रत्यय इति वृत्तिस्तु चिन्त्या । भाष्ये प्रत्ययशब्दस्यादर्शनात् । किन्तु मित्त्वादागम एवायम् । तदाह । **मित्त्वादिति** ॥ अकचोऽपवादः । **तूष्णीकामिति** ॥ तूष्णीमित्यव्ययस्य ईकारादुपरि का इत्याकारान्त आगमः । **शीले इति** ॥ इदमपि वार्तिकम् । तूष्णीम् इत्यव्ययात् कप्रत्ययः स्यात् मकारस्य लोपश्च शीले गम्ये इत्यर्थः । शीलं

२०२९ । कुत्सिते । (५-३-७४)

कुत्सितोऽश्वोऽश्वकः ।

२०३० । संज्ञायां कन् । (५-३-७५)

कुत्सिते कन्स्यात्तदन्तेन चेत्संज्ञा गम्यते । शूद्रकः । राधकः । स्वरार्थं वचनम् ।

२०३१ । अनुकम्पायाम् । (५-३-७६)

पुत्रकः । अनुकम्पितः पुत्र इत्यर्थः ।

२०३२ । नीतौ च तद्युक्तात् । (५-३-७७)

सामदानादिरूपा नीतिः । तस्यां गम्यमानायामनुकम्पायुक्तात्कप्रत्ययः स्यात् । हन्त ते धानकाः । गुडकाः । एहकि । अद्धकि । पूर्वेणानुकम्प्यमानात्प्रत्ययः । अनेन तु परम्परासंबन्धेऽपीति विशेषः ।

स्वभावः । **तूष्णीक इति** ॥ मौनस्वभाव इत्यर्थः । भाष्ये दीर्घस्यैव प्रयोगदर्शनात् । 'केऽणः' इति ह्रस्वो न भवति । 'अव्ययसर्वनाम्नाम्' इत्यत्र तिङश्चेत्यनुवृत्तेः प्रयोजनमाह । **पचतकीति** ॥ पचतीत्यत्र इकारात् प्रागकच् । ककारादकार उच्चारणार्थः । अन्यथा इकारात्प्राक् अकच्प्रत्यये आद्गुणे पचतके इति स्यादिति भावः । **जल्पतकीति** ॥ जल्पतीत्यस्य टेः प्रागकच् । **धकिदिति** ॥ धिक् इत्यव्ययस्य टेः प्रागकच्, कस्य दश्च । **हिरकुदिति** ॥ हिरुगित्यव्ययस्य टेः प्रागकच्, कस्य दश्च । **कुत्सिते** ॥ येन धर्मेण कुत्स्यते वस्तु तद्धर्मयुक्तार्थाभिधायिनः प्रातिपदिकात्स्वार्थे प्रत्ययः स्यादित्यर्थः । अव्ययसर्वनाम्नस्तु टेः प्रागकच्, कान्तस्याव्ययस्य दकारश्चान्तादेश इति बोध्यम् । तिङश्चेत्यप्यनुवर्तते । **अश्वक इति** ॥ धावनस्य असम्यक्त्वादश्वस्य कुत्सा बोध्या । सर्वनामाव्ययतिङन्तानि पूर्ववदुदाहार्याणि । "याप्ये पाशप्' इति प्रवृत्तिनिमित्तकुत्सायामेव भवति । इदन्तु सूत्रमप्रवृत्तिनिमित्तकुत्सायामपि" इति भाष्ये स्पष्टम् । **संज्ञायाङ्कन्** ॥ कुत्सिते इत्यनुवर्तते । तदाह । **कुत्सित इति** ॥ **तदन्तेन चेदिति** ॥ कुत्साहेतुकसंज्ञाविषये कनिति यावत् । **अनुकम्पायाम्** ॥ अनुकम्पायुक्तार्थाभिधायिनः स्वार्थे कन् स्यादित्यर्थः । अनुकम्पा दया । **नीतौ च तद्युक्तात्** ॥ **सामदानादीति** ॥ आदिना भेददण्डयोर्ग्रहणम् । तद्युक्तादित्येतद्व्याचष्टे । **अनुकम्पायुक्तादिति** ॥ अव्ययसर्वनाम्नां टेः प्रागिति चानुवर्तते 'कस्य च दः' इति च । **हन्त ते धानका इति** ॥ दास्यन्ते इति शेषः । हन्तेत्यव्ययमनुकम्पाद्योतकम् । 'हन्त हर्षेऽनुकम्पायाम्' इत्यमरः । हन्तेत्यदन्तम् । हे पुत्रेति शेषः । अनुकम्पायुक्ता धाना इत्यर्थः । धानाशब्दात् कप्रत्यये 'केऽणः' इति ह्रस्वे कान्तात् टापि 'अभाषितपुंस्काच्च' इति विकल्पात् पक्षे इत्त्वाभावः । **एहकीति** ॥ एहीति तिङन्तस्य टेः प्रागकच् । 'अव्ययसर्वनाम्नाम्' इत्यत्र तिङश्चेत्यनुवृत्तेरिति भावः । **अद्धकीति** ॥ अद्धीति तिङन्तस्य टेः प्रागकच् । **पूर्वेणेति** ॥ अनुकम्पायास्तद्विषयत्वादिति भावः । **परम्परासम्बन्धेऽपीति** ॥ पुत्रस्साक्षादनुकम्प्यः । तद्द्वारा धाना

२०३३ । बह्वचो मनुष्यनाम्नष्ठज्वा । (५-४-७८)

पूर्वसूत्रद्वयविषये ।

२०३४ । घनिलचौ च । (५-३-७९)

तत्रैव ।

२०३५ । ठाजादावूर्ध्वं द्वितीयादचः । (५-३-८३)

अस्मिन्प्रकरणे यष्ठोऽजादिप्रत्ययश्च तस्मिन्प्रत्यये परे प्रकृतेर्द्वितीयादच ऊर्ध्वं सर्वं लुप्यते । अनुकम्पितो देवदत्तो देविकः—देवियः—देविलः—देवदत्तकः । अनुकम्पितो वायुदत्तः—वायुकः । ठग्रहणमुको द्वितीयत्वे कविधानार्थम् । वायुकः—पितृकः । 'चतुर्थादच ऊर्ध्वस्य लोपो वाच्यः' (वा ३२९६) ।

अनुकम्पायुक्ता इति भावः । **बह्वचो मनुष्य** ॥ ठजिति च्छेदः । पूर्वसूत्रद्वयविषये इति शेषपूरणम् । 'अनुकम्पायाम्' इति 'नीतौ च तद्युक्तात्' इति च सूत्रद्वयविषये बह्वचो मनुष्यनाम्नः प्रातिपदिकात् ठज्वा स्यादित्यर्थः । पक्षे कः । **घनिलचौ च** ॥ **तत्रैवेति** ॥ शेषपूरणमिदम् । बह्वच इति पूर्वसूत्राविषये इत्यर्थः । 'अनुकम्पायाम्' इति 'नीतौ च तद्युक्तात्' इति च सूत्रद्वयविषये बह्वचो मनुष्यनाम्नः घन् इलच् एतौ च प्रत्ययावित्यर्थः । **ठाजादौ** ॥ **अस्मिन्प्रकरणे इति** ॥ अनुकम्पायां, नीतौ च इत्यस्मिन्प्रकरणे इत्यर्थः । सन्निधानलभ्यमिदम् । **सर्वमिति** ॥ ऊर्ध्वग्रहणादिदं लभ्यते । अन्यथा 'आदेः परस्य' इति परिभाषया द्वितीयाचः यः परः तस्यादेरेव स्यादिति भावः । 'अजिनान्तस्योत्तरपदलोपश्च' इत्यतो लोप इत्यनुवृत्तमिह कर्मसाधनमाश्रीयते इति मत्वा आह । **लुप्यते इति** । **देविक इति** ॥ देवदत्तशब्दात् ठचि द्वितीयादचः परस्य दत्तशब्दस्य लोपे इकादेशे रूपम् । **देविय इति** ॥ देवदत्तशब्दात् घनि दत्तशब्दस्य लोपे इयादेशे रूपम् । **देविल इति** ॥ इलचि दत्तशब्दस्य लोपः । **देवदत्तकः इति** ॥ कप्रत्यये सति ठाजाद्यभावान्न दत्तपदलोपः । **वायुक इति** ॥ वायुदत्तशब्दात् दत्तशब्दस्य लोपः । उकः परत्वात् ठस्य कः । नन्विकादेशे सति देविक इत्यत्र अजादित्वादेव सिद्धे ठग्रहणं व्यर्थमित्यत आह । **ठग्रहणमिति** ॥ कृत एव ठग्रहणे वायुशब्दात्परस्य दत्तशब्दस्य ठावस्थायामेव नित्यत्वात् लोपे कृते ठस्य उकः परत्वात्कादेशः सिद्ध्यति । अन्यथा इकादेशे कृते अजादित्वं पुरस्कृत्य दत्तशब्दस्य लोपे सति वायु इक इति स्थिते ठस्याभावात् कादेशो न स्यात् । नच स्थानिवत्त्वादिकस्य ठत्वं शङ्क्यम् । 'ठस्येकः' इत्यत्र स्थान्यादेशयोरकार उच्चारणार्थ इति पक्षे अल्विधित्वात् सन्निपातविरोधाच्चेति भाष्ये स्पष्टम् । **पितृक इति** ॥ पितृदत्तशब्दात् ठचि दत्तशब्दस्य लोपे उकः परत्वात् ठस्य कः । अथ "चतुर्थादनजादौ च लोपः पूर्वपदस्य च । अप्रत्यये तथैवेष्टः उवर्णाल्ल इलस्य च" इति वक्ष्यमाणश्लोकवार्तिकं भङ्क्त्वा चतुर्थादच इत्येतद्व्याचष्टे । **चतुर्थादच ऊर्ध्वस्य लोपो वाच्य इति** ॥ **बृहस्पतिक इति** ॥ बृहस्पतिदत्तशब्दात् ठचि दत्तशब्दस्य लोपे ठस्य इकादेशः । द्वितीयादूर्ध्वत्वाभावादप्राप्ते वचनम् ।

अनुकम्पितो बृहस्पतिदत्तो बृहस्पतिकः। 'अनजादौ च विभाषा लोपो वक्तव्यः' (वा ३२९७)। देवदत्तकः—देवकः। 'लोपः पूर्वपदस्य च' (वा ३२९८)। दत्तिकः—दत्तियः—दत्तिलः—दत्तकः। 'विनापि प्रत्ययं पूर्वोत्तरपदयोर्वा लोपो वक्तव्यः' (वा ३२९९) देवदत्तः—दत्तः, देवः। सत्यभामा—भामा सत्या। 'उवर्णाल्ल इलस्य च' (वा ३३०३)। भानुदत्तः—भानुलः। 'ऋवर्णादपि' (वा ५०५४)। सावित्रियः। सवितृलः।

'चतुर्थादनजादौ च लोपः पूर्वपदस्य च।
अप्रत्यये तथैवेष्ट उवर्णाल्ल इलस्य च॥' (वा ३२९६—३३००)

२०३६। प्राचामुपादेरडज्वुचौ च (५-३-८०)

उपशब्दपूर्वात्प्रातिपदिकात्पूर्वविषये अडच् वुच् एतौ स्तः। चाद्यथाप्राप्तम्। प्राचां ग्रहणं पूजार्थम्। अनुकम्पितः उपेन्द्रदत्तः उपडः—उपकः—उपियः उपिलः—उपिकः—उपेन्द्रदत्तकः। षड्रूपाणि।

अनजादौ वेति वार्तिकभागं व्याचष्टे। **अनजादौ च विभाषा लोपो वक्तव्य इति॥** अनजादौ चेति पाठे विभाषेति भाष्यलब्धम्। तत्र देवदत्तको देवक इति कप्रत्यये दत्तलोपविकल्पोदाहरणात्। **लोपः पूर्वपदस्य चेति॥** विभाषेति शेषः। अनजादाविति तु नात्र सम्बध्यते। तदाह। **दत्तिक इत्यादि॥** ठचि घनि इलचि केच रूपम्। अप्रत्यये तथैवेष्ट इति वार्तिकभागं व्याचष्टे। **विनापि प्रत्ययं पूर्वोत्तरपदयोर्वा लोपो वक्तव्य इति॥** **दत्तः, देवः इति॥** देवदत्तशब्दात् ठाजादिप्रत्ययस्याप्यभावे पूर्वोत्तरपदयोः क्रमेण लोपे रूपम्। **उवर्णादिति॥** ल इति लोपस्य पूर्वाचार्यसंज्ञा। उवर्णात्परस्य इलचो लोपः स्यादित्यर्थः। 'आदेः परस्य' इति इकारस्य लोपः। चकारेण ठाजादौ द्वितीयादच ऊर्ध्वं लोपः सूत्रसिद्धः अनूद्यते। **ऋवर्णादपीति॥** ऋवर्णादपि परस्य इलच आदेर्लोपः स्यादित्यर्थः। **सावित्रियः—सवितृलः इति॥** घनि इलचि च रूपम्। वस्तुतस्तु ऋवर्णादपीति भाष्यादृष्टत्वादुपेक्ष्यम्[1]। तदेवं व्याख्यातं वार्तिकं समस्तं पठति। **चतुर्थादित्यादि॥** **प्राचामुपादेरडज्वुचौ च॥** **पूर्वविषये इति॥** 'बह्वचो मनुष्यनाम्नः' इति सूत्रविषये इत्यर्थः। **चाद्यथाप्राप्तमिति॥** ठच्, घन्, इलचेत्यर्थः। इमनिज्वेत्यतो वेत्यनुवृत्त्यैव सिद्धेः प्राचाङ्ग्रहणं व्यर्थमित्यत आह। **प्राचाङ्ग्रहणमिति॥** **उपडः इति॥** उपेन्द्रदत्तशब्दात् अडचि द्वितीयं सन्ध्यक्षरमिति वक्ष्यमाणेन एकारादेशलोप इति केचित्। 'नेन्द्रस्य परस्य' इति ज्ञापकेन पूर्वोत्तरपदनिमित्तकार्यापेक्षया अन्तरङ्गस्याप्येकादेशस्य पूर्वमप्रवृत्तेरेकारादिलोप इति

---

१. भाष्ये न दृष्टम्—इति शेखरकृत्।

२०३७। जातिनाम्नः कन्। (५-३-८१)

'मनुष्यनाम्नः' इत्येव। जातिशब्दो यो मनुष्यनामधेयस्तस्मात्कन्स्यादनुकम्पायां नीतौ च। सिंहकः। शरभकः। रासभकः। 'द्वितीयं सन्ध्यक्षरं चेत्तदादेर्लोपो वक्तव्यः' (वा ३३०३)। कहोडः। कहिकः। 'एकाक्षरपूर्वपदानामुत्तरपदलोपो वक्तव्यः' (वा ३३०६)। वागाशीर्दत्तः। वाचिकः। कथं षडङ्गुलिदत्तः षडिक इति। 'षषष्ठाजादिवचनात्सिद्धम्' (वा ३३०७)।

शब्देन्दुशेखरे। **उपक इति** ॥ वुचि अकादेशे एकारादिलोपे रूपम्। **उपिय इति** ॥ घनि रूपम्। **उपिल इति** ॥ इलचि रूपम्। **उपिक इति** ॥ ठचि रूपम्। **उपेन्द्रदत्तक इति** ॥ कप्रत्यये रूपम्। ठाजाद्यभावाल्लोपो न। **जातिनाम्नः कन्** ॥ **जातिशब्दो य इति** ॥ यः जातिप्रवृत्तिनिमित्तकः प्रसिद्धः सन् मनुष्यनामधेयभूतस्स इत्यर्थः। 'अनुकम्पायाम्' इति 'नीतौ' इति च सूत्रद्वयविहितस्यापवादः। **द्वितीयं सन्ध्यक्षरं चेदिति** ॥ 'एचस्सन्ध्यक्षराः' इति प्राचामाचार्याणां प्रवादः। **कहोड इति** ॥ ऋषिविशेषस्य नामेदम्। अत्र द्वितीयोऽच् सन्ध्यक्षरं, तदादेर्लोपः। नतु तदूर्ध्वस्यैव। **एकाक्षरेति** ॥ व्यञ्जनसहितं एकोऽच् एकाक्षरं एकाच्कमिति यावत्। तथाविधं पूर्वपदं येषां पदानां तानि एकाक्षरपूर्वपदानि, तेषां मध्ये उत्तरभूतानि पदानि यावन्ति तेषां लोपः स्यादित्यर्थः। इह उत्तरपदशब्दो यौगिकः। नतु समासस्य चरमावयवे रूढः। व्याख्यानात्। द्वितीयादच ऊर्ध्वमित्यनेन द्वितीयाज्विशिष्टस्य लोपे अप्राप्ते वचनमिदम्। **वागाशीर्दत्त इति** ॥ वाचि आशीः यस्य नतु मनस्येव सः वागाशीः। तेन दत्त इति विग्रहः। यद्वा आशासनमाशीः, वाचा आशीः वागाशीः। 'कर्तृकरणे कृता' इति समासः। तया वागाशिषा दत्त इति विग्रहः। वाक्करणकाशासनेन दत्त इत्यर्थः। **वाचिक इति** ॥ वागाशीर्दत्तशब्दात् ठचि वागित्येकाक्षरपूर्वपदात्परयोराशीर्दत्तशब्दयोर्लोपे सति अन्तर्वर्तिविभक्त्या पदत्वमाश्रित्य प्रवृत्तकुत्वजश्त्वयोरिकाश्रयभत्वेन बाधान्निवृत्तौ वाचिक इति रूपमिति केचित्। वस्तुतस्तु ठचि इकादेशात् प्राक् ठावस्थायामेव उत्तरपदलोपे कर्तव्ये असिद्धत्वान्न पूर्वं कुत्वादिप्रवृत्तिरित्याहुः। यद्यपि द्वितीयादच ऊर्ध्वस्य शीर्दत्तशब्दस्य लोपे वागा इक इति स्थिते 'यस्येति च' इत्याकारलोपे उक्तरीत्या कुत्वजश्त्वयोः निवृत्तौ वाचिक इति सिध्यति। तथापि आकारलोपस्य स्थानिवत्त्वेन आकारान्तस्य इकमाश्रित्य भत्वे सति आकारान्तनिष्ठभत्वेन चकारान्तनिष्ठपदत्वस्य अव्याघातात् कुत्वजश्त्वयोः वागिक इति स्यात्। उत्तरपदलोपे तु अज्झलादेशत्वेन स्थानिवत्त्वाभावात्तुल्याबाधिकया भसंज्ञया 'सुप्तिङन्तम्' इति पदसंज्ञा बाध्यते। एकसंज्ञाधिकारे परत्वादिति भावः। **कथमिति** ॥ अत्रापि अङ्गुलिदत्तशब्दस्य लोपे सति इकप्रत्ययाश्रितभत्वेन पदत्वाभावात् जश्त्वं दुर्लभमिति प्रश्नः। **षष इति** ॥ षष्शब्दस्य पूर्वपदत्वे 'ठाजादौ' इति सूत्रसिद्धो द्वितीयादच ऊर्ध्वस्यैव लोपः। नत्वयमुत्तरपदलोप इति वचनात् षडिक इति सिद्धमित्यर्थः। एवञ्च षडङ्गुलिदत्तः इत्यत्र डकाराकारादूर्ध्वस्य लोपे सति डकाराकारस्य 'यस्येति च' इति लोपे सति तस्य स्थानिवत्त्वेन

२०३८ । शेवलसुपरि विशालवरुणार्यमादीनां तृतीयात् । (५-३-८४)

एषां मनुष्यनाम्नां ठाजादौ परे तृतीयादचः ऊर्ध्वं लोपः स्यात् । पूर्वस्यापवादः । अनुकम्पितः शेवलदत्तः—शेवलिकः—शेवलियः—शेवलिलः । सुपरिकः । विशालिकः । वरुणिकः । अर्यमिकः ।

२०३९ । अजिनान्तस्योत्तरपदलोपश्च । (५-३-८२)

अजिनान्तान्मनुष्यनाम्नोऽनुकम्पायां कन् । तस्य चोत्तरपदलोपः । अनुकम्पितो व्याघ्राजिनो व्याघ्रकः । सिंहकः ।

२०४० । अल्पे । (५-३-८५)

अल्पं तैलं तैलकम् ।

२०४१ । ह्रस्वे । (५-३-८६)

ह्रस्वो वृक्षो वृक्षकः ।

२०४२ । संज्ञायां कन् । (५-३-८७)

ह्रस्वहेतुका या संज्ञा तस्यां गम्यमानायां कन् । पूर्वस्यापवादः । वंशकः । वेणुकः ।

२०४३ । कुटीशमीशुण्डाभ्यो रः । (५-३-८८)

अकारान्तस्य इकमाश्रित्य भत्वे सति तेन अकारान्तनिष्ठेन षकारान्तस्य पदत्वाव्याघाता- ज्जश्त्वं निर्बाधमिति भावः । स्पष्टञ्चेदं 'स्वादिषु' इति सूत्रे भाष्ये । **शेवल** ॥ **एषामिति** ॥ शेवल, सुपरि, विशाल, वरुण, अर्यमन्, एतत्पूर्वपदकानामित्यर्थः । **पूर्वस्येति** ॥ 'ठाजादौ' इत्यस्येत्यर्थः । **शेवलिकः इति** ॥ शेवलदत्तशब्दात् ठचि तृतीयादचः परस्य दत्तशब्दस्य लोपः । **शेवलिल इति** ॥ इलचि रूपम् । **सुपरिक इति** ॥ सुपरि- दत्तशब्दात् ठचि दत्तशब्दलोपः । **विशालिक इति** ॥ विशालदत्तशब्दात् ठचि रूपम् । **वरुणिकः इति** ॥ वरुणदत्तात् वरुणिकः । **अर्यमिकः इति** ॥ अर्यमदत्तात् अर्यमिकः । "अकृतसन्धीनामेषाम्" इति वार्तिकं भाष्ये स्थितम् । तेन सुपर्याशीर्दत्तः, सुपरिकः, इत्यादि सिद्ध्यति । **अजिनान्तस्य** ॥ **व्याघ्रकः इति** ॥ व्याघ्राजिन इति कस्य चिन्मनुष्यस्य नाम । तस्मात् कनि अजिनस्य लोपः । **सिंहक इति** ॥ सिंहाजिनशब्दात् कनि अजिनस्य लोपः । **अल्पे** ॥ अल्पत्वविशिष्टे वर्तमानात् यथाविहितं प्रत्ययाः स्युः । **तैलकमिति** ॥ सर्वकम् उच्चकैः पचतकीत्याद्यप्युदाहार्यम् । **ह्रस्वे** ॥ ह्रस्वत्वविशिष्टे वर्तमानाद्यथाविहितं प्रत्ययाः इत्यर्थः । अल्पत्वं महत्वप्रतिद्वन्द्वि, ह्रस्वत्वन्तु दीर्घत्वप्रतिद्वन्द्वीति भेदः । **संज्ञायाङ्कन्** ॥ **वंशक इति** ॥ ह्रस्वस्य वेणुजातिविशेषस्य नाम । **कुटीशमी** ॥ ह्रस्व इत्येव । **कुटीर**

ह्रस्वा कुटी कुटीरः । शमीरः । शुण्डारः ।

२०४४ । कुत्वा डुपच् । (५-३-८९)

ह्रस्वा कुतूः कुतुपः । 'कुतूः कृत्तिस्नेहपात्रं ह्रस्वा सा कुतुपः पुमान्' इत्यमरः ।

२०४५ । कासूगोणीभ्यां ष्टरच् । (५-३-९०)

आयुधविशेषः कासूः । ह्रस्वा सा कासूतरी । गोणीतरी ।

२०४६ । वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे । (५-३-९१)

वत्सतरः । द्वितीयं वयः प्राप्तः । उक्षतरः । अश्वतरः । ऋषभतरः । प्रवृत्तिनिमित्ततनुत्व एवायम् ।

२०४७ । किंयत्तदो निर्धारणे द्वयोरेकस्य डतरच् । (५-३-९२)

अनयोः कतरो वैष्णवः । यतरः । ततरः । महाविभाषया कः । यः । सः ।

इति ॥ 'स्वार्थिकाः क्वचित्प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते' इति पुंस्त्वम् । एवं शमीरः शुण्डीरः इत्यपि । ह्रस्वा शमी शुण्डा चेत्यर्थः । **कुत्वा डुपच्** ॥ **कुतुप इति** ॥ कुतूशब्दात् डुपचि डित्त्वाट्टिलोपः । तत्रापि कुटीरादिवत् स्त्रीत्वमपहाय पुंस्त्वमेव । तत्रामरकोशमपि प्रमाणयति । **कुतूः कृत्तीति** ॥ **कासूगोणीभ्यां ष्टरच्** ॥ ह्रस्व इत्येव । **कासूतरीति** ॥ षित्त्वात् ङीषिति भावः । "कासुर्बुद्धे कुवाच्येऽस्त्रे" इति नानार्थरत्नमालायाम् । एवङ्गोणीतरीति । **वत्सोक्ष** ॥ ह्रस्वस्य इति निवृत्तम् । वत्स, उक्षन्, अश्व, ऋषभ, एभ्यस्तनुत्वविशिष्टवृत्तिभ्यः ष्टरच्प्रत्ययः स्यादित्यर्थः । तनुत्वं न्यूनत्वम् । वत्सः प्रथमवयाः । वयसश्च प्रथमस्य तनुत्वम् उत्तरवयःप्राप्त्या ज्ञेयम् । तदाह । **द्वितीयं वयः प्राप्त इति** ॥ **उक्षतर इति** ॥ उक्षा तरुणो बलीवर्दः । तारुण्यस्य तनुत्वं तृतीयवयःप्राप्त्या ज्ञेयम् । **अश्वतर इति** ॥ गर्दभेन अश्वायामुत्पादितः अश्वतरः । अश्वतरत्वञ्च अश्वत्वापेक्षया न्यूनमेव । **ऋषभतर इति** ॥ ऋषभः भारस्य वोढा । तस्य तनुत्वं भारोद्वहने मन्दशक्तिता, तद्वानित्यर्थः । ननु कृशो वत्सो वत्सतर इति कुतो नेत्यत आह । **प्रवृत्तिनिमित्ततनुत्वे एवायमिति** ॥ एतच्च भाष्ये स्पष्टम् । **किंयत्तदो निर्धारणे** ॥ किम्, यत्, तत्, एषां समाहारद्वन्द्वात्पञ्चमी । द्वयोरेकस्य निर्धारणे गम्ये निर्धार्यमाणवाचिभ्यः किमादिभ्यः डतरच् स्यादित्यर्थः । **अनयोः कतरो वैष्णव इति** ॥ को वैष्णव इत्यर्थः । अत्र वैष्णवत्वगुणेन किंशब्दार्थः इदमर्थाभ्यां निर्धार्यते । अतः किंशब्दात् डतरचि डित्त्वाट्टिलोपे कतरः इति भवति । एवं यद्शब्दात् तद्शब्दाच्च डतरचि टिलोपे यतरः ततरःइति भवति । निर्धार्यमाणवाचिभ्य इति किम् । कयोरन्यतरो देवदत्तः, ययोरन्यतरः, तयोरन्यतरः, इत्यत्रापि किमादिभ्यो न भवति ।

२०४८ । वा बहूनां जातिपरिप्रश्ने डतमच् । (५-३-९३)

बहूनां मध्ये एकस्य निर्धारणे डतमज्वा स्यात् । 'जातिपरिप्रश्ने' इति प्रत्याख्यातमाकरे । कतमो भवतां कठः । यतमः । ततमः । वाग्रहणमकजर्थम् । यकः । सकः । महाविभाषया यः, सः । किमोऽस्मिन्विषये डतरजपि । कतरः ।

२०४९ । एकाच्च प्राचाम् । (५-३-९४)

डतरच् डतमच्च स्यात् । अनयोरेकतरो मैत्रः । एषामेकतमः ।

२०५० । अवक्षेपणे कन् । (५-३-९५)

वा बहूनाम् ॥ किंयत्तदो इति, निर्धारणे इति, एकस्येति चानुवर्तते । बहूनामिति निर्धारणे षष्ठी । तदाह । **बहूनाम्मध्ये एकस्य निर्धारणे डतमज्वा स्यादिति** ॥ मध्ये इत्यनन्तरमेकस्येति शेषः । जातिपरिप्रश्ने गम्ये इत्यपि बोध्यम् । जातिश्च परिप्रश्नश्चेति समाहारद्वन्द्वः । जातौ परिप्रश्ने च गम्ये इत्यर्थः । तत्र जाताविति किंयत्तदां सर्वेषामेव विशेषणम् । परिप्रश्नग्रहणन्तु किम एव विशेषणम् । तच्च क्षेपार्थकस्य किमो निवृत्त्यर्थम् । यत्तदोस्तु परिप्रश्नग्रहण न विशेषणम् । असम्भवादिति वृत्तौ स्पष्टम् । अत्र वार्तिकम् । 'किमादीनान्द्विबह्वर्थे प्रत्ययविधावुपाध्यानर्थक्यम्' इति । 'पूर्वसूत्रे द्वयोरिति, अत्र सूत्रे जातिपरिप्रश्ने इति च न कर्तव्य इति भावः' इति कैयटः । तदाह । **जातिपरिप्रश्ने इति प्रत्याख्यातमाकरे इति** ॥ क्षेपार्थस्य त्वनभिधानान्न ग्रहणमिति तदाशयः । पूर्वसूत्रे द्वयोरिति चेति बोध्यम् । तथाच 'कतमः एषाम्पाचकश्शूरो देवदत्तः' इत्यत्र क्रियागुणसंज्ञाभिरपि निर्धारणे डतमच् भवति । 'एषाङ्कतमो देवदत्तः' इत्यत्र तु बहूनामेकस्य निर्धारणे डतमच् भवति । अत एव 'प्रत्ययः' इति सूत्रभाष्ये "बहुष्वासीनेषु कश्चित्किञ्चित्पृच्छति कतरो देवदत्तः" इति प्रयोगः सङ्गच्छते । **कतमो भवताङ्कठ इति** ॥ "गोत्रञ्च चरणैः सह" इति कठस्य जातित्वम् । **वाग्रहणमकजर्थमिति** ॥ अन्यथा महाविभाषया अपवादेन मुक्ते उत्सर्गस्य प्रवृत्तेरुक्तत्वादकच् न स्यादिति भावः । नच 'अव्ययसर्वनाम्नाम्' इत्यस्याधिकारत्वात् तदनुवृत्त्यैव सिद्धे वाग्रहणं व्यर्थमेवेति वाच्यम् । इहैव सूत्रे तदनुवृत्तिः नतु पूर्वसूत्रे इति ज्ञापनार्थत्वात् । अतो डतरज्विषये नाकच् । **महाविभाषयेति** ॥ अत एव 'अवक्षेपणे' इति सूत्रे भाष्ये क एतयोरर्थयोः विशेषः इति प्रयोगः सङ्गच्छते । तमबादयः प्रागवक्षेपणकनोर्नित्याः प्रत्ययाः इति तु प्रायिकमिति भावः । **किमोऽस्मिन्निति** ॥ 'वा बहूनाम्' इति प्रकृतसूत्रविषयेऽपीत्यर्थः । बहुष्वासीनेष्वित्याद्युदाहृतभाष्यप्रयोगादिति भावः । **एकाच्च प्राचाम्** ॥ शेषपूरणेन सूत्रं व्याचष्टे । **डतरच् डतमच्च स्यादिति** ॥ पूर्वसूत्रद्वये इति शेषः । "महाविभाषयैव सिद्धे प्राचाङ्ग्रहणं न कर्तव्यम्" इति भाष्यम् । अत एव नाकजर्थन्तत् । **अवक्षेपणे कन्** ॥ **व्याकरणेन**

व्याकरणेन गर्वितः व्याकरणकः । येनेतरः कुत्स्यते तदिहोदाहरणम् । स्वतः कुत्सितं तु 'कुत्सिते' (सू २०२९) इत्यस्य ।

इति तद्धिते प्रागिवीयप्रकरणम् ।

अथ तद्धिते स्वार्थिकप्रकरणम् ।

२०५१ । इवे प्रतिकृतौ । (५-३-९६)

कन्स्यात् । अश्व इव प्रतिकृतिः अश्वकः । 'प्रतिकृतौ' किम् । गौरिव गवयः ।

२०५२ । संज्ञायां च । (५-३-९७)

इवार्थे कन् स्यात्समुदायश्चेत्संज्ञा । अप्रतिकृत्यर्थमारम्भः । अश्वसदृशस्य संज्ञा अश्वकः । उष्ट्रकः ।

२०५३ । लुम्मनुष्ये । (५-३-९८)

संज्ञायां चेति विहितस्य कनो लुप्स्यान्मनुष्ये वाच्ये । 'चञ्चा तृणमयः पुमान्' । चञ्चेव मनुष्यश्चञ्चा । वर्धिका ।

गर्वित इति ॥ व्याकरणं हि स्वतो न कुत्सितं पठितम् । अधीतं विस्मृतं सदध्येतृकुत्साहेतुभूतगर्वमावहदवक्षेपणम् । नावक्षेपणङ्कुत्सा । तत्कथं व्याकरणमवक्षेपणं स्यात् । 'कुत्सिते' इत्यनेन गतार्थश्चेदमित्यत आह । **येनेतर इति** ॥ अवक्षेपणशब्दः करणे ल्युडन्त इति भावः ॥

इति तद्धिते प्रागिवीयप्रकरणम् ।

अथ तद्धिते स्वार्थिकप्रकरणं निरूप्यते । **इवे प्रतिकृतौ** ॥ **कन् स्यादिति** ॥ 'अवक्षेपणे कन्' इत्यतः तदनुवृत्तेरिति भावः । इवार्थः उपमानत्वम् । तद्वति वर्तमानात्प्रातिपदिकात्कन् स्यात्प्रतिकृतिभूते उपमेये इति फलितम् । मृदादिनिर्मिता प्रतिमा प्रतिकृतिः । **अश्वक इति** ॥ प्रतिकृतेः स्त्रीत्वेऽपि 'स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यनुवर्तन्ते' इति पुंलिङ्गत्वम् । **संज्ञायाञ्च** ॥ कनिति शेषः । **समुदायश्चेदिति** ॥ प्रकृतिप्रत्ययसमुदायश्चेत्प्रकृत्यर्थस्य संज्ञेत्यर्थः । पूर्वसूत्रेणैव सिद्धे किमर्थमिदमित्यत आह । **अप्रतिकृत्यर्थमारम्भ इति** ॥ तथाच प्रतिकृताविति निवृत्तम् । इव इति त्वनुवर्तत एव । तदाह । **अश्वसदृशस्येति** ॥ अश्वसदृशस्य अमनुष्यस्य कस्य चित्संज्ञैषा । अश्वसदृशोऽयमश्वकसंज्ञक इति बोधः । **लुम्मनुष्ये** ॥ **संज्ञायां चेति विहितस्येति** ॥ ननु 'इवे प्रतिकृतौ' इति विहितस्य

२०५४ । जीविकार्थे चापण्ये । (५-३-९९)

जीविकार्थे यदविक्रीयमाणं तस्मिन्वाच्ये कनो लुप्स्यात् । वासुदेवः । शिवः । स्कन्दः । देवलकानां जीविकार्थासु देवप्रतिकृतिष्विदम् । 'अपण्ये' किम् । हस्तिकान्विक्रीणीते ।

२०५५ । देवपथादिभ्यश्च । (५-६-१००)

कनो लुप्स्यात् । देवपथः । हंसपथः । आकृतिगणोऽयम् ।

२०५६ । वस्तेर्ढञ् । (५-३-१०१)

इवेत्यनुवर्तत एव । 'प्रतिकृतौ' इति निवृत्तम् । वस्तिरिव वास्तेयम्—वास्तेयी ।

मनुष्यस्य । प्रतिकृतित्वासम्भवादिति भावः । चञ्चेव मनुष्यः चञ्चा इत्युदाहरणं वक्ष्यन् चञ्चाशब्दं व्याचष्टे । **चञ्चा तृणमयः पुमानिति ॥ चञ्चेति ॥** चञ्चातुल्यो मनुष्योऽयञ्चञ्चासंज्ञक इत्यर्थः । **वर्ध्रिकेति ॥** वर्ध्रिका चर्ममयी प्रतिकृतिः । तत्तुल्यो मनुष्योऽयं वर्ध्रिकसंज्ञक इत्यर्थः । लुपि युक्तवत्त्वात् स्त्रीत्वम् । वचनं तु विशेष्यवदेव । 'हरीतक्यादिषु व्यक्तिः' इत्युक्तेः । तेन चञ्चेव मनुष्यो चञ्च इति न भवति । **जीविकार्थे चापण्ये ॥** पण्यं विक्रीयमाणम् । तदाह । **अविक्रीयमाणमिति ॥ वासुदेव इति ॥** वासुदेवतुल्या जीविकार्था अविक्रेया प्रतिकृतिरित्यर्थः । एवं शिवः इत्यादि । कथ प्रतिकृतेरविक्रेयायाः जीविकार्थत्वमित्यत आह । **देवलकानामिति ॥** प्रतिमाङ्गृहीत्वा भिक्षार्थं प्रतिगृहमटतामित्यर्थः । तत्तदायतनेषु प्रतिष्ठितासु पूजार्थप्रतिमासु उत्तरसूत्रेण लुब्वक्ष्यते । **हस्तिकान्विक्रीणीते इति ॥** जीविकार्थं हस्तितुल्यप्रतिकृतिं विक्रीणीते इत्यर्थः । अत्र पण्यत्वप्रतीतेः कनो न लुक् । 'सञ्ज्ञायाञ्च' इति विहितस्य नायं लुप् । किन्तु 'इवे प्रतिकृतौ' इति विहितस्यैव । भाष्ये प्रतिकृतावेव एतदुदाहरणात् । पठन्ति चाभियुक्ताः "रामं सीतां लक्ष्मणं जीविकार्थे विक्रीणीते यो नरस्तञ्च धिक् धिक् । अस्मिन्पद्ये योऽपशब्दं न वेत्ति व्यर्थप्रज्ञं पण्डितं तञ्च धिक् धिक् ॥" इति । अत्र रामादिशब्दाः प्रतिकृतिषु वर्तन्ते । तासाञ्चात्र पण्यतया कनो लुप् दुर्लभ इति रामसीतालक्ष्मणशब्दानामपशब्दत्वमित्याशयः । **देवपथादिभ्यश्च ॥ कनो लुप् स्यादिति ॥** शेषपूरणमिदम् । 'इवे प्रतिकृतौ' इति विहितस्य देवपथादिभ्यः परस्य कनो लुप् स्यादिति यावत् । **देवपथ इति ॥** देवानां पन्थाः देवपथः । तत्प्रतिकृतिरित्यर्थः । 'इवे प्रतिकृतौ' इति कनो लुप् । एवं हंसपथः । अत्र वृत्तौ पठितम् "अर्चासु पूजनार्थासु चित्रकर्मध्वजेषु च । इवे प्रतिकृतौ लोपः कनो देवपथादिषु" अर्चाः प्रतिमाः । पूजार्थासु तासु चित्रकर्मसु ध्वजेषु देवपथादिगणपठितेषु 'इवे प्रतिकृतौ' इति विहितस्य कनो लुबित्यर्थः । 'तद्राजस्य' इति सूत्रे कैयटोऽप्येतं श्लोकं पपाठ । अर्चासु यथा—शिवो विष्णुर्गणपतिरित्यादि । चित्रकर्मसु यथा—रावणः कुम्भकर्णः इन्द्रजिदित्यादि । ध्वजेषु यथा—कपिः गरुडः वृषभः इत्यादि । **वस्तेर्ढञ् ॥ निवृत्तमिति ॥**

२०५७। शिलाया ढः। (५-३-१०२)

शिलेव शिलेयम्। योगविभागात् ढञपीत्येके। शैलेयम्।

२०५८। शाखादिभ्यो यः। (५-३-१०३)

शाखेव शाख्यः। मुख्यः। जघनमिव जघन्यः। अग्र्यः। शरण्यः।

२०५९। द्रव्यं च भव्ये। (५-३-१०४)

द्रव्यम् अयं ब्राह्मणः।

२०६०। कुशाग्राच्छः। (५-३-१०५)

कुशाग्रमिव कुशाग्रीया बुद्धिः।

२०६१। समासाच्च तद्विषयात्। (५-३-१०६)

इवार्थविषयात्समासाच्छः स्यात्। काकताळीयो देवदत्तस्य वधः।

अस्वरितत्वादिति भावः। 'संज्ञायाञ्च' इत्यादिपूर्वसूत्रेषु क्वापि प्रतिकृताविल्यस्यानिवृत्तेः न लुब्विधिषु तेषु तदनुवृत्तिरपेक्षिता। **वस्तिरिवेति** ॥ "वस्तिर्नाभेरधो द्वयोः" इत्यमरः। **शिलाया ढः** ॥ इवेत्येव। **शिलेव शिलेयमिति** ॥ दध्यादीति शेषः। **योगेति** ॥ शिलाया इत्येको योगः। ढञित्यनुवर्तते, इवेति च। **शैलेयमिति** ॥ ञित्त्वादादिवृद्धिः। स्त्रियां ङीप् च फलम्। ढः इति द्वितीयो योगः। शिलाया इत्यनुवर्तते। उक्तोऽर्थः। **शाखादिभ्यो यः** ॥ यत् इति त्वपपाठः। तैत्तिरीये 'मुख्यो भवति' इत्यादौ मुख्यशब्दस्य आद्युदात्तत्वदर्शनात्, उगवादिसूत्रभाष्यविरुद्धत्वाच्च। **द्रव्यञ्च भव्ये** ॥ द्रुशब्दादिवार्थवृत्तेः यप्रत्ययो निपात्यते भव्ये उपमेये गम्ये। भव्यः आत्मवान्। अभिप्रेतानान्धनानाम्पात्रभूत इति वृत्तिः। **द्रव्यम् अयमिति** ॥ द्रुः वृक्षः, सः यथा पुष्पफलादिभाक् एवमभिमतफलपात्रभूत इत्यर्थः। यद्वा द्रुः कल्पवृक्षोऽत्र विवक्षितः। स इव अभिमतार्थभागित्यर्थः। यप्रत्यये ओर्गुणः अवादेशः। **कुशाग्राच्छः** ॥ इवेत्येव। **कुशाग्रमिवेति** ॥ सूक्ष्मत्वे सादृश्यम्। कुशाग्रवत् सूक्ष्मेत्यर्थः। **समासाच्च** ॥ तच्छब्देन प्रकृतः इवार्थः परामृश्यते। तदाह। **इवार्थविषयादिति** ॥ इवार्थः सादृश्यमुपमानोपमेयभावात्मकम्, तद्विषयकादित्यर्थः। सादृश्यवदर्थबोधकात् समासादिति यावत्। यद्यपि घनश्याम इति समासोऽपि सादृश्यवदर्थबोधकः, तथापि सादृश्यवदर्थबोधकसमस्यमानयावत्पदावयवकात् समासादिति विवक्षितमिति न दोषः। **छः स्यादिति** ॥ चकारेण पूर्वसूत्रोपात्तच्छस्यानुकर्षादिति भावः। इवार्थे इति शेषः। पूगाञ्ञ्यः इत्यतः प्रागिवाधिकारात्। ततश्च इवार्थकसमस्यमानयावत्पदकात्समासादिवार्थे छः स्यादिति लभ्यते। **काकताळीयो देवदत्तस्य वध इति** ॥ काकः कश्चिदकस्मात् ताळवृक्षस्य मूलङ्गतस्ताळफलपतनान्मृतः। तथैव कश्चिद्देवदत्तः अकस्मान्निर्जनप्रदेशे क्वचिद्गतः चोरेण हतः, तत्रेदं वाक्यं प्रवृत्तम्। अत्र समासार्थगतं सादृश्यमेकं, प्रत्ययार्थगतम् अन्यत्सादृश्यञ्च भासते।

इह काकताळसमागमसदृशश्चोरसमागम इति समासार्थः । तत्प्रयुक्तः काकमरणसदृशस्तु प्रत्ययार्थः । अजाकृपाणीयः । अतर्कितोपनत इति फलितोऽर्थः ।

२०६२ । शर्करादिभ्योऽण् । (५-३-१०७)

शर्करेव शार्करम् ।

२०६३ । अङ्गुल्यादिभ्यष्ठक् । (५-३-१०८)

आङ्गुलीव अङ्गुलिकः । भरूजेव । भारूजिकः ।

२०६४ । एकशालायाष्ठजन्यतरस्याम् । (५-३-१०९)

तथाहि काकागमनमिव ताळपतनमिव काकताळमिति समासस्य विग्रहः । अत्र काकशब्दः काकागमनसदृशे देवदत्तागमने लाक्षणिकः । ताळशब्दस्तु ताळपतनसदृशे चोरागमने लाक्षणिकः । काकागमनसदृशन्देवदत्तागमनन्ताळपतनसदृशञ्चोरागमनमिति च काकताळमिति समासाद्बोधः । यद्यप्यत्र काकताळशब्दयोः मिळितयोरेकत्रान्वयाभावात् द्वन्द्वसमासो न संभवति । परस्परान्वयाभावेन असामर्थ्याच्च । तथापि अस्मादेव विधिबलात् 'सुप्सुपा' इति समासः । तथाच काकतालसमागमसदृशो देवदत्तचोरसमागम इति समासार्थः । तदाह । **इह काकताळसमागमसदृशश्चोरसमागम इति समासार्थ इति** ॥ अत्र चोरसमागम इत्यस्य चोरेण देवदत्तस्य समागम इत्यर्थः । तदेवंविधात्समासात् काकताळशब्दादिवान्तरार्थे सादृश्यान्तरे छप्रत्ययः । तत्र समासात्मककाकताळशब्दभूनप्रकृत्यर्थरूपकाकताळसमागमसदृशदेवदत्तचोरसमागमे उपस्थिते सति ताळपतनकृतकाकमरणे उपस्थिते उपमानत्वं देवदत्तवधे चोरागमनकृते उपमेयत्वञ्च छप्रत्ययेन गम्यते । ततश्च तादृशचोरसमागमे सति ताळपतनकृतकाकमरणसदृशो देवदत्तस्य चोरकृतो वध इति छप्रत्ययेन लभ्यते । तदाह । **तत्प्रयुक्तः इति** ॥ तादृशताळपतनप्रयुक्तेत्यर्थः । सदृश इत्यनन्तरन्देवदत्तवध इति शेषः । तथा च काकताळसमागमसदृशो देवदत्तचोरसमागमः, तद्धेतुकस्ताळपतनकृतकाकमरणसदृशश्चोरकृतो देवदत्तवध इत्येव काकताळीयो देवदत्तवध इति समासाद्बोधः । एतदेवाभिप्रेत्योक्तं भाष्ये "काकागमनमिव ताळपतनमिव काकताळम् । काकताळमिव काकताळीयम्" इति । अत्र काकताळमिति इवार्थगर्भितकेवलद्वन्द्वात् न भवति इवान्तरार्थस्य सादृश्यान्तरार्थस्याप्रतीतेरित्यलम् । **अजाकृपाणीयः इति** ॥ अजागमनमिव कृपाणपतनमिव अजाकृपाणम्, तदिव अजाकृपाणीयः । अजाकृपाणसमागमसदृशो देवदत्तचोरसमागमः समासार्थः । कृपाणपतनप्रयुक्ताजामरणसदृशो देवदत्तवधश्चोरकृतः प्रत्ययार्थः । अत्र सर्वत्र अतर्कितोपनतत्वं साधारणो धर्म इत्याह । **अतर्कितेति** ॥ **शर्करादिभ्योऽण्** ॥ इव इत्येव । **शार्करमिति** ॥ 'स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते' इति विशेष्यनिघ्नतेति भावः । **अंगुल्यादिभ्यष्ठक्** ॥ इवेत्येव । **अंगुळीवेति** ॥ अङ्गुलिशब्दात् 'कृदिकारादक्तिनः' इति ङीष् । **आंगुळिक इति** ॥ पूर्ववद्विशेष्यनिघ्नता । **भरूजेवेति । भारूजिक इति** ॥ पूर्ववद्विशेष्यनिघ्नता । **एकशालायाः** ॥ **पक्षे ठगिति** ॥ अन्यतरस्याङ्ग्रहणम् अनन्तरठकः समुच्चयार्थमिति

एकशालाशब्दादिवार्थे ठञ्वा । पक्षे ठक् । एकशालेव एकशालिकः—ऐकशालिकः ।

२०६५ । कर्कलोहितादीकक् । ५-३-११०)

कर्कः शुक्लोऽश्वः । स इव कार्कीकः । लौहितीकः स्फटिकः ।

२०६६ । पूगाञ्ञ्योऽग्रामणीपूर्वात् । (५-३-११२)

इवार्थो निवृत्तः । नानाजातीयाः अनियतवृत्तयोऽर्थकामप्रधानाः सङ्घाः पूगाः । तद्वाचकात्स्वार्थे ञ्यः स्यात् । लौहितध्वज्यः । 'व्रातच्फञोरस्त्रियाम्' (सू ११००) । व्रातः । कापोतपाक्यः । च्फञ् । कौञ्जायन्यः । ब्राध्नायन्यः ।

२०६७ । आयुधजीविसङ्घाञ्ञ्यड् वाहीकेष्वब्राह्मणराजन्यात् । (५-३-११४)

बाहीकेषु य आयुधजीविसङ्घस्तद्वाचिनः स्वार्थे ञ्यट् । क्षौद्रक्यः । मालव्यः । टित्त्वान्ङीप् । क्षौद्रकी । 'आयुध—' इति किम् । मल्लाः । 'सङ्घ—' इति किम् । सम्राट् । 'बाहीकेषु' किम् । शबराः । 'अब्राह्मण—' इति किम् । गोपालवाः । सालङ्कायनाः । ब्राह्मणे तद्विशेषग्रहणम् । राजन्ये स्वरूपग्रहणम् ।

भावः । ठञेत्येव सुवचम् । **कर्कलोहितादीकक्** ॥ **कर्कः शुक्लोऽश्वः इति** ॥ अश्वपर्यायेषु "सितः कर्कः" इत्यमरः । **लौहितीकः स्फटिक इति** ॥ जपापुष्पादिसम्पर्कवशाल्लोहित इत्येवेत्यर्थः । **पूगाञ्ञ्यः** ॥ **इवार्थो निवृत्त इति** ॥ व्याख्यानादिति भावः । **अनियतवृत्तय इति** ॥ उद्वृता इत्यर्थः । **तद्वाचकादिति** ॥ पूगेति न स्वरूपग्रहणम् । व्याख्यानात् । ग्रामणीवाचकपूर्वावयवकभिन्नात् पूगवाचकादित्यर्थः । **लौहितध्वज्यः इति** ॥ लोहिताः ध्वजाः यस्य पूगस्य स एव लौहितध्वज्यः । **व्रातच्फञोरस्त्रियामिति** ॥ इदं सूत्रं 'गोत्रे कुञ्जादिभ्यः' इत्यत्र प्रसङ्गादुपादाय व्याख्यातम् । **व्रातः इति** ॥ उदाहरणसूचनमिदम् । भारोद्वहनादिशरीरायासजीवनात् नानाजातीयानामनियतवृत्तीनां सङ्घो व्रातः । **कापोतपाक्य इति** ॥ कपोतान् पक्षिविशेषान् भक्षणाय पचतीति कपोतपाकः । स एव कापोतपाक्यः । पचेः कर्मणि घञ्, 'चजोः कुघिण्ण्यतोः' इति कुत्वम् । **च्फञिति** ॥ उदाहरणसूचनमिदम् । **कौञ्जायन्य इति** ॥ 'गोत्रे कुञ्जादिभ्य' इति च्फञ् । आयन्नादेशः । ततः स्वार्थे अनेन ञ्यः । एव ब्राध्नायन्यः । **आयुधजीवि** ॥ **बाहीकेष्विति** ॥ बाहीकाख्यग्रामविशेषेष्वित्यर्थः । **क्षौद्रक्य इति** ॥ क्षुद्रको नाम कश्चिदायुधजीविनाम्बाहीकदेशवासिनां सङ्घः । स एव क्षौद्रक्यः । **मालव्य इति** ॥ मालवो नाम कश्चिद्वाहीकेषु आयुधजीविनां सङ्घः । स एव मालव्यः । **टित्त्वात् ङीबिति** ॥ एवम् अस्त्रियामिति नात्र सम्बध्यते इति भावः । **तद्विशेषेति** ॥

२०६८ । वृकाट्टेण्यण् । (५-३-११५)

आयुधजीविसङ्घवाचकात्स्वार्थे । वार्केण्यः । 'आयुध—' इति किम् । जातिशब्दान्मा भूत् ।

२०६९ । दामन्यादित्रिगर्तषष्ठाच्छः । (५-३-११६)

दामन्यादिभ्यस्त्रिगर्तषष्ठेभ्यश्चायुधजीविसङ्घवाचिभ्यः स्वार्थे छः स्यात् । त्रिगर्तः षष्ठो वर्गो येषां ते त्रिगर्तषष्ठाः ।

'आहुस्त्रिगर्तषष्ठांस्तु कौण्डोपरथदाण्डकी ।
क्रौष्टुकिर्जालमानिश्च ब्राह्मगुप्तोऽथ जालकिः ॥'

दामनीयः । दामनीयौ । दामनयः । औलपि, औलपीयः । त्रिगर्त, कौण्डोपरथीयः । दाण्डकीयः ।

२०७० । पर्श्वादियौधेयादिभ्योऽणञौ । (५-३-११७)

आयुधजीविसङ्घवाचिभ्यः एभ्यः क्रमादणञौ स्तः स्वार्थे । पार्शवः । पार्शवौ । पर्शवः । यौधेयः । यौधेयौ । यौधेयाः ।

व्याख्यानादिति भावः । **वृकाट्टेण्यण्** ॥ वृको नाम कश्चिदायुधजीविसङ्घः । स एव वार्केण्यः । आदिवृद्धिः । रपरत्वम् । **जातिविशेषादिति** ॥ वृको नाम कश्चिन्मनुष्यखादी चतुष्पाज्जातिविशेषः प्रसिद्धः । तस्मान्नेत्यर्थः । **दामन्यादि** ॥ दामनिः आदिर्यस्य दामन्यादिः । त्रिगर्तः षष्ठो यस्य वर्गस्य सः त्रिगर्तषष्ठः । दामन्यादिश्च त्रिगर्तषष्ठश्चेति समाहारद्वन्द्वात्पञ्चमी । फलितमाह । **दामन्यादिभ्यस्त्रिगर्तषष्ठेभ्यश्चेति** ॥ आयुधजीविनां हि षड्वर्गाः, तत्र षष्ठस्त्रिगर्तः वर्ग , तेभ्यः षड्वर्गेभ्यः इति यावत् । के ते त्रिगर्तषष्ठा इत्यत आह । **आहुरिति** ॥ कौण्डोपरथः, दाण्डकिः, क्रौष्टुकि , जालमानि , ब्राह्मगुप्तः, जालकिः, इत्येतान् त्रिगर्तषष्ठान् आहुरित्यर्थः । जालकिरिति त्रिगर्तस्य नामान्तरम् । एतेषु षट्सु कौण्डोपरथब्राह्मगुप्तशब्दौ शिवाद्यणन्तौ । शेषः इञन्तः । दामादिगणम् उदाहरति । **दामनीय इति** ॥ दामनिरेव दामनीयः । **औलपीति** ॥ प्रकृतिप्रदर्शना । **औलपीय इति** ॥ औलपिशब्दात् स्वार्थे छः । **त्रिगर्तेति** ॥ त्रिगर्तषष्ठानामुदाहरणसूचनमिदम् । **कौण्डोपरथीय इति** ॥ कौण्डोपरथशब्दात्स्वार्थे छः । **दाण्डकीय इति** ॥ दाण्डकिशब्दात् स्वार्थे छः । क्रौष्टुकीयः, जालमानीयः, ब्राह्मगुप्तीयः, जालकीयः, इत्यप्युदाहार्यम् । **पर्श्वादियौधेयादि** ॥ **एभ्य इति** ॥ पर्श्वादिभ्यो यौधेयादिभ्यश्चेत्यर्थः । **पार्शव इति** ॥ पर्शुशब्दाज्जनपदक्षत्रियविशेषयोर्वाचकादपत्येष्वर्थेषु 'द्व्यञ्मगध' इत्यण् । ततोऽपत्यसङ्घविवक्षायामनेन अणिति भावः । **पार्शवौ** । **पर्शव इति** ॥ अपत्यसङ्घबहुत्वविवक्षायां प्रकृतस्याणोऽपि तद्राजत्वाल्लुक् । 'ञ्यादयस्तद्राजाः' इति वक्ष्यमाणत्वादिति भावः । **यौधेय इति** ॥ युधाशब्दादपत्येऽर्थे 'द्व्यचः' इति ढक् । तदन्तादपत्यसङ्घविवक्षायामनेन

२०७१ । अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छ्रुमदणो यञ् । (५-३-११८)

अभिजिदादिभ्योऽण्णन्तेभ्यः स्वार्थे यञ्स्यात् । अभिजितोऽपत्यमाभिजित्यः । वैदभृत्यः । शालावत्यः । शैखावत्यः । शामीवत्यः । और्णावत्यः । श्रौमत्यः ।

२०७२ । ञ्यादयस्तद्राजाः । (५-३-११९)

'पूगाञ्ञ्यः—' (सू २०६६) इत्यारभ्य उक्ता एतत्संज्ञाः स्युः । तेनास्त्रियां बहुषु लुक् । लोहितध्वजाः । कपोतपाकाः । कौञ्जायनाः । ब्रध्नायनाः, इत्यादि ।

अत्र । ञित्स्वरः आद्युदात्तत्वफलः । **यौधेया इति** ॥ अपत्यसङ्घबहुत्वविवक्षायाम् 'तद्राजस्य' इत्यञो लुक् । 'कितः, तद्धितस्य' इत्यन्तोदात्त फलम् । **अभिजिद्विदभृत्** ॥ अभिजित्, विदभृत्, शालावत्, शिखावत्, शमीवत्, ऊर्णावत्, श्रुमत्, एषां समाहारद्वन्द्वात् पञ्चम्याः लुक् । अण इति प्रत्ययत्वात् तदन्तग्रहणम् । तदाह । **अभिजिदादिभ्य इति** ॥ अत्र 'आयुधजीविसङ्घादिति निमित्तम्' इति वृत्तिः । **आभिजित्य इति** ॥ अभिजितोऽपत्यं आभिजितः । अपत्येऽण् । आभिजित एव आभिजित्यः । **वैदभृत्य इति** ॥ विदभृतोऽपत्यं वैदभृतः । स एव वैदभृत्यः । **शालावत्य इति** ॥ शालावतोऽपत्यं शालावतः, स एव शालावत्यः । **शैखावत्य इति** ॥ शिखावतोऽपत्यं शैखावतः, स एव शैखावत्यः । **शामीवत्य इति** ॥ शमीवतोऽपत्यं शामीवतः, स एव शामीवत्यः । **और्णावत्य इति** ॥ ऊर्णावतोऽपत्यमौर्णावतः, स एव और्णावत्यः । **श्रौमत्य इति** ॥ श्रुमतोऽपत्यं श्रौमतः, स एव श्रौमत्यः । अत्र अभिजिदित्यादिशब्देषु यञः स्वार्थिकतया गोत्रार्थकत्वादाभिजितस्यायमिति विग्रहे 'गोत्रचरणात्' इति वुञि 'आपत्यस्य च' इति यलोपे आभिजितक इति भवति । "अपत्याणन्तेभ्य एवायं यञ् । तेन आभिजितो मुहूर्त इत्यादौ न यञ्" इति भाष्ये स्पष्टम् । **ञ्यादयस्तद्राजाः ॥ लोहितध्वजा इति** ॥ 'पूगात्' इति विहितस्य ञ्यस्य तद्राजत्वात् बहुत्वे लुक् । **कपोतपाकाः, कौञ्जायनाः, ब्रध्नायनाः इति** ॥ 'व्रातच्फञोः' इति विहितस्य ञ्यस्य लुक् । **इत्यादीति** ॥ क्षौद्रक्यः, क्षौद्रक्यौ, क्षुद्रकाः । आयुधजीवीति ञ्यटो लुक् । वार्केण्यः, वार्केण्यौ, वृकाः । वृकाट्टेण्यणो लुक् । दामनीयः, दामनीयौ, दामनयः । कौण्डोपरथाः इत्यादौ 'दामन्यादित्रिगर्तषष्ठात्' इति छस्य लुक् । पार्शवः, पार्शवौ, पर्शवः । यौधेयाः इत्यत्र पर्श्वादियौधेयाद्यणञोर्लुक् । आभिजित्यः, आभिजित्यौ, अभिजितः । विदभृतः इत्यादौ अभिजिद्विदभृदित्यादिविहितस्य यञो लुगिति भावः ॥

इति तद्धिते पञ्चमाध्यायस्य तृतीयपादः समाप्तः ।

२०७३ । पादशतस्य सङ्ख्यादेर्वीप्सायां वुन्लोपश्च । (५-४-१)

लोपवचनमनैमित्तिकत्वार्थम् । अतो न स्थानिवत् । 'पादः पत्' (सू ४१४) । 'तद्धितार्थ—' (सू ७२८) इति समासे कृते प्रत्ययः । वुन्नयं स्त्रियामेव । द्वौ द्वौ पादौ ददाति द्विपदिकाम् । द्विशतिकाम् । 'पादशतग्रहणमनर्थकम्, अन्यत्रापि दर्शनात्' (वा ३३१४) । द्विमोदकिकाम् ।

२०७४ । दण्डव्यवसर्गयोश्च । (५-४-२)

वुन्स्यात् । अवीप्सार्थमिदम् । द्वौ पादौ दण्डितः, द्विपदिकां, द्विशतिकां व्यवसृजति । ददातीत्यर्थः ।

२०७५ । स्थूलादिभ्यः प्रकारवचने कन् । (५-४-३)

जातीयरोऽपवादः । स्थूलकः । अणुकः । 'चञ्चद्बृहतोरुपसङ्ख्यानम्' (वा ३३१५) । चञ्चत्कः । बृहत्कः । 'सुराया अहौ (ग सू १३०) । सुरावर्णोऽहिः सुरकः ।

अथ पञ्चमाध्यायस्य चतुर्थपादप्रारम्भः—**पादशतस्य सङ्ख्यादेर्वीप्सायां वुन् लोपश्च ॥** पादश्च शतश्चेति समाहारद्वन्द्वात् लोपापेक्षया षष्ठी । वुन्प्रत्ययापेक्षया तु सा पञ्चम्यर्थे । सङ्ख्यावाचकशब्दपूर्वकात् पादशब्दात् शतशब्दाच्च वीप्साविशिष्टार्थवृत्तेः स्वार्थे वुन्प्रत्ययः स्यात्, प्रकृतेरन्त्यस्य लोपश्चेत्यर्थः । ननु वुनः अकादेशे सति 'यस्येति च' इत्येव लोपसिद्धेरिह लोपविधिर्व्यर्थः इत्यत आह । **लोपवचनमनैमित्तिकत्वार्थमिति ॥** 'यस्येति च' इति लोपस्य परनिमित्तकतया तस्य 'अचः परस्मिन्' इति स्थानिवत्त्वात् 'पादः पत्' इति पदादेशो न स्यात् । अस्य तु लोपस्य परनिमित्तकत्वाभावेन स्थानिवत्त्वात्प्रसक्तेः पद्भावो निर्बाध इति भावः । **ताद्धितार्थ इति ॥** नच वीप्सायाः प्रकृत्यर्थविशेषणतया वुनोऽर्थाभावात्कथमिह ताद्धितार्थ इति समास इति वाच्यम् । वुनो द्योतकतया द्योत्यार्थेनैवार्थवत्त्वात् । **वुन्नयं स्त्रियामेवेति ॥** स्वभावादिति भावः । **द्विशतिकामिति ॥** द्वे द्वे शते ददातीति विग्रहः । **पादशतेत्यादि ॥** वार्तिकमिदम् । अनर्थकामिति कथम् । पादशतभिन्नव्यावृत्त्यर्थत्वादित्यत आह । **अन्यत्रापि दर्शनादिति ॥** तदुदाहृत्य दर्शयति । **द्विमोदकिकामिति ॥** द्वौ द्वौ मोदकौ ददातीति विग्रहः । **दण्डव्यवसर्गयोश्च ॥ वुन् स्यादिति ॥** सङ्ख्यादेः पादशतात् दण्डव्यवसर्गयोर्गम्ययोर्वुन् स्यात्प्रकृतेरन्तलोपश्चेत्यर्थः । दण्डनं दण्डः । बलात्कृत्य द्रव्यग्रहणम् । व्यवसर्गो दानम् । ननु पूर्वेण सिद्धे किमर्थमिदमित्यत आह । **अवीप्सार्थमिति ॥ द्वौ पादौ दण्डित इति ॥** बलात्कृत्य ग्राहित इत्यर्थः । **स्थूलादिभ्यः ॥** प्रकारो भेदः सादृश्यञ्च । व्याख्यानात् । तद्वति वर्तमानाद्यथायोगं कन्नित्यर्थः । **जातीयरोऽपवाद इति ॥** एतेन अयमपि तद्वदेव प्रकारवति भवति । नतु प्रकारमात्रे इति सूचितम् । **चञ्चत्क इति ॥** चञ्चधातुश्चलने

२०७६ । अनत्यन्तगतौ क्तात् । (५-४-४)

छिन्नकम् । भिन्नकम् । अभिन्नकम् ।

२०७७ । न सामिवचने । (५-४-५)

सामिपर्याये उपपदे क्तान्तान्न कन् । सामिकृतम् । अर्धकृतम् । अनत्यन्तगतेरिह प्रकृत्यैवाभिधानात्पूर्वेण कन्न प्राप्तः । इदमेव निषेधसूत्रमत्यन्तस्वार्थिकमपि कनं ज्ञापयति । बहुतरकम् ।

२०७८ । बृहत्या आच्छादने । (५-४-६)

कन्स्यात् । 'द्वौ प्रावारोत्तरासङ्गौ समौ बृहतिका तथा' इत्यमरः । 'आच्छादने' किम् । बृहती छन्दः ।

२०७९ । अषडक्षाशितङ्ग्वलङ्कर्मालम्पुरुषाध्युत्तरपदात्खः । (५-४-७)

स्वार्थे । अषडक्षीणो मन्त्रः । द्वाभ्यामेव कृत इत्यर्थः । आशिता गावोऽस्मिन्निति आशितङ्गवीनमरण्यम् । निपातनात्पूर्वस्य मुम् । अलं कर्मणे

अचञ्चन्नपि यश्चञ्चन्निव दृश्यते स चञ्चत्कः । यथा स्पन्दमानस्वच्छजलमध्यवर्ती मणिः । **बृहत्क इति** ॥ अबृहन्नपि बृहन्निव दृश्यते स बृहत्कः । बृहदाख्यसामविशेषो वा । **सुराया अहाविति** ॥ गणसूत्रमिदम् । प्रकारवचने कन्निति शेषः । सर्पः अहावेवेति नियमार्थमिदम् । **सुरक इति** ॥ 'केऽणः' इति ह्रस्वः । **अनत्यन्तगतौ क्तात्** ॥ अत्यन्तगतिः अशेषावयवसम्बन्धः, तदभावः अनत्यन्तगतिः, तस्याङ्गम्यमानायां क्तान्तात्कन्नित्यर्थः । **छिन्नकमिति** ॥ किञ्चिदवयवावच्छेदेन छिन्नमित्यर्थः । **न सामिवचने** ॥ वचनग्रहणं पर्यायलाभार्थमिति मत्वा आह । **सामिपर्याये उपपदे इति** ॥ **सामिकृतमिति** ॥ सामीत्यव्ययमर्धे । 'सामि' इति समासः । **अर्धकृतमिति** ॥ अर्धङ्कृतमिति कर्मधारयः । सामीत्यस्य क्रियाविशेषणत्वेन कारकत्वात् समुदायस्य क्तान्तत्वम् । कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणात् । नन्विह अनत्यन्तगतेः प्रकृत्यैवाभिहितत्वात् 'उक्तार्थानामप्रयोग.' इति न्यायेन पूर्वसूत्रविहितस्य कनः अप्रसक्तेरिह तन्निषेधो व्यर्थ इति शङ्कते । **अनत्यन्तगतेरिति** ॥ परिहरति । **इदमेवेति** ॥ तथापीति पूर्वमध्याहार्यम् । **ज्ञापयतीति** ॥ न ह्ययमनत्यन्तगताविति कनः प्रतिषेधः । किन्तर्हि, अत्यन्तस्वार्थिकस्य कनः । तत्र च इदमेव ज्ञापकम् । अन्यथा तद्वैयर्थ्यादिति भावः । **बहुतरकमिति** ॥ बहुतरमेव बहुतरकम् । भाष्ये तु इदं सूत्रं प्रत्याख्यातम् । 'तमबाद्यन्तात् स्वार्थे कन् वक्तव्यः' इति वचनेन यावादित्वाद्वा स्वार्थे कना बहुतरकं सुतरकमित्यादि सिद्धमिति तदाशयः । **बृहत्या आच्छादने** ॥ कन् इति शेषः । बृहत्येव बृहतिका । उत्तरीयं वासः । तदाह । **द्वौ प्रावारेति** ॥ अमरवाक्यमिदम् । **अषडक्ष** ॥ **स्वार्थे इति** ॥ शेषपूरणमिदम् । अषडक्ष,

अलङ्कर्मीणः । अलम्पुरुषीणः । ईश्वराधीनः । नित्योऽयं खः । उत्तरसूत्रे विभाषाग्रहणात् । 'अन्येऽपि केचित्स्वार्थिकाः प्रत्ययाः नित्यमिष्यन्ते' । 'तमबादयः प्राक्कनः । ञ्यादयः प्राग्वुनः । आमादयः प्राड्मयटः । बृहतीजात्यन्ताः समासान्ताश्च' इति भाष्यम् ।

२०८० । विभाषाञ्चेरदिक्स्त्रियाम् । (५-४-८)

आशितङ्गु, अलङ्कर्मन्, अलम्पुरुष एभ्यः अध्युत्तरपदाच्च स्वार्थे खः स्यादित्यर्थः । **अषडक्षीणो मन्त्र इति** ॥ मन्त्रणं मन्त्रः । रहसि राजतदमात्यादिभिः युक्तिभिः क्रियमाणं निर्धारणम् । अविद्यमानानि षट् अक्षीणि श्रोत्रेन्द्रियाणि यस्मिन्निति बहुव्रीहिः । 'बहुव्रीहौ सक्थ्यक्ष्णोः' इति षच् । तदन्तादनेन स्वार्थे खः । **द्वाभ्यामेवेति** ॥ पुरुषाभ्यामिति शेषः । **आशिताः इति** ॥ 'अश भोजने' इत्यस्मादाशितः कर्तेति ज्ञापकात्कर्तरि क्तः । **पूर्वस्य मुमिति** ॥ आशितशब्दस्येत्यर्थः । **अलङ्कर्मीण इति** ॥ 'पर्यादयो ग्लानाद्यर्थे' इति चतुर्थीसमासात्ख, टिलोपः । **अलम्पुरुषीण इति** ॥ अलम्पुरुषायेति विग्रहः । मातृभोगीण इत्यादाविव अषडक्षीणादौ णत्वम् । 'पदव्यवायेऽपि' इति निषेधस्तु न । पदव्यवाये इत्याश्रयणात् । **ईश्वराधीन इति** ॥ 'यस्मादधिकम्' इति ईश्वरशब्दात्सप्तमी । शौण्डादित्वादधिशब्देन समासः । ततः स्वार्थे खः । 'समर्थानाम्' इत्यतो वाग्रहणानुवृत्त्या अस्य खस्य वैकल्पिकत्वभ्रमं वारयति । **नित्योऽयङ्ग इति** ॥ **उत्तरेति** ॥ 'विभाषाञ्चेः' इत्युत्तरसूत्रे 'समर्थानाम्' इत्यतो वाग्रहणानुवृत्त्यैव सिद्धे विभाषाग्रहणादिह पूर्वसूत्रे वाग्रहणानुवृत्त्यभावो ज्ञाप्यत इत्यर्थः । नचैवं सति आशिताः गावोऽस्मिन्निति अलङ्कर्मीणः इति च विग्रहप्रदर्शनमनुपपन्नमिति वाच्यम् । तस्य खप्रत्ययप्रकृतिकथनार्थत्वेन अलौकिकविग्रहवाक्यप्रायत्वात् । प्रसङ्गादाह । **अन्येऽपीति** ॥ **इष्यन्ते इति** ॥ भाष्यकृतेति शेषः । **तमबादयः प्राक्कन इति** ॥ 'अतिशायने तमप्' इत्यारभ्य 'अवक्षेपणे कन्' इत्यतः प्राग्विहिताः प्रत्यया इत्यर्थः । **ञ्यादयः प्राग्वुन इति** ॥ 'पूगाञ्ञ्योऽग्रामणीपूर्वात्' इत्यारभ्य 'पादशतस्य सङ्ख्यादेर्वीप्सायां वुन्' इत्यतः प्राग्विहिताः प्रत्यया इत्यर्थः । **आमादयः प्राड्मयट इति** ॥ 'किमेत्तिङव्ययघादाम्' इत्यारभ्य 'तत्प्रकृतवचने मयट्' इत्यतः प्राग्विहिता इत्यर्थः । **बृहतीजात्यन्ता इति** ॥ बृहतीशब्देन 'बृहत्या आच्छादने' इति कन् लक्ष्यते । जात्यन्तशब्देन तु 'जात्यन्ताच्छ बन्धुनि' इति छो लक्ष्यते । बहुवचननिर्देशात् पाशबादयोऽपि 'षष्ठ्या रूप्य च' इत्यन्ताः गृह्यन्ते इति कैयटः । वस्तुतस्तु परिगणिता एव नित्याः, नतु पाशबादयोऽपि । बृहतीजात्यन्ताः इति बहुवचनन्तु 'बृहत्या आच्छादने' इति 'जात्यन्ताच्छ बन्धुनि' इति च सूत्रयोर्मध्यगतेन 'अषडक्ष' इति सूत्रेण विहितङ्गप्रत्ययमभिप्रेत्येति न दोषः । 'विभाषाञ्चेः' इति उत्तरसूत्रे खविधौ विभाषाग्रहणन्तु तस्यापि बृहतीजात्यन्तरालवर्तित्वाविशेषात् नित्यत्वे प्राप्ते विकल्पार्थम् । अनित्योऽयङ्गः । उत्तरसूत्रेषु विभाषाग्रहणादिति मूलन्तु अभ्युच्चययुक्तिः इति शब्देन्दुशेखरे स्थितम् । **विभाषाञ्चेरदिक्स्त्रियाम्** ॥ अदिक्स्त्रियामिति कर्मधारयगर्भो नञ्तत्पुरुषः ।

अदिक्स्त्रीवृत्तेरञ्चत्यन्तात्प्रातिपदिकात्खः स्याद्वा स्वार्थे। प्राक्—प्राचीनम्। प्रत्यक्—प्रतीचीनम्। अवाक्—अवाचीनम्। 'निकृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमाः' इत्यमरः। अर्वन्तमञ्चतीति अर्वाक्—अर्वाचीनम्। 'अदिक्स्त्रियाम्' किम्। प्राची दिक्। उदीची दिक्। 'दिग्ग्रहणम्' किम्। प्राचीना ब्राह्मणी। 'स्त्रीग्रहणम्' किम्। प्राचीनं ग्रामादाम्राः।

२०८१। जात्यन्ताच्छ बन्धुनि। (५-४-९)

ब्राह्मणजातीयः। 'बन्धुनि' किम्। ब्राह्मणजातिः शोभना। जातेर्व्यञ्जकं द्रव्यं बन्धु।

२०८२। स्थानान्ताद्विभाषा सस्थानेनेति चेत्। (५-४-१०)

सस्थानेन तुल्येन चेत्स्थानान्तमर्थवदित्यर्थः। पित्रा तुल्यः पितृस्थानीयः—पितृस्थानः। 'सस्थानेन' किम्। गोः स्थानम्।

तदाह। **अदिक्स्त्रीवृत्तेरिति** ॥ **प्रागिति** ॥ अञ्चेर्लुकि लुप्तास्तात्यन्तमिदम्। प्राचि देशे इत्यर्थे प्राचीनमिति खान्तमिदं स्वभावादाधेयपरम्। स्वभावादेव सामान्ये नपुंसकमेकवचनान्तञ्च। इदन्तु पदसंस्कारपक्षे। वाक्यसंस्कारपक्षे तु प्रागादिशब्देभ्यः समभिव्याहृतदेशकालस्थवृक्षादिबोधकेभ्यः खः। तत्र उपस्थितविशेष्यलिङ्गत्यागे मानाभावात् प्राचीना आम्राः, प्राचीना वाटी, प्राचीनं वनमिति भवतीत्याहुः। अर्वन्तमञ्चतीति वक्ष्यन् अर्वच्छब्दं विवृणोति। **निकृष्टेति** ॥ अमरवाक्यमिदम्। **प्राची दिगिति** ॥ लिङ्गविशिष्टपरिभाषया प्राप्तिः। **दिग्ग्रहणङ्किमिति** ॥ अस्त्रियामित्येतावतैव प्राची दिगित्यत्रातिप्रसङ्गनिरासात्किन्तेनेति प्रश्नः। अव्याप्तिपरिहारार्थमित्याह। **प्राचीना ब्राह्मणीति** ॥ नेयं दिग्रूपा स्त्री। किन्तु तद्भिन्ना स्त्रीति खो भवत्येवेति भावः। **स्त्रीग्रहणङ्किमिति** ॥ अदिशीत्येतावतैव प्राचीना ब्राह्मणीत्यत्राव्याप्तिनिरासात्प्रश्नः। इदमप्यव्याप्तिपरिहारार्थमित्याह। **प्राचीनं ग्रामादाम्राः इति** ॥ स्थानिवत्सूत्रभाष्ये अयं प्रयोगः स्थितः। अत्र प्राच्यान्दिशीत्यर्थे लुप्तास्तात्यन्ता प्रागिति प्रकृतिः। स च अव्ययत्वात् अस्त्रीति खो भवत्येवेति भावः। **जात्यन्ताच्छ बन्धुनि** ॥ छेति लुप्तप्रथमाकम्। जातिशब्दान्तात् प्रातिपदिकाद्बन्धुनि वर्तमानात् स्वार्थे छप्रत्ययः स्यादित्यर्थः। बन्धुशब्दो द्रव्यवाचीति वक्ष्यति। तथाच बन्धुनि वर्तमानादित्यनेन जात्याश्रयद्रव्यलक्षकादिति फलितम्। **ब्राह्मणजातीय इति** ॥ ब्राह्मणत्वजात्याश्रयो व्यक्तिविशेष इत्यर्थः। **ब्राह्मणजातिः शोभनेति** ॥ ब्राह्मणत्वजातिरित्यर्थः। बध्यते ब्राह्मणत्वादिजातिर्व्यज्यतेऽस्मिन्निति बन्धु द्रव्यम्। 'शृस्वृस्निहि' इत्यादिना अधिकरणे उप्रत्ययः। तदाह। **जातेर्व्यञ्जकं द्रव्यं बन्ध्विति** ॥ आप्तपर्यायस्तु बन्धुशब्दो नेह गृह्यते। बन्धुनीति नपुंसकनिर्देशादिति भावः। **स्थानान्तात्** ॥ सस्थानेनेत्यस्य विवरणं तुल्येनेति। इतिशब्दादर्थवदिति लभ्यते। तुल्यरूपेणार्थेन यदि स्थानान्तं शब्दस्वरूपमर्थवद्भवति, तदा स्थानान्तात् छो वा स्यादित्यर्थः। तुल्यरूपार्थे वर्तमानात् स्थानान्तात् छो वा स्यादिति यावत्। **पितृस्थानीय**

२०८३ । अनुगादिनष्ठक् । (५-४-१३)

अनुगदतीत्यनुगादी । स एव आनुगादिकः ।

२०८४ । विसारिणो मत्स्ये । (५-४-१६)

अण्स्यात् । वैसारिणः । 'मत्स्ये' इति किम् । विसारी देवदत्तः ।

२०८५ । सङ्ख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् । (५-४-१७)

अभ्यावृत्तिर्जन्म । क्रियाजन्मगणनवृत्तेः सङ्ख्याशब्दात्स्वार्थे कृत्वसुच्स्यात् । पञ्चकृत्वो भुङ्क्ते । 'सङ्ख्यायाः' किम् । भूरिवारान्भुङ्क्ते ।

२०८६ । द्वित्रिचतुर्भ्यः सुच् । (५-४-१८)

कृत्वसुचोऽपवादः । द्विर्भुङ्क्ते । त्रिः 'रात्सस्य' (सू २८०) । चतुः ।

इति ॥ स्थानं पूज्यत्वादिपदम् । पितृस्थानमिव स्थानं यस्येति बहुव्रीहिः । पितृनिष्ठपूज्यत्वादितुल्यपूज्यत्वादिमानित्यर्थः । **गोः स्थानमिति** ॥ गवां निवास इत्यर्थः । अत्र तुल्यत्वाप्रतीतेर्न च्छः । 'किमेत्तिङव्यय' इत्युत्तरसूत्रम्प्रसङ्गात्पूर्वमेव व्याख्यातम् । 'अमु च च्छन्दसि' इति तु वैदिकप्रक्रियायां व्याख्यास्यते । **अनुगादिनष्ठक्** ॥ स्वार्थे इति शेषः 'आमादयः प्राक्मयटः' इत्युक्तेः ठगादयो नित्या एव प्रत्ययाः । **अनुगादीति** ॥ 'सुप्यजातौ' इति णिनिः । प्रकृतिदर्शनमिदम् । ठकोनित्यत्वात्स एवेत्यस्वपदविग्रहपददर्शनम् । **अनुगादिक इति** ॥ 'नस्तद्धिते' इति टिलोपः । इह क्रमेण च 'त्रियाम्' इति 'अणिनुणः' इति च सूत्रद्वयम्पठितं कृदधिकारे व्याख्यास्यते । **विसारिणो मत्स्ये** ॥ 'अणिनुणः' इति पूर्वसूत्रात् अणित्यनुवर्तते । तदाह । **अण् स्यादिति** ॥ मत्स्ये विद्यमानात् विसारिन्शब्दात् स्वार्थे अण् स्यादित्यर्थः । **वैसारिणः इति** ॥ 'इनण्यनपत्ये' इति प्रकृतिभावाट्टिलोपो न । **सङ्ख्यायाः** ॥ अभ्यावृत्तिशब्देन यदि द्वितीयादिप्रवृत्तिर्गृह्येत, तदा चतुर्वारम्पाकप्रवृत्तौ द्विः पचतीति स्यादित्यत आह । **अभ्यावृत्तिर्जन्मेति** ॥ उपसर्गवशात् 'वृतु वर्तने' इति धातोरुत्पत्तौ वृत्तिरिति भावः । कृत्वसुचि चकार इत् । उकार उच्चारणार्थः । 'तद्धितश्चासर्वविभक्तिः' इत्यत्र तसिलादिषु परिग्रहणात् कृत्वोऽर्थानामव्ययत्वम् । **पञ्चकृत्वो भुङ्क्ते इति** ॥ पञ्चत्वसङ्ख्याकोत्पत्तिविशिष्टा भोजनक्रियेत्यर्थः । **सङ्ख्यायाः किमिति** ॥ गणने वृत्तिः सङ्ख्याशब्दानामेवेति प्रश्नः । **भूरिवारान् भुङ्क्ते इति** ॥ भूरिशब्दो बहुशब्दपर्यायः । वारशब्दस्तु वस्तुतः समभिव्याहृतक्रियापर्याप्ते काले वर्तते । 'कालाध्वनोरत्यन्तसंयोगे द्वितीया' इति द्वितीया । बहुकालेषु कार्त्स्न्येन व्याप्ता भोजनक्रियेत्यर्थः । भोजनबहुत्वं त्वर्थाद्गम्यते । तथा च वारशब्दोऽयं न गणनवाची । भूरिशब्दोऽपि न सङ्ख्याशब्देन गृह्यते । 'बहुगणवतुडति सङ्ख्या' इत्यत्र बहुग्रहणे तत्पर्यायस्य असङ्ख्यात्वबोधनात् । अतोऽत्र न कृत्वसुच् । **द्वित्रिचतुर्भ्यः** ॥ क्रियाभ्यावृत्तिगणने इत्येव । सुचि चकार इत् । उकार उच्चारणार्थः । पूर्ववदव्ययत्वम् । **त्रिरिति** ॥ भुङ्क्ते इत्यनुषज्यते । **रादिति** ॥ चतुर्शब्दात् सुचि चतुर्स् इति स्थिते 'रात्सस्य'

२०८७। एकस्य सकृच्च। (५-४-१९)

सकृदित्यादेशः स्यात्, चात्सुच्। सकृद्भुङ्क्ते। 'संयोगान्तस्य—' (सू ५४) इति सुचो लोपः। न तु 'हल्ङ्याप्—' (सू २५२) इति। अभैत्सीदित्यत्र सिच इव सुचोऽपि तदयोगात्।

२०८८। विभाषा बहोर्धाऽविप्रकृष्टकाले। (५-४-२०)

अविप्रकृष्ट आसन्नः। बहुधा बहुकृत्वो वा दिवसस्य भुङ्क्ते। 'आसन्नकाले' किम्। बहुकृत्वो मासस्य भुङ्क्ते।

२०८९। तत्प्रकृतवचने मयट्। (५-४-२१)

प्राचुर्येण प्रस्तुतं प्रकृतं, तस्य वचनं प्रतिपादनम्। भावेऽधिकरणे वा ल्युट्। आद्ये प्रकृतमन्नमन्नमयम्। अपूपमयम्। यवागूमयी। द्वितीयेऽन्नमयो यज्ञः। अपूपमयं पर्व।

इति सकारस्य लोपे चतुरिति रूपमित्यर्थः। अत्र भुङ्क्ते इत्यनुषज्यते। **एकस्य सकृच्च**॥ शेषपूरणेन सूत्रं व्याचष्टे। **सकृदित्यादेशः स्यादिति। सकृद्भुङ्क्ते इति**॥ एकशब्दात् सुच्, प्रकृतेः सकृदित्यादेशश्च। अत्र एकशब्दः क्रियाविशेषणम्। एकत्वविशिष्टा भुजिक्रियेत्यर्थः। स्वादु पचति इत्यादिवदेकम्भुङ्क्ते इति प्रयोगे प्राप्ते इदं सूत्रमिति कैयटः। एको भुङ्क्ते इत्यत्र तु नायं विधिः प्रवर्तते। क्रियाग्रहणमनुवर्त्य क्रियाविशेषणस्यैव एकशब्दस्य ग्रहणादित्यास्तां तावत्। ननु 'संयोगान्तस्य' इति सुचो लोप इत्यनुपपन्नम्। 'हल्ङ्याब्भ्यः' इत्येव हि सुलोपोऽत्र युक्तः। तस्मिन् कर्तव्ये संयोगान्तलोपस्य त्रैपादिकस्यासिद्धत्वादित्यत आह। **नतु हल्ङ्याबितीति**॥ **सिच इवेति**॥ अभैत्सीदित्यत्र सिचो लोपनिवृत्तये हल्ङ्याबित्यत्र सिग्रहणेन सिचो ग्रहणं, तत्साहचर्यात् सुग्रहणेनाऽपि सुजयन्नगृह्यत इति भावः। **विभाषा बहोर्धाऽविप्रकृष्टकाले**॥ अविप्रकृष्टकालिकक्रियाजन्मगणनवृत्तेर्बहुशब्दात् धाप्रत्ययो वा स्यात्। पक्षे कृत्वसुच्। **बहुधा बहुकृत्वो वा दिवसस्य भुङ्क्ते इति**॥ दिवसे प्रातः सङ्गवाद्यव्यवहितकालिकोत्पत्तिविशिष्टा भोजनक्रियेत्यर्थः। 'कृत्वोऽर्थप्रयोगे कालेऽधिकरणे' इति दिवसात्षष्ठीति हरदत्तः। शेषत्वविवक्षायां षष्ठी इति तु नवीनाः। **तत्प्रकृतवचने**॥ तदिति प्रथमान्तनिर्देशः। **प्राचुर्येणेति**॥ बहुळतया उपस्थित प्रकृतशब्देन विवक्षितमित्यर्थः। उपसर्गबलादिति भावः। **प्रतिपादनमिति**॥ बोधनमित्यर्थः। **भावे इति**॥ तथाच प्रकृतस्य बोधने सतीत्यर्थः। प्राचुर्यविशेषणकवस्तुप्रवृत्तेः प्रथमान्तात्स्वार्थे मयडिति फलति। अत्र प्राचुर्यविशिष्टं वस्तु प्रकृतेरर्थः। प्रत्ययस्तु तद्द्योतकः। **अधिकरणे वेति**॥ तथाच प्राचुर्यविशेषणकं यद्वस्तु यस्मिन्नुच्यते तदधिकरणे वाच्ये तादृशवस्तुवृत्तेः शब्दात् मयडिति फलितम्। अत्र पक्षे प्राचुर्यविशिष्टमुच्यमानं वस्तु प्रकृत्यर्थः। तदधिकरणं प्रत्ययार्थः। तन्त्रेणार्थद्वये सूत्रतात्पर्यं, व्याख्यानात्। यद्यप्याद्यपक्षे स्वार्थिकप्रकरणपाठः समञ्जसः, नतु द्वितीयपक्षे। तथापि 'अथ स्वार्थिकाः' इति मूलम्प्रायिकाभिप्रायमिति न दोषः। **आद्ये इति**॥ भावल्युट्पक्षे इत्यर्थः। **प्रकृतमन्नमन्नमयमिति**॥

२०९० । समूहवच्च बहुषु । (५-४-२२)

सामूहिकाः प्रत्ययाः अतिदिश्यन्ते, चान्मयट् । मोदकाः प्रकृताः, मौदकिकम्—मोदकमयम् । शाष्कुलिकम्—शष्कुलीमयम् । द्वितीयेऽर्थे मौदकिको यज्ञः—मोदकमयः ।

२०९१ । अनन्तावसथेतिहभेषजाञ्ञ्यः । (५-४-२३)

अनन्त एव आनन्त्यम् । आवसथः एव आवसथ्यम् । 'इतिह' इति निपातसमुदायः । ऐतिह्यम् । भेषजमेव भैषज्यम् ।

२०९२ । देवतान्तात्तादर्थ्ये यत् । (५-४-२४)

तदर्थ एव तादर्थ्यम् । स्वार्थे ष्यञ् । अग्निदेवतायै इदमग्निदेवत्यम् । पितृदेवत्यम् ।

प्रचुरमन्नमित्यर्थः । स्वार्थिकत्वात्प्रकृतिलिङ्गता । **अपूपमयमिति** ॥ पचुरोऽपूप इत्यर्थः । **यवागूमयीति** ॥ प्रचुरा यवागूरित्यर्थः । टित्त्वात् ङीबिति भावः । **द्वितीये इति** ॥ अधिकरणल्युट्पक्षे इत्यर्थः । **अन्नमयो यज्ञ इति** ॥ इष्टिषु 'दशौदनाः पशौ तं सोमसहस्रम्' इत्यादिवाक्यैरुच्यमानानि प्राचुर्यविशिष्टान्नानीत्यर्थः । स्वार्थिकत्वेन प्रकृतिलिङ्गत्वाभावाद्विशेष्यनिघ्नता । **अपूपमयं पर्वेति** ॥ पर्वणि अपूपाः कार्या इत्याद्युच्यमानापूपाधिकरणं पर्वेत्यर्थः । अस्वार्थिकत्वाद्विशेष्यनिघ्नता । केचित्तु द्वितीयपक्षे वचनशब्दोऽधिकरणल्युडन्तः, प्रकृत्यर्थो न विवक्षित इत्याहुः । तथा सति प्राचुर्यविशिष्टान्नाद्यधिकरणं यज्ञ इत्येव बोधः, नतु उच्यमानत्वस्य बोधः । **समूहवच्च बहुषु** ॥ तत्प्रकृतवचने इत्येव । **सामूहिका इति** ॥ 'तस्य समूहः' इत्यधिकारविहिताः प्रत्यया इत्यर्थः । बहुषु प्राचुर्यविशिष्टेषु वर्तमानाच्छब्दात् स्वार्थे समूहवत्प्रत्ययाः स्युरित्यर्थः । यद्वा बहुत्वविशिष्टानि प्राचुर्यविशिष्टानि वस्तून्यस्मिन्नधिकरणे उच्यन्ते । तदधिकरणे वाच्ये तद्वस्तुवृत्तेश्शब्दात् समूहवत्प्रत्ययाः स्युरित्यर्थः । आद्ये उदाहरति । **मोदकाः प्रकृताः मौदकिकमिति** ॥ 'अचित्तहस्तिधेनोः' इति सामूहिकष्ठक् । स्वार्थिकत्वेऽपि प्रकृतिलिङ्गातिक्रमः कुटीरवत् । **शाष्कुलिकमिति** ॥ शष्कुल्यः प्रचुरा इत्यर्थः । पूर्ववट्ठक् । प्रकृतिलिङ्गातिक्रमश्च । **द्वितीयेऽर्थे मौदकिको यज्ञ इति** ॥ मोदका अस्मिन्यज्ञे उच्यन्ते इति विग्रहः । **अनन्तावसथेतिह** ॥ अनन्त, आवसथ, इतिह, भेषज, एभ्यः स्वार्थे ञ्यप्रत्ययः स्यादित्यर्थः । **अनन्त एवेति** ॥ अन्तो नाशः । तस्याभावः अनन्तः । अर्थाभावे नञ्तत्पुरुषः - अर्थाभावे अव्ययीभावेन तद्विकल्पस्योक्तत्वात् । **आनन्त्यमिति** ॥ स्वार्थिकत्वात्प्रकृतिलिङ्गाव्यतिक्रमः । आवसथो गृहम् । **निपातसमुदायः इति** ॥ स च उपदेशपारम्पर्ये वर्तते । तस्मात्स्वार्थे ञ्यः । "पारंपर्योपदेशः स्यादैतिह्यमितिहाव्ययम्" इत्यमरः । **भैषज्यमिति** ॥ भेषजम् औषधम्, तदेव भैषज्यम् । "भेषजौषधभैषज्यानि" इत्यमरः । **देवतान्तात्तादर्थ्ये यत्** ॥ **तदर्थ एवेति** ॥ तच्छब्देन देवतान्तस्यार्थ उच्यते । तस्मै इदन्तदर्थम् । ततः स्वार्थे वर्णादित्वात् ष्यञित्यर्थः । देवतान्तात्प्रातिपदिकात् यत्स्यात्प्रकृत्यर्थार्थे वस्तुनि वाच्ये इत्यर्थः । त्यज्यमानद्रव्ये उद्देश्यविशेषो देवता मन्त्रस्तुत्या चेत्युक्तं 'सास्य देवता' इत्यत्र । अतः पितृदेवत्यं

२०९३ । पादार्घाभ्यां च । (५-४-२५)

पादार्थमुदकं पाद्यम् । अर्घ्यम् । नवस्य 'नू' आदेशो त्नप्तनप्खाश्च प्रत्यया वक्तव्याः । नूत्नम्—नूतनम्—नवीनम् । 'नश्च पुराणे प्रात्' (वा ३३२८) । पुराणार्थे वर्तमानात्प्रशब्दान्नो वक्तव्यः । चात्पूर्वोक्ताः । प्रणम्—प्रत्नम्—प्रतनम्—प्रीणम् । 'भागरूपनामभ्यो धेयः' (वा ३३३०) । भागधेयम् । रूपधेयम् । नामधेयम् । 'आग्नीध्रसाधारणादञ्' (वा ३३३४) । आग्नीध्रम् । साधारणम् । स्त्रियां ङीप् । आग्नीध्री । साधारणी ।

२०९४ । अतिथेर्ञ्यः । (५-४-२६)

'तादर्थ्ये' इत्येव । अतिथये इदमातिथ्यम् ।

२०९५ । देवात्तल् । (५-४-२७)

देव एव देवता ।

२०९६ । अवेः कः । (५-४-२८)

अविरेवाविकः ।

रक्षोदेवत्यमित्यादौ नाव्याप्तिः । तदाह । **पितृदेवत्यमिति** ॥ देवताशब्दस्य देवाः मनुष्याः पितरः असुरा रक्षांसि पिशाचाः इत्यादि श्रुतिपुराणादिसिद्धजातिविशेषपरत्वे तु अत्राव्याप्तिः स्यादिति भावः । भाष्ये तु पितृदेवत्यमिति न सिध्यतीत्याक्षिप्य दिवेरैश्वर्यकर्मणो देवः । तस्मात्स्वार्थे तलिति समाहितम् । हविः प्रति पित्रादीनामीश्वरत्वं स्वामित्वम् । हविस्तु यजमानस्य स्वम् । तच्च यजमाने अग्नयाद्युद्देशेन त्यक्तश्चेद्देवाग्नयादिस्वामिकं भवितुमर्हति । अतः देवतात्वं त्यज्यमानद्रव्योद्देश्यत्वविशेषात्मकमेव भाष्यरीत्यापि पर्यवस्यतीत्यलम् । **पादार्घाभ्याञ्च** ॥ तादर्थ्ये यदिति शेषः । **अर्घ्यमिति** ॥ अर्घार्थमुदकमिति विग्रहः । अर्घः पूजा । "मूल्ये पूजाविधावर्घः" इत्यमरः । **नवस्येति** ॥ वार्तिकमिदम् । एते प्रत्यया अत्यन्तस्वार्थिकाः । **नवीनमिति** ॥ नवशब्दात् खप्रत्यये, तस्य ईनादेशे, प्रकृतेर्नूभावे, ओर्गुणः, अवादेशः । **नश्च पुराणे प्रादिति** ॥ वार्तिकमिदम् । **चात्पूर्वोक्ता इति** ॥ त्नप्, तनप्, ख, इत्यर्थः । **प्रीणमिति** ॥ खे रूपम् । **भागरूपेति** ॥ वार्तिकमिदम् । **आग्नीध्रेति** ॥ वार्तिकमिदम् । **आग्नीध्रमिति** ॥ अग्नीधः शरणम् आग्नीध्रम् । ततः स्वार्थे अञि आग्नीध्रमेव । अनेकं प्रत्ययविशिष्टं सम्बन्धसाधारणमुच्यते । ततः स्वार्थे अञि साधारणमित्येव । अञ्विधेः प्रयोजनमाह । **स्त्रियां ङीबिति** ॥ **अतिथेर्ञ्यः ॥ तादर्थ्ये इत्येवेति** ॥ अतिथये इदमित्यर्थे अतिथिशब्दाच्चतुर्थ्यन्तात् ञ्यः स्यादित्यर्थः । **देवात्तल्** ॥ तादर्थ्ये इति निवृत्तम् । अत्यन्तस्वार्थिकोऽयं तल् । **देवतेति** ॥ स्वार्थिकत्वेन प्रकृतिलिङ्गातिक्रमात् स्त्रीत्वम् । **अवेः कः** ॥ अयमपि केवलस्वार्थिकः । "अवयः

२०९७ । यावादिभ्यः कन् । (५-४-२९)

याव एव यावकः । मणिकः ।

२०९८ । लोहितान्मणौ । (५-४-३०)

लोहित एव लोहितकः मणिः ।

२०९९ । वर्णे चानित्ये । (५-४-३१)

लोहितकः कोपेन । 'लोहिताल्लिङ्गबाधनं वा' (वा ३३२२) । लोहितिका—लोहिनिका कोपेन ।

शैलमेषार्काः" इत्यमरः । **यावादिभ्यः कन्** ॥ **यावक इति** ॥ यवानामयं यावः । ओदनादिः, स एव यावकः । अलक्तकवृक्षो वा यावः, स एव यावकः "यावोऽलक्तो द्रुमालयः" इत्यमरः । **लोहितान्मणौ** ॥ मणौ वर्तमानात् लोहितशब्दात्स्वार्थे कन् स्यादित्यर्थः । माणिक्यमयो मणिरेवेह मणिर्विवक्षितः । यस्तु जपाकुसुमादिनिमित्तलौहित्यवान् स्फटिकमणिस्तस्य तु 'रक्ते' इत्युत्तरसूत्रेण सिद्धम् । **वर्णे चानित्ये** ॥ अनित्ये वर्णे विद्यमानात् लोहितशब्दात्स्वार्थे कन् स्यादित्यर्थः । अमण्यर्थमिदम् । **लोहितकः कोपेनेति** ॥ देवदत्तादिरिति शेषः । कोपनिमित्तक देवदत्तादेर्लौहित्यमनित्यमेव । कोपाभावे तदभावात् । यद्यपि माणिक्यमणिलौहित्यमपि अनित्यमेव । माणिक्ये नष्टे तन्नाशात् । तथापि आश्रयद्रव्यस्य उत्पत्तिप्रभृति नाशपर्यन्तं यो वर्णो वर्तते, स वर्णः नित्य इत्यभिमतामिति न दोषः । स्यादेतत् । लोहिनिका लोहितिका वा कोपेनेति स्त्रियां रूपद्वयमिष्यते । तत्र लोहितशब्दात् 'वर्णादनुदात्तात्' इति नत्वसन्नियोगशिष्टं ङीपं परत्वात् स्वार्थिकतया अन्तरङ्गत्वाच्च बाधित्वा कनि कृते सति नत्वसन्नियोगशिष्टङीपो न प्रसक्तिः । कोपधत्वेन तोपधत्वाभावात् । ततश्च लोहितकशब्दात् 'अजाद्यतः' इति टापि 'प्रत्ययस्थात्' इति इत्वे लोहितिकेत्येव स्यात्, नतु तत्र लोहिनिकेति । **लोहिताल्लिङ्गबाधनं वेति** ॥ वार्तिकमिदम् । लोहितशब्दात्परस्य स्त्रीलिङ्गबोधकप्रत्ययस्य कना बाधो वा स्यादित्यर्थः । असति तु कना ङीपो बाधे लोहिनीशब्दात् कनि 'केऽणः' इति ह्रस्वे कन्नन्ताट्टापि लोहिनिकेति सिध्यति । सति तु कना ङीपो बाधे लोहिताशब्दात् कनि 'केऽणः' इति ह्रस्वे टापि लोहितिकेति भवति । ननु 'ङ्याप् प्रातिपदिकात्' इत्यत्र लिङ्गविशिष्टपरिभाषयैव सिद्धे ङ्याब्ग्रहणं ङ्याबन्तादेव तद्धिताः भवन्ति, नतु ङ्याब्भ्यां प्रागित्येवमर्थमित्युक्तम् । एवञ्च ङीपः प्राक् कनः प्रसक्तेरेवाभावादिदं वार्तिकं व्यर्थमिति चेत्, अत एव वार्तिकाल्लिङ्गात्स्वार्थिकतद्धितेषु ङ्याब्ग्रहणं न सम्बध्यते । न च सुबन्तात्तद्धितोत्पत्तिरिति सिद्धान्तात् 'कुत्सिते' इति सूत्रस्थभाष्यरीत्या स्वार्थद्रव्यलिङ्गसङ्ख्याकारककुत्सादिप्रयुक्तकार्याणाङ्क्रमिकतया ङ्याबन्तादेव सुपि ततः कनि रूपसिद्धेर्वचनमिदं व्यर्थमिति वाच्यम् । अत एव स्वार्थिकतद्धितानां प्रातिपदिकादेव

२१००। रक्ते। (५-४-३२)

लाक्षादिना रक्ते यो लोहितशब्दस्तस्मात्कन्स्यात्। 'लिङ्गबाधनं वा' (वा ३३२२) इत्येव। लोहितिका—लोहिनिका शाटी।

२१०१। कालाच्च। (५-४-३३)

'वर्णे चानित्ये' (सू २०९९), 'रक्ते' (सू २१००) इति सूत्रद्वयमनुवर्तते। कालकं मुखं वैलक्ष्येण। कालकः पटः। कालिका शाटी।

२१०२। विनयादिभ्यष्ठक्। (५-४-३४)

विनय एव वैनयिकः। सामयिकः। उपायाद्ध्रस्वत्वं च' (ग सू १४४)। औपयिकः।

२१०३। वाचो व्याहृतार्थायाम्। (५-४-३५)

सन्दिष्टार्थायां वाचि विद्यमानाद्वाक्छब्दात्स्वार्थे ठक्च स्यात्। 'सन्देशवाग्वाचिकं स्यात्' इत्यमरः।

२१०४। तद्युक्तात्कर्मणोऽण्। (५-४-३६)

कर्मैव कार्मणम्। वाचिकं श्रुत्वा क्रियमाणं कर्मेत्यर्थः।

२१०५। ओषधेरजातौ। (५-४-३७)

स्वार्थेऽण्। औषधं पिबति। 'अजातौ' किम्। ओषधयः क्षेत्रे रूढाः।

प्रवृत्तिविज्ञानादित्यन्यत्र विस्तरः। **रक्ते** ॥ लाक्षादिना रक्ते पटादौ लौहित्यस्य यावद्द्रव्यमवस्थानेन नित्यतया पूर्वेणाप्राप्तौ वचनम्। **कालाच्च** ॥ **द्वयमनुवर्तते इति** ॥ अनित्ये वर्णे रक्ते च वर्तमानात्स्वार्थे कन्निति फलितम्। अनित्ये वर्णे उदाहरति। **कालकं मुखं वैलक्ष्येणेति** ॥ लज्जासूयादिनेत्यर्थः। रक्ते उदाहरति। **कालकः पट इति** ॥ नील्यादिनेति शेषः। **विनयादिभ्यः** ॥ **उपायाद्ध्रस्वत्वञ्चेति** ॥ गणसूत्रमिदम्। उपायशब्दात्स्वार्थे ठक्। प्रकृतेर्दीर्घस्य ह्रस्वत्वञ्चेत्यर्थः। ह्रस्वस्य ह्रस्वविधौ वैयर्थ्याद्दीर्घस्येति गम्यते। **वाचो व्याहृतार्थायाम्** ॥ इदम् अस्य वक्तव्यमिति दूतं प्रति योऽर्थ उच्यते स व्याहृतः। न व्याहृतः अव्याहृतः अर्थः यस्या इति विग्रहः। तदाह। **सन्दिष्टार्थायामिति** ॥ **तद्युक्तात्** ॥ सन्दिष्टार्थया दूतवाचा यत्प्रयुक्तं कर्म तदभिधायिनः कर्मन्शब्दात्स्वार्थे अण्णित्यर्थः। **कर्मैव कार्मणमिति** ॥ अन्निति प्रकृतिभावान्न टिलोपः। दूतवाक्यं श्रुत्वा तथैव यत्क्रियते कर्म तत्कार्मणमुच्यते। तदाह। **वाचिकं श्रुत्वेति** ॥ **ओषधेरजातौ** ॥ **औषधम्पिबतीति** ॥ शुण्ठीमरीचादिचूर्णमबादिद्रव्यसंसृष्टं विवक्षितम्। तस्य न जातिवचनत्वमिति भावः। **क्षेत्रे**

२१०६ । प्रज्ञादिभ्यश्च । (५-४-३८)

प्रज्ञ एव प्राज्ञः । प्राज्ञी स्त्री । दैवतः । बान्धवः ।

२१०७ । मृदस्तिकन् । (५-४-३९)

मृदेव मृत्तिका ।

२१०८ । सस्नौ प्रशंसायाम् । (५-४-४०)

रूपपोऽपवादः । प्रशस्ता मृत् मृत्सा मृत्स्ना । उत्तरसूत्रे अन्यतरस्यां ग्रहाणान्नित्योऽयम् ।

२१०९ । बह्वल्पार्थाच्छस्कारकादन्यतरस्याम् । (५-४-४२)

बहूनि ददाति बहुशः । अल्पानि अल्पशः । 'बह्वल्पार्थान्मङ्गलामङ्गलवचनम्' (वा ३३३८) । नेह । बहूनि ददात्यनिष्टेषु । अल्पं ददात्याभ्युदयिकेषु ।

२११० । सङ्ख्यैकवचनाच्च वीप्सायाम् । (५-४-४३)

रूढा इति ॥ उत्पन्ना इत्यर्थः । शाल्यादिसस्यात्मका इति फलितम् । **प्रज्ञादिभ्यश्च** ॥ स्वार्थे अण्णिति शेषः । **प्राज्ञ इति** ॥ प्रजानातीति प्रज्ञः, 'इगुपधज्ञा' इति कः । प्रज्ञशब्दात्स्वार्थे अण् । **प्राज्ञीति** ॥ अणन्तत्वात् ङीप् । प्रज्ञा अस्यास्तीति विग्रहे तु 'प्रज्ञाश्रद्धार्चाभ्यः' इति णान्तात् टापि प्राज्ञेति रूपम् । **मृदस्तिकन्** ॥ मृद्शब्दात्स्वार्थे तिकन्नित्यर्थः । **सस्नौ** ॥ प्रशस्तायां मृदि वर्तमानात् मृच्छब्दात्स्वार्थे स स्न एतौ प्रत्ययौ स्त इत्यर्थः । **रूपपः इति** ॥ 'प्रशंसायां रूपप्' इति विहितस्येत्यर्थः । **नित्योऽयमिति** ॥ सस्नविधिरित्यर्थः । वस्तुतस्तु 'ञ्यादयः प्राग्वुनः' इत्यादिपरिगणितेषु अनयोः प्रत्यययोरनन्तर्भावादनित्यत्वमेवानयोरुचितमित्याहुः । **बह्वल्पार्थाच्छस्कारकादन्यतरस्याम्** ॥ बह्वल्पार्थाच्च कारकाभिधायिनः शब्दात्स्वार्थे शस्प्रत्ययो वा स्यादित्यर्थः । **बह्वल्पार्थादिति** ॥ वार्तिकमिदम् । मङ्गलामङ्गले गम्ये एवायं शसित्यर्थः । **बहूनि ददात्यनिष्टेष्विति** ॥ भयादिनिमित्तेष्वित्यर्थः । **अल्पं ददात्याभ्युदयिकेष्विति** ॥ अभ्युदयः श्रेयः, तत्प्रयोजनकेष्विष्टापूर्तेष्वित्यर्थः । आभ्युदयिकेषु बहुदानं अनिष्टेषु अल्पदानञ्च मङ्गळम् । तद्विपरीतदानन्तु अमङ्गळमिति भावः । अर्थग्रहणाद्भूरिशो ददाति, स्तोकशो ददाति इत्याद्यप्युदाहार्यम् । **सङ्ख्यैकवचनाच्च** ॥ सङ्ख्या च एकवचनञ्चेति समाहारद्वन्द्वात्पञ्चमी । एकत्वविशिष्टोऽर्थः उच्यतेऽनेनेत्येकवचनः । एकत्वविशिष्टस्यार्थस्य वचन इति विग्रहः । सङ्ख्यावाचकात्तदन्यस्माच्चैकत्वविशिष्टवाचकात्कारकाभिधायिनः प्रातिपदिकात् वीप्सायां शस् वेत्यर्थः । सङ्ख्यावाचिनः उदाहरति । **द्वौ द्वौ ददातीति** ॥ 'नित्यवीप्सयोः' इति द्विर्वचनम् । द्विशः इत्यत्र तु न । शसैव वीप्साया उक्तत्वात् । 'तद्धितश्चासर्वविभक्तिः'

द्वौ द्वौ ददाति द्विशः । माषं माषं माषशः । प्रस्थशः । परिमाणशब्दाः वृत्तावेकार्था एव । 'सङ्ख्यैकवचनात्' किम् । घटं घटं ददाति । 'वीप्सायाम्' किम् । द्वौ ददाति । 'कारकात्' इत्येव । द्वयोर्द्वयोः स्वामी ।

२१११ । प्रतियोगे पञ्चम्यास्तसिः । (५-४-४४)

प्रतिना कर्मप्रवचनीयेन योगे या पञ्चमी विहिता तदन्तात्तसिः स्यात् । प्रद्युम्नः कृष्णतः प्रति । 'आद्यादिभ्य उपसङ्ख्यानम्' (वा ३३३९) । आदौ आदितः । मध्यतः । अन्ततः । पृष्ठतः । पार्श्वतः । आकृतिगणोऽयम् । स्वरेण स्वरतः । वर्णतः ।

२११२ । अपादाने चाहीयरुहोः । (५-४-४५)

अपादाने या पञ्चमी तदन्तात्तसिः स्यात् । ग्रामादागच्छति । ग्रामतः । 'अहीयरुहोः' किम् । स्वर्गाद्धीयते । पर्वतादवरोहति ।

इत्यत्र 'शस्प्रभृतयः प्राक् समासान्तेभ्यः' इति परिगणनात् शसादीनां डाच्पर्यन्तानामव्ययत्वम् । एकत्वविशिष्टवाचिन उदाहरति । **माषं माषं माषशः इति** ॥ माषं माषमित्यनन्तरन्ददातीति शेषः । माषशब्दः परिमाणविशेषवाची । **प्रस्थशः इति** ॥ प्रस्थं प्रस्थं ददातीति विग्रहः । ननु घटं घटं ददातीत्यत्रापि घटशः इति स्यात् । घटशब्दस्याप्येकत्वविशिष्टार्थवाचकत्वात् । नच एकत्वविशिष्टस्यैवार्थस्य वाचकः एकवचनशब्देन विवक्षितः । घटशब्दस्तु नैवम् । घटौ घटाः इत्यादौ द्वित्वबहुत्वविशिष्टवाचकत्वादिति वाच्यम् । एवं सति माषशः प्रस्थशः इत्यत्रापि शसभावप्रसङ्गादित्यत आह । **परिमाणशब्दाः वृत्तावेकार्था एवेति** ॥ अयमाशयः । समासादिवृत्तौ एकत्वविशिष्टस्यैवार्थस्य वाचका एकवचनशब्देन विवक्षिताः । तथाविधाश्च परिमाणशब्दा एव, नतु घटादिजातिशब्दा अपि । माषदातेत्युक्ते हि माषपरिमितस्य हिरण्यादेर्दातेति प्रतीयते, नतु माषाणामिति । अतो माषशब्दोऽयम्भवति वृत्तावेकत्वविशिष्टार्थनियतः । एवं प्रस्थादिशब्दोऽपि । घटशब्दस्तु नैवम् । घटदातेत्युक्ते घटानान्दातेत्यपि प्रतीतेः । एतदेवाभिप्रेत्य प्रत्युदाहरति । **घटं घटमिति** ॥ एतत्सर्वञ्जयादित्यमतम् । वामनस्तु उक्तनियमे प्रमाणाभावात् जातिशब्देभ्योऽपि शस् भवत्येव । एकवचनग्रहणन्तु 'सङ्ख्यायाश्च वीप्सायाम्' इत्युक्तेः घटौ घटौ ददातीत्यादौ शसभावार्थमित्याह । एकैकशः पितृसंयुक्तानीत्यत्र तु शसैव वीप्साया उक्तत्वात् द्विर्वचनमार्षमिति हरदत्तः । प्रत्याहाराह्निकभाष्ये 'एकैकशः सहस्रकृत्वः' इति भाष्यप्रयोगात् स्वार्थिकशसा समाधेयमित्यन्ये । **प्रतियोगे** ॥ **विहितेति** ॥ 'प्रतिः प्रतिनिधिप्रतिदानयोः' इति प्रतेः कर्मप्रवचनीयत्वे तद्योगे 'प्रतिनिधिप्रतिदाने च यस्मात्' इति पञ्चमी विहितेत्यर्थः । **प्रद्युम्नः कृष्णतः प्रतीति** ॥ कृष्णस्य प्रतिनिधिरित्यर्थः । **आद्यादिभ्य इति** ॥ अयं सार्वविभक्तिकस्तसिः । **अपादाने चाहीयरुहोः** ॥ अहीयरुहोरिति

२११३ । अतिग्रहाव्यथनक्षेपेष्वकर्तरि तृतीयायाः । (५-४-४६)

अकर्तरि तृतीयान्ताद्वा तसिः स्यात् । अतिक्रम्य ग्रहोऽतिग्रहः । चारित्रेणाऽतिगृह्यते । चारित्रतोऽतिगृह्यते । चारित्रेणान्यानतिक्रम्य वर्तत इत्यर्थः । अव्यथनमचलनम् । वृत्तेन न व्यथते । वृत्ततो न व्यथते । वृत्तेन न चलतीत्यर्थः । क्षेपे वृत्तेन क्षिप्तः । वृत्ततः क्षिप्तः । वृत्तेन निन्दित इत्यर्थः । 'अकर्तरि' इति किम् । देवदत्तेन क्षिप्तः ।

२११४ । हीयमानपापयोगाच्च । (५-४-४७)

हीयमानपापयुक्तादकर्तरि तृतीयान्ताद्वा तसिः । वृत्तेन हीयते । वृत्तेन पापः । वृत्ततः । क्षेपस्याविवक्षायामिदम् । क्षेपे तु पूर्वेण सिद्धम् । 'अकर्तरि' इति किम् । देवदत्तेन हीयते ।

२११५ । षष्ठ्या व्याश्रये । (५-४-४८)

षष्ठ्यन्ताद्वा तसिः स्यान्नानापक्षसमाश्रये । देवाः अर्जुनतोऽभवन् । दैत्याः कर्णतोऽभवन् । अर्जुनस्य कर्णस्य पक्षे इत्यर्थः । 'व्याश्रये' किम् । वृक्षस्य शाखा ।

२११६ । रोगाच्चापनयने । (५-४-४९)

रोगवाचिनः षष्ठ्यन्ताद्वा तसिश्चिकित्सायाम् । प्रवाहिकातः कुरु । प्रतीकारमस्याः कुर्वित्यर्थः । 'अपनयने' किम् । प्रवाहिकायाः प्रकोपनं करोति ।

छेदः । हीयते इत्यादौ कर्मणि लकारे यगन्तस्य एकदेशस्य हीयेत्यनुकरणम् । हीयरुहोः सम्बन्धि यत्र भवति तस्मिन्नपादाने इत्यर्थः । **अतिग्रहाव्यथन** ॥ **अतिक्रम्य ग्रह इति** ॥ लोकवृत्तमतिक्रम्य तद्विलक्षणतया प्रतीयमानत्वमित्यर्थः । **चारित्रेणेति** ॥ चरित्रमेव चारित्रम्, तेन हेतुना इतरविलक्षणत्वेन दृश्यते इत्यर्थः । फलितमाह । **अन्याનतिक्रम्य वर्तते इति** ॥ 'व्यथ भयसञ्चलनयोः' इति चलनार्थात् ल्युटि व्यथनशब्दः । तदाह । **अव्यथनमचलनमिति** ॥ **क्षेपे इति** ॥ उदाह्रियते इति शेषः । क्षेपो निन्दा । **हीयमानपापयोगाच्च** ॥ **हीयमानेति** ॥ हीयमानयुक्तात् पापयुक्ताच्चेत्यर्थः । ननु पूर्वसूत्रे क्षेपग्रहणादेव सिद्धे किमर्थमिदमित्यत आह । **क्षेपस्याविवक्षायामिति** ॥ तत्त्वकथने इत्यर्थः । **षष्ठ्या व्याश्रये** ॥ **नानापक्षसमाश्रयणे इति** ॥ सर्वसाधारण्यं विहाय एकपक्षाश्रय इति यावत् । पक्षः स्वीयत्वेन परिग्रहः । **देवा अर्जुनतोऽभवन्निति** ॥ अर्जुनस्य पक्षे देवा आसन्नित्यर्थः । **दैत्याः कर्णतोऽभवन्निति** ॥ असुरा कर्णस्य पक्षे आसन्नित्यर्थः । **रोगाच्च** ॥ रोगस्य प्रतीकारः चिकित्सा । **प्रवाहिकात इति** ॥ विषूचिकाप्रतीकारमित्यर्थः ।

२११७ । कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः । (५-४-५०)

'अभूततद्भाव इति वक्तव्यम्' (वा ३३४०) । विकारात्मतां प्राप्नुवत्यां प्रकृतौ वर्तमानाद्विकारशब्दात्स्वार्थे च्विर्वा स्यात्करोत्यादिभिर्योगे ।

२११८ । अस्य च्वौ । (७-४-३२)

अवर्णस्य ईत्स्यात् च्वौ । वेर्लोपः । च्व्यन्तत्वादव्ययत्वम् । अकृष्णः कृष्णः सम्पद्यते, तं करोति कृष्णी करोति । ब्रह्मी भवति । गङ्गी स्यात् ।

कृभ्वस्तियोगे ॥ **अभूतेति** ॥ येन रूपेण प्रागभूतं यद्वस्तु तस्य तद्रूपप्राप्तावित्यर्थः । एवञ्च यत्र प्रकृतिस्वरूपमेव विकाररूपमापद्यमानं विकारभेदेन विवक्ष्यते । तत्रैवायम्प्रत्यय इति लभ्यते । सम्पद्यकर्तरीत्येकम्पदम् । सम्पदनं सम्पद्यः । सम्पूर्वकात्पदधातोरत एव निपातनात् भावे कृत्संज्ञः शः, दिवादित्वात् श्यन् । सम्पद्यस्य कर्तेति षष्ठीसमासः । सम्पद्यमाने वर्तमानादिति यावत् । केन रूपेण कस्य सम्पत्तिरित्याकाङ्क्षायाम्, 'अभूततद्भावे' इति वार्तिकात् प्रकृतेर्विकाररूपेण सम्पत्तिरिति लभ्यते । तत्र विकारवाचकादेव प्रत्ययः । नतु प्रकृतिवाचकात् । व्याख्यानात् । तथा च फलितमाह । **विकारात्मतामित्यादिना** । **वर्तमानादिति** ॥ विकारवाचकशब्दस्य प्रकृतौ गौण्या वृत्त्या विद्यमानत्वं बोध्यम् । **करोत्यादिभिरिति** ॥ 'डु कृञ् करणे, भू सत्तायाम्, अस भुवि' इति धातुभिर्योगे सतीत्यर्थः । च्विप्रत्यये चकार इत्, इकार उच्चारणार्थः । **अस्य च्वौ** ॥ **ईत्स्यादिति** ॥ 'ई घ्राध्मोः' इत्यतः तदनुवृत्तेरिति भावः । **वेर्लोप इति** ॥ 'वेरपृक्तस्य' इत्यनेनेति शेषः । **च्व्यन्तत्वादव्ययत्वमिति** ॥ 'ऊर्यादिच्विडाचश्च' इति निपातत्वात् स्वरादिनिपातमित्यव्ययत्वमित्यर्थः । 'तद्धितश्चासर्वविभक्तिः' इत्यत्र 'शस्प्रभृतयः प्राक् समासान्तेभ्यः' इति परिगणितेष्वन्तर्भावादव्ययत्वमिति केचित् । कृञ्योगे उदाहरति । **कृष्ण इति** ॥ वस्तुतः अकृष्णः सन् वेषादिना कृष्णभावं प्राप्नोतीत्यर्थः । **तं करोतीति** ॥ अकृष्णं कृष्णरूपेण सम्पद्यमानङ्करोतीत्यर्थः । **कृष्णीकरोतीति** ॥ अत्र वस्तुतः अकृष्णो नटः प्रकृतिभूतः । स तावत्कृष्णभावं विकारम्प्राप्नुवन् अभूततद्भावात्मकं विकारं सम्पद्यमानत्वात् सम्पद्यकर्ता भव इति तत्राभेदारोपमवलम्ब्य वर्तमानः विकारभूतकृष्णवाचकः शब्दः । तस्मात् च्विप्रत्ययः, चकार इत्, इकार उच्चारणार्थः । तस्मिन्परे अकारस्य ईत्त्वम् । 'वेरपृक्तस्य' इति वकारलोपः । कृष्णीति ईकारान्तमव्ययम् । **ब्रह्मी भवतीति** ॥ अब्रह्म ब्रह्म सम्पद्यमानं भवतीत्यर्थः । ब्रह्मन्शब्दात् च्विः । अन्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वान्नलोपः । ईत्त्वमिति भावः । अत्यन्तस्वार्थिकानामेव प्रातिपदिकादुत्पत्तिः । नतु सुबन्तादिति नियमः । अतो न च्वेः प्रातिपदिकादुत्पत्तिः । किन्तु सुबन्तादेवेति बोध्यम् । अत एव अगौर्गौः समपद्यत गोऽभवदित्यत्र च्व्यन्तस्य गोशब्दस्य 'एङः पदान्तात्' इति पररूपमुदाहृतं सङ्गच्छते इत्यलम् । **गङ्गी स्यादिति** ॥ अगङ्गा गङ्गात्वेन सम्पद्यमाना स्यादित्यर्थः । 'अस्य च्वौ' इति ईत्त्वम् । **दोषाभूतम् अहरिति** ॥ दोषेत्याकारान्तमव्ययं रात्रावित्यर्थे । इह तु रात्रिरित्यर्थे

'अव्ययस्य च्वावीत्वं नेति वाच्यम्' (वा ५०५२)। दोषाभूतम् अहः। दिवाभूता रात्रिः'। एतच्च 'अव्ययीभावश्च' (सू ४५१) इति सूत्रे भाष्ये उक्तम्।

२११९। क्यच्व्योश्च। (६-४-१५२)

हलः परस्यापत्ययकारस्य लोपः स्यात्क्ये च्वौ च परतः। गार्गी भवति।

२१२०। च्वौ च। (७-४-२६)

च्वौ परे पूर्वस्य दीर्घः स्यात्। शुची भवति। पटू स्यात्। 'अव्ययस्य दीर्घत्वं न' इति केचित्। तन्निर्मूलम्। 'स्वस्ति स्यात्' इति तु महाविभाषया च्वेरभावात्सिद्धम्। 'स्वस्ती स्यात्' इत्यपि पक्षे स्यादिति चेदस्तु। यदि नेष्यते तर्ह्यनभिधानात् च्विरेव नोत्पद्यत इत्यस्तु। 'रीङृतः' (सू १२३४)। मात्री करोति।

२१२१। अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च। (५-४-५१)

वर्तते। अदोषाभूतमहः। बहुळमेघावरणान्धकारात् दोषाभूतमित्यर्थः। **दिवाभूता रात्रिरिति** ॥ दिवेत्याकारान्तमव्ययम् अहनीत्यर्थे। इह तु अहरित्यर्थे वर्तते। चन्द्रिकातिशयवशात् अहर्भूतेत्यर्थः। ननु 'अव्ययस्य च्वावीत्वं न' इति वार्तिकम् 'अस्य च्वौ' इति सूत्रभाष्ये न दृश्यते इत्यत आह। **एतच्चेति** ॥ गार्गी भवतीति वक्ष्यन्नाह। **क्यच्व्योश्च** ॥ 'अल्लोपोऽनः' इत्यस्मात् लोप इति, 'हलस्तद्धितस्य' इत्यस्मात् हल इति, 'आपत्यस्य च' इत्यस्मात् आपत्यस्येति चानुवर्तते। तदाह। **लः परस्येति** ॥ **गार्गी भवतीति** ॥ अगार्ग्यो गार्ग्यः सम्पद्यमानो भवतीत्यर्थः। यञन्तात् च्वौ यकारस्य लोपः। वेर्लोपः। यकारस्य तु 'आपत्यस्य च' इति लोपो न सम्भवति। ईकारेण व्यवधानात्। 'हलस्तद्धितस्य' इत्यपि न सम्भवति। तस्य ईति अर्थवत्येव विधानात्। अतो वचनमिति भावः। अथ शुची भवतीति वक्ष्यन्नाह। **च्वौ च** ॥ **दीर्घः स्यादिति** ॥ 'अकृत्सार्वधातुकयोः' इत्यतस्तदनुवृत्तेरिति भावः। **अव्ययस्येति** ॥ अव्ययस्य 'च्वौ च' इति दीर्घो नेत्यर्थः। तेन स्वस्ति स्यादित्यत्र च्वौ न दीर्घ इति भावः। **तन्निर्मूलमिति** ॥ भाष्यादावदृष्टत्वादिति भावः। तर्हि स्वस्ति स्यादिति न स्यात् दीर्घप्रसङ्गात् इत्यत आह। **स्वस्ति स्यादिति त्विति** ॥ ननु महाविभाषया दीर्घाभावे स्वस्ति स्यादिति सिद्धावपि कदाचित् स्वस्ती स्यादिति दीर्घो दुर्वार इति शङ्कते। **स्वस्ती स्यादित्यपि पक्षे स्यादिति** ॥ इष्टापत्तिरित्याह। **अस्त्विति** ॥ दीर्घतदभावाभ्यां रूपद्वयमिति शेषः। प्रामाणिकत्वादुभयमप्यादर्तव्यमिति भावः। ननु शिष्टानङ्गीकारात् कथं दीर्घपाठादर इत्यत आह। **यदि नेष्यते इत्यादि** ॥ मातृशब्दात् च्विप्रत्यये विशेषमाह। **रीङृतः इति** ॥ **अरुर्मनश्चक्षुः** ॥ **एषामिति** ॥ अरुस्,

---

१. भाष्येष्टिभूतम्।

एषां लोपः स्यात् च्विश्च । अरू करोति । उन्मनी स्यात् । उच्चक्षू करोति । उच्चेती करोति । विरही करोति । विरजी करोति ।

२१२२ । विभाषा साति कात्स्न्र्ये । (५-४-५२)

च्विविषये सातिर्वा स्यात्साकल्ये ।

२१२३ । सात्पदाद्योः । (८-३-१११)

सस्य षत्वं न स्यात् । दधि सिञ्चति । कृत्स्नं शस्त्रमग्निः सम्पद्यतेऽग्निसाद्भवति । अग्नी भवति । महाविभाषया वाक्यमपि । 'कात्स्न्र्ये' किम् । एकदेशेन शुक्ली भवति पटः ।

२१२४ । अभिविधौ सम्पदा च । (५-४-५३)

सम्पदा कृभ्वस्तिभिश्च योगे सातिर्वा स्याद्व्याप्तौ । पक्षे कृभ्वस्तियोगे च्विः । सम्पदा तु वाक्यमेव । अग्निसात्सम्पद्यते अग्निसाद्भवति शस्त्रम् ।

मनस्, चक्षुस्, चेतस्, रहस्, रजस्, इत्येतेषामित्यर्थः । पूर्वेणैव प्रत्ययसिद्धेस्तत्सन्नियोगेन अन्त्यलोप इह विधीयते । **अरू करोतीति** ॥ अनरुः अरुः सम्पद्यते तत्करोतीत्यर्थः । प्रकृतेरन्त्यलोपे उकारस्य 'च्वौ च' इति दीर्घः । **उन्मनी करोतीति** ॥ अनुन्मनाः उन्मनाः सम्पद्यते तत्करोतीत्यर्थः । च्वौ अन्त्यलोपः, ईत्त्वञ्च । **उच्चक्षू करोतीति** ॥ अनुच्चक्षुः उच्चक्षुः सम्पद्यते तत्करोतीत्यर्थः । च्वौ अन्त्यलोपः, दीर्घश्च । **उच्चेती करोतीति** ॥ अनुच्चेताः उच्चेताः सम्पद्यते तत्करोतीत्यर्थः । च्वौ अन्त्यलोपः, ईत्त्वञ्च । **विरही करोतीति** ॥ रहः विजनप्रदेशः, विशिष्टं रहः विरहः । अविरहः विरहः सम्पद्यते तत्करोतीत्यर्थः । च्वौ अन्त्यलोपः, ईत्त्वञ्च । **विरजी करोतीति** ॥ अविरजाः विरजाः सम्पद्यते तत्करोतीत्यर्थः । अन्त्यलोपे अस्य च्वौ ईत्त्वञ्च । **विभाषा साति** ॥ सातीति लुप्तप्रथमाकम् । **च्विविषये इति** ॥ अभूततद्भावे सम्पद्यकर्तरि कृभ्वस्तियोगे इत्यर्थः । **सात्पदाद्योः** ॥ शेषपूरणेन सूत्रं व्याचष्टे । **सस्य षत्वं न स्यादिति** ॥ सातेरवयवस्य पदादेश्च सस्य षत्वं न स्यादित्यर्थः । 'नरपरसृपि' इत्यतो नेति 'अपदान्तस्य' इत्यतो मूर्धन्य इति चानुवर्तते इति भावः । पदादेरुदाहरति । **दधि सिञ्चतीति** ॥ षिचिधातोः 'धात्वादेष्षस्सः' इति षस्य सः । तस्य 'आदेशप्रत्यययोः' इति षत्वे प्राप्ते अनेन निषेधः । **कृत्स्नमिति** ॥ सर्वावयवोपेतमित्यर्थः । अग्निसादित्यत्र प्रत्ययावयवसकारत्वात् षत्वे प्राप्ते अनेन निषेधः । **अग्नी भवतीति** ॥ च्विप्रत्यये 'च्वौ च' इति दीर्घः । **महाविभाषयेति** ॥ 'समर्थानाम्' इत्यतः वाग्रहणानुवृत्तेरित्यर्थः । महाविभाषया सिद्धे इह विभाषाग्रहणन्तु अपवादेन मुक्ते औत्सर्गिकच्वेः समावेशार्थः । **अभिविधौ सम्पदा च** ॥ चकारः कृभ्वस्तिसमुच्चयार्थः । तदाह । **सम्पदा कृभ्वस्तिभिश्चेति** ॥ अभिविधावित्यस्य विवरणम् । **व्याप्ताविति** ॥ **पक्षे इति** ॥ सातिप्रत्ययाभावपक्षे कृभ्वस्तियोगे पूर्वेण च्विः, सम्पदा योगे तु सातेरभावे वाक्यमेव, नतु च्विः । कृभ्वस्तियोग एव तद्विधानादित्यर्थः ।

अग्नी भवति । जलसात्सम्पद्यते जली भवति लवणम् । 'एकस्या व्यक्तेः सर्वावयवावच्छेदेनान्यथाभावः कार्त्स्न्यम्' । 'बहूनां व्यक्तीनां किञ्चिदवयवावच्छेदेनान्यथात्वं त्वभिविधिः' ।

२१२५ । तदधीनवचने । (५-४-५४)

सातिः स्यात्कृभ्वस्तिभिः सम्पदा च योगे । राजसात्करोति । राजसात्सम्पद्यते । राजाधीनमित्यर्थः ।

२१२६ । देये त्रा च । (५-४-५५)

तदधीने देये त्रा स्यात्सातिश्च कृभ्वादियोगे । विप्राधीनं देयं करोति । विप्रत्रा करोति । विप्रत्रा सम्पद्यते । पक्षे विप्रसात्करोति । 'देये किम् । राजसाद्भवति राष्ट्रम् ।

२१२७ । देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम् । (५-४-५६)

एभ्यो द्वितीयान्तेभ्यः सप्तम्यन्तेभ्यश्च त्रा स्यात् । देवत्रा वन्दे रमे वा । बहुलोक्तेरन्यत्रापि । बहुत्रा जीवतो मनः ।

२१२८ । अव्यक्तानुकरणाद्‍व्यजवरार्धादनितौ डाच् । (५-४-५७)

'द्व्यच्' अवरं न्यूनम्, न तु ततो न्यूनम् 'अनेकाच्' इति यावत्तादृशमर्धं

सम्पदा योगे उदाहरति । **अग्निसात्सम्पद्यते इति** ॥ कृभ्वस्तियोगे उदाहरति । **अग्निसाद्भवति शस्त्रमिति** ॥ अग्निसात्करोति अग्निसात्स्यादित्यप्युदाहार्यम् । कार्त्स्न्याभिविध्योर्विशेषमाह । **एकस्याः व्यक्तेरित्यादिना** ॥ **तदधीनवचने** ॥ शेषपूरणेन सूत्रं व्याचष्टे । **सातिः स्यादित्यादिना** ॥ 'अभूततद्भावे' इति निवृत्तमिति भावः । **देये त्रा च** ॥ तदधीनवचने इत्येवानुवर्तते । **कृभ्वादियोगे इति** ॥ कृभ्वस्तिभिः सम्पदा च योगे इत्यर्थः । **देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम्** ॥ **एभ्य इति** ॥ देव, मनुष्य, पुरुष, पुरु, मर्त्य, इत्येतेभ्यः इत्यर्थः । अत्यन्तस्वार्थिकोऽयम् । सातीति कृभ्वस्तियोगे इत्यपि निवृत्तम् । **देवत्रा वन्दे रमे वेति** ॥ देवान् वन्दे, देवेषु रमे वेत्यर्थः । मनुष्यत्रा, पुरुषत्रा । पुरुशब्दो बहुलपर्यायः । पुरुत्रा, मर्त्यत्रा । **अन्यत्रापीति** ॥ देवादिभ्यो अन्यत्रापीत्यर्थः । **बहुत्रा जीवतो मनः इति** ॥ जीवतो जन्तोर्मनः बहुषु विषयेषु गच्छति बहून् व्याप्रोतीत्यर्थः । **अव्यक्तानुकरणात्** ॥ यत्र ध्वनौ अकारादयो वर्णविशेषाः न व्यज्यन्ते सः अव्यक्तः ध्वनिः । तस्यानुकरणम् अव्यक्तानुकरणम् । द्व्यजवरार्धशब्दं व्याचष्टे । **द्व्यजिति** ॥ द्वावचौ यस्येति विग्रहः । अवरशब्दं व्याचष्टे । **न्यूनमिति** ॥ द्व्यजेव अवरं न्यूनसङ्ख्याकाच्कमिति सामानाधिकरण्येनान्वयः । **न तु ततो न्यूनमिति** ॥ एकाच्कमित्यर्थः ।

यस्य तस्माड्डाच्स्यात्कृभ्वस्तिभिर्योगे । 'डाचि विवक्षिते द्वे बहुळम्' (वा ४६९७) । 'नित्यमाम्रेडिते डाचीति वक्तव्यम्' (वा ३६३८) । डाच्परं यदाम्रेडितं तस्मिन्परे पूर्वपरयोर्वर्णयोः पररूपं स्यात् । इति तकारपकारयोः पकारः । पटपटा करोति । 'अव्यक्तानुकरणात्' किम् । ईषत्करोति । 'द्व्यजवरार्धात्' किम् । श्रत्करोति । 'अवर–' इति किम् । घरटघरटा करोति । त्रपटत्रपटा करोति । 'अनेकाचः' इत्येव सूत्रयितुमुचितम् । एवं हि डाचीति परसप्तम्येव द्वित्वे सुवचेत्यवधेयम् । 'अनितौ' किम् । पटिति करोति ।

२१२९ । कृञो द्वितीयतृतीयशम्बबीजात्कृषौ । (५-४-५८)

द्वितीयादिभ्यो डाच्स्यात्कृञ एव योगे कर्षणेऽर्थे । बहुलोक्तेरव्यक्तानुकरणादन्यस्य डाचि न द्वित्वम् । द्वितीयं तृतीयं कर्षणं करोति । द्वितीया

फलितमाह । **अनेकाजिति यावदिति** ॥ **तादृशमर्धमिति** ॥ अनेकाच्कम् अर्धं भागः यस्य तत् द्व्यजवरार्धम् । तस्मादित्यर्थः । **कृभ्वस्तिभिः योगे इति** ॥ मण्डूकप्लुत्या तदनुवृत्तेरिति भावः । तथा च अनेकाच्कभागयुक्तादव्यक्तानुकरणात् शब्दात् कृभ्वस्तियोगे डाच् स्यादिति फलितम् । अथ पटच्छब्दादव्यक्तानुकरणात् डाचमुदाहरिष्यन् पटच्छब्दस्य द्विर्वचनमाह । **डाचि विवक्षिते द्वे बहुळमिति** ॥ यद्यपि 'सर्वस्य द्वे' इति प्रकरणे "डाचि द्वे भवतः इति वक्तव्यम्" इत्येव भाष्ये वार्तिकं पठितम् । तत्र डाचि परतः इति नार्थः । तथा सति, डाचि सति पटच्छब्दस्य द्विर्वचनम् । सति च द्विर्वचने अर्धस्यानेकाच्त्वात् डाजित्यन्योन्याश्रयापत्तेः । अतः डाचि विवक्षिते इत्याश्रितम् । एवञ्च डाचि विवक्षिते पटच्छब्दस्य द्विर्वचने सति पटत् पटत् इत्यस्यानेकाच्कार्धभागयुक्तत्वात् डाच् सूपपादः । पटत् पटत् आ करोतीति स्थिते प्रक्रियां दर्शयति । **नित्यमाम्रेडिते डाचीति** ॥ 'एकः पूर्वपरयोः' इत्यधिकारे पररूपप्रकरणे 'नाम्रेडितस्यान्त्यस्य तु वा' इति सूत्रभाष्ये इदं वार्तिकं पठितम् । **डाच्परमिति** ॥ डाच् परं यस्मादिति विग्रहः । **पकार इति** ॥ तथा च पटपटत् आ करोति इति स्थिते डित्त्वाट्टिलोपे पटपटाकरोतीति रूपमित्यर्थः । **अवरेति किमिति** ॥ द्व्यजर्धादित्येवास्त्वित्यर्थः । **घरटघरटाकरोतीति** ॥ घरटत् इत्यव्यक्तानुकरणात् डाचि द्विर्वचने पररूपे टिलोपे रूपम् । द्व्यजर्धादित्युक्ते तु अर्धभागस्य घरटत् इत्यस्य बह्वच्कत्वाड्डाच् न स्यादित्यर्थः । **अनेकाच इत्येवेति** ॥ द्व्यजवरार्धादित्यपनीय 'अव्यक्तानुकरणादनेकाचोऽनितौ डाच्' इत्येव सूत्रयितुमुचितमित्यर्थः । **एवं हीति** ॥ 'अनेकाचोऽनितौ' इति पाठे सति पटच्छब्दस्य द्वित्वात्प्रागेव अनेकाच्कत्वात् डाच् सम्भवतीति 'डाचि परतो द्वित्वम्' इति वक्तुं शक्यमिति भावः । **पटितीति** ॥ 'अव्यक्तानुकरणस्य' इति पररूपम् । **कृञो द्वितीय** ॥ **द्वितीयादिभ्य इति** ॥ द्वितीय, तृतीय, शम्ब, बीज, इत्येतेभ्य इत्यर्थः । **कृञ एव योगे इति** ॥ कृञ्ग्रहणात् कृभ्वस्तिर्नानुवर्तते इति भावः । 'मद्रात्परिवापणे' इति यावत्कृञ इत्यनुवर्तते । **बहुळोक्तेरिति** ॥

करोति । तृतीया करोति । शम्बशब्दः प्रतिलोमे । अनुलोमं कृष्टं क्षेत्रं पुनः प्रतिलोमं कर्षति, शम्बा करोति । बीजेन सह कर्षति, बीजा करोति ।

२१३० । सङ्ख्यायाश्च गुणान्तायाः । (५-४-५९)

कृञो योगे कृषौ डाच्स्यात् । द्विगुणा करोति क्षेत्रम् । क्षेत्रकर्मकं द्विगुणं कर्षणं करोतीत्यर्थः ।

२१३१ । समयाच्च यापनायाम् । (५-४-६०)

'कृषौ' इति निवृत्तम् । कृञो योगे डाच्स्यात् । समया करोति । कालं यापयतीत्यर्थः ।

२१३२ । सपत्त्रनिष्पत्त्रादतिव्यथने । (५-४-६१)

सपत्त्रा करोति मृगम् । सपुङ्खशरप्रवेशेन सपत्त्रं करोतीत्यर्थः । निष्पत्त्रा करोति । सपुङ्खस्य शरस्यापरपार्श्वे निर्गमनान्निष्पत्त्रं करोतीत्यर्थः । 'अतिव्यथने' किम् । सपत्त्रं निष्पत्त्रं वा करोति भूतलम् ।

२१३३ । निष्कुलान्निष्कोषणे । (५-४-६२)

निष्कुला करोति दाडिमम् । निर्गतं कुलमन्तरवयवानां समूहो यस्मादिति बहुव्रीहेर्डाच् ।

'डाचि बहुळं द्वे भवतः' इति बहुळग्रहणात् अव्यक्तानुकरणस्यैव डाचि द्वित्वम् । नतु तदन्यस्येत्यर्थः । **शम्बशब्दः प्रतिलोमे इति** ॥ वर्तते इति शेषः । **बीजेन सह कर्षतीति** ॥ आदौ कृष्टक्षेत्रे कुलुत्थादिबीजानां वापे कृते पुनः बीजैः सह कर्षणं प्रसिद्धम् । 'कर्षात्वतः' इति सूत्रभाष्यप्रामाण्यात् कृषधातुः शब्विकरणोऽस्ति । तेन शविकरणत्वात् कृषतीत्येव युक्तमिति न शङ्क्यम् । **सङ्ख्यायाश्च** ॥ शेषपूरणेन सूत्रं व्याचष्टे । **कृञो योगे इति** ॥ **समयाच्च** ॥ कृषाविति निवृत्तम् । समयशब्दात् यापनायाङ्गम्यमानायां डाजित्यर्थः । **समया करोतीति** ॥ करोतिरिह यापनायामित्याह । **यापयतीति** ॥ अतिक्रान्तङ्करोतीत्यर्थः । अद्येदङ्कर्तव्यमित्युक्ते विघ्नङ्किञ्चिदापाद्य कालक्षेपङ्करोतीति यावत् । **सपत्त्र** ॥ सपत्त्रशब्दात् निष्पत्त्रशब्दाच्च अतिव्यथने डाजित्यर्थः । 'व्यध ताडने' चतुर्थान्तः । अतिक्रम्य वेधः अतिव्यधनम् । लक्ष्ये शराः पतन्त्यनेनेति पत्त्रं, शराणाम्पुङ्खगतो बर्हः । **भूतलमिति** ॥ पुङ्खपर्यन्तं पुङ्खवर्जं वा शरप्रवेशनेन सपत्त्रं निष्पत्त्रं वा भूतलङ्करोतीत्यर्थः । **निष्कुलान्निष्कोषणे** ॥ डाजिति शेषः । निष्कोषणं अन्तर्गतावयवानाम्बहिः करणम् । **निष्कुलाकरोति दाडिममिति** ॥ निर्गतङ्कुलं यस्मादिति

२१३४ । सुखप्रियादानुलोम्ये । (५-४-६३)

सुखा करोति, प्रिया करोति गुरुम् । अनुकूलाचरणेनानन्दयतीत्यर्थः ।

२१३५ । दुःखात्प्रातिलोम्ये । (५-४-६४)

दुःखा करोति । स्वामिनं पीडयतीत्यर्थः ।

२१३६ । शूलात्पाके । (५-४-६५)

शूला करोति मांसम् । शूलेन पचतीत्यर्थः ।

२१३७ । सत्यादशपथे । (५-४-६६)

सत्या करोति भाण्डं वणिक् । क्रेतव्यमिति तथ्यं करोतीत्यर्थः । शपथे तु सत्यं करोति विप्रः ।

२१३८ । मद्रात्परिवापणे । (५-४-६७)

मद्रशब्दो मङ्गलार्थः । परिवापणं मुण्डनम् । मद्रा करोति । माङ्गल्यमुण्डनेन संस्करोतीत्यर्थः । 'भद्राच्चेति वक्तव्यम्' (वा ३३४४) । भद्रा करोति । अर्थः प्राग्वत् । 'परिवापणे' किम् । मद्रं करोति । भद्रं करोति ।

इति स्वार्थिकप्रकरणम् ।

॥ इति तद्धिताः ॥

बहुव्रीहिः । कुलशब्दश्च अन्तरवयवसमूहे वर्तते । तदाह । **निर्गतमित्यादि** ॥ **सुखप्रियादानुलोम्ये** ॥ सुखशब्दात्प्रियशब्दाच्च आनुलोम्ये गम्ये डाच् स्यादित्यर्थः । आराध्यगुर्वादिचित्तानुवर्तनमानुलोम्यम् । **सुखाकरोति, प्रियाकरोति गुरुमिति** ॥ चित्तानुवर्तनेन गुरुं सुखसम्पन्नं प्रियसम्पन्नञ्च करोतीत्यर्थः । तदाह । **अनुकूलेति** ॥ **दुःखात्** ॥ डाजिति शेषः । आराध्यप्रतिकूलाचरणम्प्रातिलोम्यम् । अन्यत्पूर्ववत् । **शूलात्पाके** ॥ डाजिति शेषः । **शूला करोतीति** ॥ अत्र करोतिः पाके वर्तते । तदाह । **शूलेन पचतीत्यर्थ इति** ॥ **सत्यादशपथे** ॥ डाजिति शेषः । **सत्या करोति भाण्डमिति** ॥ रत्नादिद्रव्यजातमित्यर्थः । सत्यशब्दोऽत्र तथ्ये वर्तते । 'सत्यन्तथ्यमृतं सम्यक्' इत्यमरः । **क्रेतव्यमितीति** ॥ एतावतैव मूल्येन इदं क्रयणार्हं नातोऽधिकमूल्येनेत्येवं यथाभूतार्थं वदतीत्यर्थः । **सत्यङ्करोति विप्रः इति** ॥ शपथङ्करोतीत्यर्थः । **मद्रात्परिवापणे** ॥ डाजिति शेषः । **मद्रशब्दो मङ्गळार्थ इति** ॥ मङ्गळपर्यायः इत्यर्थः । **परिवापणं मुण्डनमिति** ॥ केशान्वपते इत्यादौ तथा दर्शनादिति भावः । **माङ्गळयमुण्डनेनेति** ॥ चौळेनेत्यर्थः । **मद्रङ्करोति । भद्रङ्करोतीति** ॥ क्षेमङ्करोतीत्यर्थः । अत्र परिवापणस्याप्रतीतेर्न डाजिति भावः ॥

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमायां तद्धितप्रकरणं समाप्तम् ।

॥ श्रीरस्तु ॥

॥ अथ द्विरुक्तप्रकरणम् ॥

२१३९ । सर्वस्य द्वे । (८-१-१)

इत्यधिकृत्य ।

२१४० । नित्यवीप्सयोः । (८-१-४)

आभीक्ष्ण्ये वीप्सायां च द्योत्ये पदस्य द्विर्वचनं स्यात् । आभीक्ष्ण्यं

अथ द्विरुक्तप्रकरणम्—**सर्वस्य द्वे** ॥ **इत्यधिकृत्येति** ॥ द्विर्वचनविधयोऽनुक्रमिष्यन्ते इति शेषः । **नित्यवीप्सयोः** ॥ नित्यशब्देन नित्यत्वं विवक्षितम् । तच्च आभीक्ष्ण्यमिति भाष्यम् । व्याप्तुमिच्छा वीप्सा । व्याप्तिप्रतिपादनेच्छा, सा च प्रयोक्तृधर्मः । व्याप्तिरेव तु शाब्दबोधविषयः इति भाष्यस्वरसः । तथा च नित्यव्याप्त्योरित्येव सुवचम् । व्याप्तिश्च कात्स्न्र्येन सम्बन्धः । उपसर्गबलात् पदस्येत्यधिकरिष्यमाणमिहापकृष्यते । सर्वस्येति स्थानषष्ठी । द्वे इति त्वादेशसमर्पकम् । तस्य च शब्दरूपे इति विशेष्यमर्थाल्लभ्यते । शब्दानुशासनप्रस्तावात् । ते च शब्दरूपे स्वरूपतः अर्थतश्चान्तरतमे पदे इति स्थानेऽन्तरतमपरिभाषया लभ्यते । ततश्च पौनःपुन्ये कात्स्न्र्ये च गम्ये कृत्स्नावयवविशिष्टस्य पदस्यार्थतश्च शब्दतश्चान्तरतमे द्वे पदे भवतः इति फलितम् । तदभिप्रेत्य आह । **आभीक्ष्ण्ये वीप्सायाञ्च द्योत्ये इति** ॥ द्योत्यञ्च द्योत्या च द्योत्यम् । तस्मिन्नित्यर्थः । 'नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्' इति नपुंसकैकशेषः । एकत्वं च नित्यवीप्से च प्रकृतिगम्ये । द्विर्वचनन्तु द्योतकम् । सत्यपि प्रकृतेर्द्वित्वे द्विरुक्तयोः प्रकृत्यनतिरेकादिति बोध्यम् । **द्विर्वचनं स्यादिति** ॥ द्वे पदे आदेशौ स्त इत्यर्थः । तत्रावयवयोः पदत्वं स्वतः सिद्धम् । समुदायस्य तु पदद्वयात्मकस्य स्थानिवत्त्वात् सुबन्तत्वम् । तेन अपचन्नपचन्नित्यत्र ङमुट् वृक्षान्वृक्षानित्यत्र 'पदान्तस्य' इति णत्वनिषेधः अग्रेऽग्रे इत्यत्र 'एङः पदान्तात्' इति पूर्वरूपञ्चेत्यादीन्यवयवानां पदकार्याणि सिध्यन्ति । पुनःपुनरिति समुदायस्य स्थानिवत्त्वेन सुबन्तत्वात् भावे ष्यञि भावे ठञि च पौनःपुन्यम्, पौनःपुनिक इति च सिद्ध्यति । द्वे उच्चारणे स्त इत्याश्रयणे तु सर्वम्पदं द्विरुच्चारयेदित्यर्थः फलितः स्यात् । ततश्च पुनरित्येकस्यैव द्विरुच्चार्यमाणस्य पुनःपुनरित्यादेशत्वाभावेन स्थानिवत्त्वाप्रसक्त्या सुबन्तत्वविरहात् तद्धितोत्पत्तिर्न स्यात् । तस्मादादेशपक्षे एव श्रेयानित्यास्तां तावत् । **आभीक्ष्ण्यन्तिङन्तेष्विति** ॥ आभीक्ष्ण्यं पौनःपुन्यम् । तच्चेह प्रधानभूतक्रिया एव । क्रियाप्राधान्यं चाख्यातेष्वस्तीति 'प्रशंसायां रूपप्' इति सूत्रे भाष्ये स्पष्टम् । अव्ययकृत्स्वपि क्त्वातुमुन्नादिषु क्रियाप्राधान्यम् । 'अव्ययकृतो भावे' इत्युक्तेः । तथा च तिङन्तेषु

तिङन्तेष्वव्ययसंज्ञककृदन्तेषु च । पचति पचति । भुक्त्वा भुक्त्वा । वीप्सायाम् । वृक्षं वृक्षं सिञ्चति । ग्रामो ग्रामो रमणीयः ।

२१४१ । परेर्वर्जने । (८-१-५)

परि परि वङ्गेभ्यो वृष्टो देवः । वङ्गान्परिहृत्येत्यर्थः । 'परेर्वर्जने वावचनम्' । (वा ४६८३) । परि वङ्गेभ्यः ।

२१४२ । उपर्यध्यधसः सामीप्ये । (८-१-७)

उपर्युपरि ग्रामम् । ग्रामस्योपरिष्टात्समीपे देशे इत्यर्थः । अध्यधि सुखम् । सुखस्योपरिष्टात्समीपकाले दुःखमित्यर्थः । अधोऽधो लोकम् । लोकस्याधस्तात्समीपे देशे इत्यर्थः ।

२१४३ । वाक्यादेरामन्त्रितस्यासूयासम्मतिकोपकुत्सनभर्त्सनेषु । (८-१-८)

असूयायाम् । सुन्दर सुन्दर वृथा ते सौन्दर्यम् । सम्मतौ, देव देव वन्द्योऽसि । कोपे, दुर्विनीत दुर्विनीत इदानीं ज्ञास्यसि । कुत्सने, धानुष्क धानुष्क वृथा ते धनुः, भर्त्सने चोर चोर घातयिष्यामि त्वाम् ।

अव्ययसंज्ञककृदन्तेषु च पौनःपुन्यनिमित्तकद्विर्वचनं नान्यत्रेत्यर्थः । तथैवोदाहरति । **पचति पचति । भुक्त्वा भुक्त्वेति** ॥ **वीप्सायामिति** ॥ उदाह्रियते इति शेषः । **वृक्षं वृक्षमिति** ॥ कृत्स्नं वृक्षमित्यर्थः । अत्र प्रकृततद्वाटिकागतवृक्षकात्स्न्र्यं गम्यते । जगतीतलस्थितकृत्स्नस्य वृक्षसेचनस्य अशक्यत्वात् सर्वशब्दस्य कात्स्न्र्यवाचित्वेऽपि न द्वित्वमित्यनुपदमेव यथास्वे इत्यत्र वक्ष्यते । वृक्षं वृक्षमित्यत्र कात्स्न्र्यावगमेऽपि प्रत्येकनिष्ठमेकत्वमेव भासते, नतु बहुत्वम् । अतो न द्विबहुवचनम् । एकैकस्य प्राचामिति लिङ्गाच्च । सर्वस्येत्यभावे वृक्षाभ्यामित्यादौ 'स्वादिषु' इति पदत्वमवलम्ब्य प्रकृतिभागमात्रस्य द्विर्वचनं स्यात् । कृते तु सर्वग्रहणे पदावयवत्वानाक्रान्तस्यैव कृत्स्नावयवोपेतस्य पदस्य द्वित्वमित्यर्थलाभान्न दोषः । पदस्येति किम् । वाक्यस्य मा भूत् । **परेर्वर्जने** ॥ वर्जने वर्तमानस्य परीत्यस्य द्वे स्तः इत्यर्थः । **परि परि वङ्गेभ्यो वृष्ट इति** ॥ पर्जन्य इति शेषः । 'अपपरी वर्जने' इति परिः कर्मप्रवचनीयः । 'पञ्चम्यपाङ्परिभिः' इति पञ्चमी । परिहरेः संसारः इत्यत्र तु 'परेरसमासे' इति वक्तव्यमिति वार्तिकात् न द्विर्वचनम् । **उपर्यध्यधसः** ॥ उपरि, अधि, अधः, एतेषां द्वे स्तः सामीप्ये गम्ये इत्यर्थः । सामीप्यञ्च उपर्युपरि ग्राम इत्यत्र अधोऽधो लोकमित्यत्र च देशतः, अध्यधि सुखमित्यत्र तु कालत इति ज्ञेयम् । **वाक्यादेः** ॥ द्वे स्त इति शेषः । यद्यपि कोपाद्भर्त्सनम्, असूयया कुत्सनं, तथापि विनापि कोपासूये भर्त्सनकुत्सनयोः शिष्यादौ सम्भवात्पृथक् ग्रहणम् इति भाष्ये स्पष्टम् । **सुन्दरेति** ॥ सौन्दर्यमसहमानस्येदं वाक्यम् ।

२१४४ । एकं बहुव्रीहिवत् । (८-१-९)

द्विरुक्तः एकशब्दो बहुव्रीहिवत्स्यात् । तेन सुब्लोपपुंवद्भावौ । एकैकमक्षरम् । इह द्वयोरपि सुपोर्लुकि कृते बहुव्रीहिवद्भावादेव प्रातिपदिकत्वात्समुदायात्सुप् । एकैकया आहुत्या । इह पूर्वभागे पुंवद्भावादवग्रहे विशेषः । 'न बहुव्रीहौ' (सू २२२) इत्यत्र पुनर्बहुव्रीहिग्रहणं मुख्यबहुव्रीहिलाभार्थम् । तेनातिदिष्टबहुव्रीहौ सर्वनामतास्त्येवेति प्राञ्चः । वस्तुतस्तु भाष्यमते प्रत्या-

---

देवेति ॥ तव वन्दनं सम्मतमित्यर्थः । **दुर्विनीतेति** ॥ क्रोधाविष्टस्य वाक्यम् । **ज्ञास्यसीति** ॥ दुर्विनयस्य फलमिति शेषः । **धानुष्केति** ॥ युद्धाऽसमर्थं प्रति निन्देयम् । **चोरेति** ॥ चोरं प्रति अवाच्यवादोऽयम् । **एकं बहुव्रीहिवत्** ॥ **द्विरुक्त इति** ॥ द्विर्वचनं प्राप्त इत्यर्थः । एतच्च प्रकरणाल्लभ्यते । "वीप्सामात्रविषयमिदम्" इति भाष्याच्च । **तेनेति** ॥ बहुव्रीहिवत्त्वेन सुब्लोपपुंवद्भावौ सिध्यत इत्यर्थः । तत्र सुब्लोपमुदाहरति । **एकैकमिति** ॥ **इहेति** ॥ एकैकमित्यत्र एकमित्यस्य द्विर्वचने सति, एकमेकमिति स्थिते सुपो लुकि, समुदायात् सुबित्यन्वयः । ननु 'यत्र सङ्घाते पूर्वो भागः पदं तस्य चेद्भवति तर्हि समासस्यैव' इति नियमेन समुदायस्य प्रातिपदिकत्वाभावात् कथमिह सुपो लुक्, कथं वा समुदायात् सुबित्यत आह । **बहुव्रीहिवद्भावादेव प्रातिपदिकत्वादिति** ॥ एतच्च सुपोर्लुकीत्यत्र समुदायात्सुबित्यत्र च मध्यमणिन्यायेनान्वेति । अथ पुंवत्त्वेऽप्युदाहरति । **एकैकया आहुत्येति** ॥ एकयेत्यस्य द्विर्वचने सति एकया एकयेति स्थिते, बहुव्रीहिवत्त्वेन समुदायस्य प्रातिपदिकत्वात्सुपोर्लुकि, पूर्वखण्डस्य पुंवत्त्वे कृते, समुदायात्पुनस्तृतीयोत्पत्तौ, एकैकयेति रूपम् । बहुव्रीहिवत्त्वाभावे तु इह समुदायस्य प्रातिपदिकत्वाभावात् सुपोर्लुक् पूर्वखण्डस्य पुवत्त्वञ्च न स्यात् । उत्तरपदपरकत्वाभावात् । समासचरमावयस्यैव उत्तरपदत्वादिति भावः । एकैकामित्यत्र उत्तरखण्डस्य 'सर्वनाम्नो वृत्तिमात्रे' इति पुंवत्त्वमपि बहुव्रीहिवत्त्वाभावे सति न प्रवृत्तिमर्हति । पूर्वस्यैवेदं 'भस्येषाद्वा' इति लिङ्गादित्युक्तत्वादिति बोध्यम् । ननु सुपोर्लुकि पूर्वखण्डस्य एकाशब्दस्य पुंवत्त्वे सत्यसति वा वृद्धौ एकैकयेति सिध्यत्येवेत्यत आह । **इह पूर्वभागे इति** ॥ **अवग्रहे इति** ॥ समस्तपदस्य द्विधा करणे पूर्वखण्डः अवग्रहः । "तस्य पूर्वोऽवग्रहः" इति प्रातिशाख्यम् । एकैकयेत्येक एकया इतीष्यते पूर्वखण्डस्य पुंवत्त्वम् । बहुव्रीहिवत्त्वाभावे तु एकैकयेत्येका एकयेति स्यादिति भावः । तैत्तिरीयास्तु एकैकयेत्येकया एकया इत्येवावगृह्णन्ति । एकं समासवदित्येव सिद्धे बहुव्रीहिग्रहणं बहुव्रीहौ प्रकृत्या पूर्वपदमिति स्वरार्थम् । ननु बहुव्रीहिवत्त्वे सति 'न बहुव्रीहौ' इति सर्वनामत्वनिषेधादेकैकस्मै देहीत्यादौ कथं सर्वनामकार्यमित्यत आह । **न बहुव्रीहावित्यत्रेति** ॥ 'विभाषा दिक्समासे बहुव्रीहौ' इत्यतो बहुव्रीहिग्रहणानुवृत्त्यैव सिद्धे 'न बहुव्रीहौ' इत्यत्र पुनर्बहुव्रीहिग्रहणम्मुख्यबहुव्रीहिलाभार्थम् । अतः बहुव्रीहिवदित्यतिदिष्टबहुव्रीहौ सर्वनामत्वनिषेधो नेत्यर्थः । तदाह । **तेनेति** ॥ तदेवं प्राचीनोक्तं परिहारमुक्त्वा सिद्धान्तिमतेनाह । **वस्तुतस्त्विति** । **एतदिति** ॥ 'न

ख्यातमेतत् । सूत्रमतेऽपि बहुव्रीह्यर्थेऽलौकिके विग्रहे निषेधकं न तु बहुव्रीहाविति॑हातिदेशशङ्कैव नास्ति । एकैकस्मै देहि ।

२१४५ । आबाधे च । (८-१-१०)

पीडायां द्योत्यायां द्वे स्तो बहुव्रीहिवच्च । गतगतः । विरहात्पीड्यमानस्येयमुक्तिः । बहुव्रीहिवद्भावात्सुब्लुक् । गतगता । इह पुंवद्भावः ।

२१४६ । कर्मधारयवदुत्तरेषु । (८-१-११)

इह उत्तरेषु द्विर्वचनेषु कर्मधारयवत्कार्यम् । प्रयोजनं सुब्लोपपुंवद्भावान्तोदात्तत्वानि (वा ४६८९) ।

२१४७ । प्रकारे गुणवचनस्य । (८-१-१२)

सादृश्ये द्योत्ये गुणवचनस्य द्वे स्तस्तच्च कर्मधारयवत् । 'कर्मधारयवदुत्तरेषु—' (सू २१४६) इत्यधिकारात् । तेन पूर्वभागस्य पुंवद्भावः

बहुव्रीहौ' इति सूत्रमित्यर्थः । एवञ्च बहुव्रीहावपि सर्वनामत्वस्य भाष्यसम्मततया बहुव्रीहिवत्त्वातिदेशे सति सर्वनामत्वन्निर्बाधमिति भावः । **सूत्रमतेऽपीति** ॥ उपसर्जनत्वादेव बहुव्रीहौ सर्वनामत्वनिषेधसिद्धेः 'न बहुव्रीहौ' इति बहुव्रीह्यर्थके अलौकिकविग्रहवाक्ये एव समासात् प्राक् सर्वनामत्वं निषिध्यत इति प्रागेवोक्तम् । तस्मादिह बहुव्रीह्यतिदेशप्रयुक्तसर्वनामकार्याभावशङ्कैव नास्तीत्यर्थः । **एकैकस्मैदेहीति** ॥ इह द्वयोरपि सुपोर्लुकि पुनः सर्वादिपठितैकशब्दान्ततया सर्वनामत्वात् स्मैभाव इति भावः । **आबाधे च** ॥ आबाधः पीडा । तदाह । **पीडायामिति** । **गतगतः इति** ॥ प्रियां विना काल इति शेषः । आबाधं दर्शयितुमाह । **विरहादिति** ॥ स्त्रीवियोगादित्यर्थः । **बहुव्रीहिवद्भावादिति** ॥ गतः इत्यस्य द्विर्वचने सति बहुव्रीहिवत्त्वात् समुदायस्य प्रातिपदिकत्वेन सुपोर्लुकि समुदायात् सुबुत्पत्तिरित्यर्थः । **गतगतेति** ॥ प्रियेति शेषः । इयमपि स्त्रीविरहात् पीड्यमानस्योक्तिः । एकस्या एव गमनकर्त्र्याः द्विः कथनात् समानाधिकरणं स्त्रीलिङ्गमुत्तरपदमिति 'स्त्रियाः पुंवत्' इति पुंवत्त्वम् । बहुव्रीहिवत्त्वादुत्तरपदत्वस्यापि सत्वात् । तदाह । **इह पुंवद्भाव इति** ॥ **कर्मधारयवदुत्तरेषु** ॥ कार्यं स्यादिति शेषः । कर्मधारयवत्त्वस्य फलमाह । **प्रयोजनमिति** ॥ सुब्लोपादीनां प्रत्येकान्वयाभिप्रायमेकवचनम् । **अन्तोदात्तत्वानीति** ॥ अनुदात्तञ्चेत्यधिकृतमपि भाष्यप्रामाण्यान्नात्र सम्बध्यते इति भावः । **प्रकारे गुणवचनस्य** ॥ प्रकारशब्दः सादृश्ये वर्तते' व्याख्यानादित्यभिप्रेत्य आह । **सादृश्ये द्योत्ये इति** ॥ गुणवचनशब्देन 'आ कडारात्' इति सूत्रस्थभाष्यपरिगणिताः शब्दा गृह्यन्ते इति 'वोतो गुणवचनात्' इत्यादौ प्रपञ्चितमिदम् । **तेनेति** ॥ कर्मधारयवत्त्वेनेत्यर्थः । **पुंवद्भाव इति** ॥ 'पुंवत्कर्मधारय' इत्यनेनेति शेषः । **पटुपट्वीति** ॥ पट्वीशब्दस्य द्विर्वचने कर्मधारयवत्त्वात् 'पुंवत्कर्मधारय' इति

'समासस्य' (सू ३७३४) इत्यन्तोदात्तत्वं च । पटुपट्वी । पटुपटुः । पटुसदृशः । ईषत्पटुरिति यावत् । गुणोपसर्जनद्रव्यवाचिनः केवलगुणवाचिनश्चेह गृह्यन्ते । शुक्लशुक्लं रूपम् । शुक्लशुक्लः पटः । 'आनुपूर्व्ये द्वे वाच्ये' (वा ४६९२) । मूले मूले स्थूलः । 'सम्भ्रमेण प्रवृत्तौ यथेष्टमनेकधा प्रयोगो न्यायसिद्धः' (वा ५०५६) । सर्प सर्प, बुध्यस्व बुध्यस्व । सर्प सर्प सर्प बुध्यस्व बुध्यस्व बुध्यस्व । 'क्रियासमभिहारे च' (वा ४६९५) लुनीहि लुनीहीत्येवायं लुनाति । 'नित्यवीप्सयोः' (सू २१४०) इति सिद्धे भृशार्थे

पूर्वखण्डस्य पुंवत्त्वे रूपमिति भावः । यद्यपि बहुव्रीहिवत्त्वेऽपि 'स्त्रियाः पुंवत्' इति पुवत्त्वादिदं सिद्धम्, तथापि कारिकेत्यादिकोपधादिष्वपि पुवत्त्वार्थं कर्मधारयवदिति वचनमिति भावः । **पटुपटुरिति** ॥ 'वोतो गुणवचनात्' इति ङीषभावे पुंसि च द्विर्वचने रूपम् । **पटुसदृश इति** ॥ इत्यर्थ इति शेषः । फलितमाह । **ईषत्पटुरिति** ॥ इह गुणवचनशब्दस्य गुणोपसर्जनद्रव्यवाचित्वमेवेति भ्रमं निरस्यति । **गुणोपसर्जनेति** ॥ **शुक्लशुक्लं रूपमिति** ॥ शुक्लसदृशमित्यर्थः । ईषच्छुक्लमिति यावत् । एवं शुक्लशुक्लः पट इति बोध्यम् । **आनुपूर्व्ये इति** ॥ अत्र वार्तिके कर्मधारयवदिति न सम्बध्यते । तदुदाहरणे तु भाष्ये सुब्लोपदर्शनादित्यभिप्रेत्योदाहरति । **मूलेमूले इति** ॥ पूर्वपूर्वो मूलभागः उत्तरोत्तरमूलभागापेक्षया स्थूल इति यावत् । **सम्भ्रमेणेति** ॥ वार्तिकमिदम् । सम्भ्रमः भयादिकृता त्वरा, तेन प्रवृत्तौ गम्यमानायां यथेष्टम् इच्छानुसारेण अनेकधा शब्दः प्रयोक्तव्य इति वक्तव्यमित्यर्थः । अनेकधेत्युक्तेर्द्वे इति निवर्तते । यथेष्टमित्युक्तेरसकृत्त्वेऽप्येकस्य प्रयोगः स्यादिति शङ्कान्निरस्यति । **न्यायसिद्ध इति** ॥ यावद्वारम्प्रयोगे सति बोद्धा अर्थम्प्रत्येति तावद्वारमेव प्रयोगः । बोधात्मकफलपर्यवसायित्वाच्छब्दप्रयोगस्येत्यर्थः । एतच्च भाष्ये स्पष्टम् । तत्रापि कर्मधारयवत्त्वातिदेशान्न सुब्लुक् । भाष्ये तथैवोदाहरणात् । **क्रियासमभिहारे चेति** ॥ वार्तिकमिदम् । द्वे स्त इति शेषः । पौनःपुन्यं भृशत्वञ्च क्रियासमभिहारः । लोडन्तविषयमेवेदम् । "क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः" इति सूत्रभाष्ये क्रियासमभिहारे लोण्मध्यमपुरुषैकवचनस्य द्वे भवत इति वक्तव्यमिति पाठमभिप्रेत्योदाहरति । **लुनीहि लुनीहीत्येवायं लुनातीति** ॥ 'लूञ् छेदने' अस्मात् 'क्रियासमभिहारे लोट् लोटो हिस्वौ' इति लोट् । तस्य हि इत्यादेशः श्नाविकरणः । लुनीहीत्यस्य अनेन द्विर्वचनम् । 'यथाविध्यनुप्रयोगः पूर्वस्मिन् इत्यनुप्रयोगः' । तस्माल्लडादयः । अतिशयेन पुनर्वा लवनं लुनीहीति द्विरुक्तस्यार्थः । एककर्तृक लवनमनुप्रयोगस्यार्थः । इतिशब्दस्त्वभेदान्वये तात्पर्यङ्ग्राहयतीत्यादि मूल एव लकारार्थप्रक्रियायां स्फुटीभविष्यति । तथा च अतिशयितमेककर्तृकं लवनमिति फलितोऽर्थः । **नित्येति** ॥ 'नित्यवीप्सयोः' इति पौनःपुन्ये द्विर्वचने सिद्धेऽपि भृशार्थे

---

१. अत्र च 'चापले च' (वा ४६९४) इति वार्तिके, 'नचावश्यं द्वे एव । यावद्भिः सोऽर्थो गम्यते तावन्तः प्रयोक्तव्याः' इति भाष्यं च मानम् ।

द्वित्वार्थमिदम्। पौनःपुन्येऽपि लोटा सह समुच्चित्य द्योतकतां लब्धुं वा। 'कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये। समासवच्च बहुलम्' (वा ४७००)। बहुलग्रहणादन्यपरयोर्न समासवत्। इतरशब्दस्य तु नित्यम्। 'असमासवद्भावे पूर्वपदस्थस्य सुपः सुर्वक्तव्यः' (वा ४७००)। अन्योऽन्यं विप्रा नमन्ति। अन्योऽन्यौ। अन्योऽन्यान्। अन्योऽन्येन कृतम्। अन्योऽन्यस्मै दत्तमित्यादि। 'अन्योऽन्येषां पुष्करैरामृशन्तः' इति माघः। एवं परस्परम्। अत्र कस्कादित्वाद्विसर्गस्य सः। इतरेतरम्। इतरेतरेणेत्यादि। 'स्त्रीनपुंसकयोरुत्तरपदस्थाया विभक्तेराम्भावो वा वक्तव्यः (वा ४७०१)। अन्योन्याम्—

द्विर्वचनार्थं इदं वार्तिकमित्यर्थः। नन्वस्य भृशार्थ एव द्विर्वचनफलकत्वे 'भृशे च' इत्येव सिद्धे 'क्रियासमभिहारे' इति व्यर्थमित्यत आह। **पौनःपुन्येऽपीति**॥ लुनीहि लुनीहीत्यत्र पौनःपुन्ये लोटो द्विर्वचनस्य च समुच्चयार्थमिति यावत्। अन्यथा लोटैव पौनःपुन्यस्य द्योतितत्वात्तत्र नित्यवीप्सयोर्द्विर्वचनस्य प्रवृत्तिर्न स्यादित्यर्थः। एवञ्च 'धातोरेकाचः' इति पौनःपुन्ये यङन्ते पापच्यते इत्यादौ द्विर्वचनमित्यन्यत्र विस्तरः। **कर्मव्यतिहारे इति**॥ क्रियाविनिमयः कर्मव्यतिहारः, तस्मिन् गम्ये सर्वनाम्नो द्वे स्तः। ते च द्विरुक्ते पदे बहुळं समासवदित्यर्थः। अत्र 'बहुळम्' इति समासवदित्यत्रैवान्वेति। द्विर्वचनन्तु नित्यमेव। **अन्यपरयोरिति**॥ अन्यशब्दपरशब्दयोरेव बहुळं समासवत्त्वम्। इतरशब्दस्य तु नित्यमेवेत्यर्थः। अत एव अन्यशब्दस्य समासवत्त्वरहितमेव इतरशब्दस्य तत्सहितमेवोदाहरण भाष्ये दृश्यते। तथा 'परस्परोपपदाच्च' इति वार्तिकप्रयोगात् परशब्दस्यापि समासवत्त्वाभावो गम्यते इति भावः। एवञ्च क्रियासमभिहारे अन्यशब्दस्य परशब्दस्य च नित्यं द्विर्वचनम्। द्विरुक्तयोस्तु समासवत्त्वं बहुळम्। इतरशब्दस्य तु तदुभयमपि नित्यम्। एतत्त्रयव्यतिरिक्तसर्वनामशब्दस्य तु नेदं द्वित्वम्। बहुळग्रहणादिति स्थितिः। **असमासवद्भावे इति**॥ इदमन्यपरशब्दयोरेव। इतरशब्दस्य समासवत्त्वस्यैवोक्तत्वात्। **सुपस्सुरिति**॥ सुबिति प्रत्याहारः। सप्तानामपि विभक्तीनां पूर्वपदस्थानां प्रथमैकवचनं सु इत्यादेशो वाच्य इत्यर्थः। इदं द्वित्वादिविधानं प्रथमैकवचनमात्रविषयमिति केचित्। तदेतद्भाष्यविरुद्धम्। भाष्ये द्वितीयादिविभक्तेरुदाहृतत्वादित्यभिप्रेत्य द्वितीयादिविभक्तीरुदाहरति। **अन्योऽन्यं विप्राः नमन्तीत्यादि**॥ इह अन्यम् अन्यौ इत्यादीनां द्वित्वे पूर्ववत्सुपः सुः। प्रथमैकवचनस्यैवेदं द्वित्वादीत्येतत् न कविसम्मतमित्याह। **अन्योऽन्येषामित्यादि माघः इत्यन्तम्**॥ परस्परमित्यत्र विसर्गस्य सत्त्वापवादमुपध्मानीयमाशङ्क्य आह। **कस्कादित्वादित्यादि। इतरेतरमिति**॥ इतरः इतराविल्यादीनां द्वित्वे समासवत्त्वात् सुपोर्लुकि समुदायात् पुनः सुबुत्पत्तिरिति भावः। **स्त्रीनपुंसकयोरिति**॥ स्त्रीनपुंसकयोर्विद्यमानानाम् अन्यपरेतरपदानां कर्मव्यतिहारे द्वित्वे उत्तरपदस्थविभक्तेः आम् इत्यादेशो बहुळं वक्तव्यमित्यर्थः। **अन्योऽन्यामित्यादि**॥ अन्योऽन्यां, अन्योऽन्यं

अन्योन्यम्। परस्पराम्—परस्परम्। इतरेतराम्—इतरेतरं वा। इमे ब्राह्मण्यौ कुले वा भोजयतः। अत्र केचित्। आमादेशो द्वितीयाया एव। भाष्यादौ तथैवोदाहृतत्वात्। तेन स्त्रीनपुंसकयोरपि तृतीयादिषु पुंवदेव रूपमित्याहुः। अन्ये तूदाहरणस्य दिङ्मात्रत्वात्सर्वविभक्तीनामादेशमाहुः।

दलद्वये टाबभावः क्लीबे चादड्विरहः स्वमोः।
समासे सोरलुक्चेति सिद्धं बाहुलकात्त्रयम्॥

वा इमे ब्राह्मण्यौ कुले वा भोजयतः, परस्परां परस्परं वा इमे ब्राह्मण्यौ कुले वा भोजयतः, इतरेतरां इतरेतरं वा इमे ब्राह्मण्यौ कुले वा भोजयतः इत्यन्वयः। तत्र अन्यामित्यस्य द्वित्वे दळद्वये टाबभाव इति वक्ष्यमाणतया पुंवत्त्वात् टापो निवृत्तौ समासत्वाभावात्सुपोऽलुकि पूर्वपदस्थविभक्तेः सुभावे रुत्वे 'अतो रोरप्लुतात्' इत्युत्वे आद्गुणे उत्तरपदस्थविभक्तेरनेन आम्भावे अन्योऽन्यामिति रूपम्। आम्भावविरहे तु पुंवत्त्वाट्टापो निवृत्तौ पूर्वपदस्थविभक्तेः सुभावे पुल्लिङ्गवदेव अन्योऽन्यमिति रूपम्। इयं ब्राह्मणी, अन्यां ब्राह्मणीं भोजयति। अन्या त्विमामित्येवं विनिमयेन ब्राह्मण्यौ भोजयत इत्यर्थः। इदं कुलङ्कर्तृ अन्यत्कुल भोजयति, अन्यत्कुलङ्कर्तृ इद कुलं इत्येवं विनिमयेन कुले भोजयत इत्यर्थः। अत्रान्यच्छब्दस्य नपुंसकलिङ्गस्य द्वित्वे पूर्वपदस्थायाः विभक्तेः सुभावे उत्तरपदस्थविभक्तेः आम्भावे अन्योऽन्यामिति रूपम्। आम्भावविरहे तु 'क्लीबे चादड्विरहः स्वमोः' इति वक्ष्यमाणतया पुंवत्त्वात् अद्डादेशाभावे अन्योऽन्यमिति पुंवदेव रूपमिति बोध्यम्। एवं स्त्रीत्वे परामिति पदस्य द्वित्वे दळद्वयेऽपि पुंवत्त्वात् टापो निवृत्तौ पूर्वोत्तरपदस्थविभक्त्योः क्रमेण सुभावे आम्भावे च परस्परामिति रूपम्। आम्भावविरहे तु द्वित्वे पुंवत्त्वाट्टापो निवृत्तौ पूर्वपदस्थविभक्तेः सुभावे परस्परमिति रूपम्। नपुंसकत्वे तु परमित्यस्य द्वित्वे पूर्वपदस्थविभक्तेः सुभावे उत्तरपदस्थविभक्तेराम्भावे परस्परामिति रूपम्। आमभावे तु द्वित्वे पूर्वपदस्थविभक्तेः सुभावे परस्परम् इति रूपम्। इतरामित्यस्य द्वित्वे पुंवत्त्वाट्टापो निवृत्तौ उत्तरपदस्थविभक्तेराम्भावे समासवत्त्वात् पूर्वपदस्थविभक्तेर्लुकि इतरेतरामिति रूपम्। आम्भावविरहे तु इतरेतरमिति रूपम्। नपुसकस्य तु इतरच्छब्दस्य द्वित्वे पुंवत्त्वाददड्डादेशविरहे पूर्वपदस्थविभक्तेः सुभावे उतरपदस्थविभक्तेराम्भावतदभावाभ्यां रूपद्वयम्। अत्र भाष्यादौ द्वितीयाविभक्त्यन्तस्योदाहरणादितरविभक्तिषु आम्भावो न भवतीति प्राचीनमतमाह। **अत्र केचिदिति**॥ द्वितीयेतरविभक्तिषु आम्भावविरहेणेत्यर्थः। **पुंवदेवेति**॥ आम्भावविरहे सति बहुळग्रहणात् पुंवत्त्वे टाबभावे प्रथमतृतीयादिविभक्तिषु पुंवदेव रूपम्। नपुंसकत्वे प्रथमतृतीयादिविभक्तिषु आम्भावविरहात् प्रथमैकवचनस्य इद पुंवदेव रूपमित्यर्थः। सिद्धान्तमाह। **अन्ये त्विति**॥ **दिङ्मात्रत्वादिति**॥ दिक्प्रदर्शनमात्रत्वादित्यर्थः। उपलक्षणत्वादिति यावत्। अथात्र बहुळग्रहणानुवृत्तेः प्रयोजनसिद्धान्तप्राचीनश्लोकमाह। **दलद्वये इति**॥ स्त्रीलिङ्गेष्वन्यपरेतरशब्देषु कर्मव्यतिहारे द्वित्वे सति पूर्वोत्तरखण्डयोः पुंवत्त्वाट्टान्निवृत्तिरित्यर्थः। यद्यपि इतरेतरमित्यत्र समासवत्त्वात्सर्वनाम्नो वृत्तिमात्रे इति पुंवत्त्वादेव पूर्वखण्डे टाबभावः सिद्धः, तथाप्युत्तरखण्डे टाबभावार्थम्बाहुळकाश्रयणमिति भावः। **क्लीबे**

तथाहि। अन्योऽन्यं परस्परमित्यत्र दलद्वयेऽपि टाप्प्राप्तः। न च 'सर्वनाम्नो वृत्तिमात्रे—' (वा) इति पुंवद्भावः। अन्यपरयोरसमासवद्भावात्। न च द्विर्वचनमेव वृत्तिः। 'यां यां प्रियः प्रैक्षत कातराक्षी सा सा' इत्यादावतिप्रसङ्गात्। 'अन्योऽन्यमितरेतरम्' इत्यत्र च 'अद्ड्डुतरादिभ्यः—' (सू ३१५) इत्यद्ड् प्राप्तः। 'अन्योऽन्यसंसक्तमहस्त्रियामम्' 'अन्योऽन्याश्रयः,' 'परस्पराक्षिसादृश्यम्' 'अपरस्परैः' इत्यादौ सोर्लुक्च प्राप्तः। सर्वं बाहुलकबलेन समाधेयम्। प्रकृतवार्तिकभाष्योदाहरणम् 'स्त्रियाम्' (सू ४५३) इति सूत्रे 'अन्योऽन्यसंश्रयं त्वेतद्' इति भाष्यं चात्र प्रमाणमिति।

इति ॥ अन्योऽन्यमित्यादौ अद्ड्डादेशविरह इत्यर्थः। **समासे सोरिति** ॥ कृतद्वित्वस्य अन्येन समासे पूर्वखण्डस्थस्येत्यर्थः। **तथाहीति** ॥ यथेद स्पष्टम्भवति तथा उदाहृत्य प्रदर्श्यते इत्यर्थः। ननु पूर्वदळे 'सर्वनाम्नो वृत्तिमात्रे' इति पुंवत्त्वेनैव टाब्निवृत्तेः सिद्धत्वात् तद्विषये बहुळग्रहणं नादर्तव्यमित्याशङ्क्य निराकरोति। **न चेति** ॥ 'सर्वनाम्नो वृत्तिमात्रे' इति पुंवत्त्वस्यात्र न प्रसक्तिरित्यर्थः। कुत इत्यत आह। **अन्यपरयोरिति** ॥ 'समासवच्च बहुळम्' इति समासवत्त्वम् इतरशब्दमात्रविषयं, न त्वन्यपरशब्दविषयमिति प्रागुक्तमित्यर्थः। ननु मास्तु समासवत्त्व, तथापि 'सर्वनाम्नो वृत्तिमात्रे' इति पुवत्त्वं दुर्वारम्। द्विर्वचनस्य वृत्तित्वादित्याशङ्क्य निराकरोति। **नच द्विर्वचनमेव वृत्तिरिति** ॥ 'कृत्तद्धितसमासैकशेषसनाद्यन्ता धातुरूपाः पञ्च वृत्तयः' इति परिगणनादिति भावः। द्विर्वचनस्य वृत्त्यन्तर्भावे बाधकमाह। **यां यामिति** ॥ द्विर्वचनस्य वृत्त्यन्तर्भावे "यांयां प्रियः प्रैक्षत कातराक्षी सासा ह्रिया नम्रमुखी बभूव" इत्यत्र श्लोके यांयामित्यत्र सासेत्यत्र च 'सर्वनाम्नो वृत्तिमात्रे' इति पूर्वखण्डस्य पुंवत्त्वं स्यादित्यर्थः। क्लीबे चाद्ड्विरहः इत्यस्योदाहरति। **अन्योऽन्यमिति** ॥ ननु समासे सोरलुक् चेति कथम्। अन्यपरशब्दयोः समासवत्त्वाभावादित्याशङ्क्य कृतद्वित्वस्यान्येन समासे पूर्वखण्डस्थस्य सोरलुगिति तदर्थमभिप्रेत्य तथैवोदाहरति। **अन्योऽन्यसंसक्तमिति** ॥ अन्योऽन्येन संसक्तमिति तृतीयासमासः। अहश्च त्रियामा चेति समाहारद्वन्द्वः। अहश्च रात्रिश्च अन्योऽन्येन संयुक्तमित्यर्थः। **अन्योऽन्याश्रय इति** ॥ अन्योऽन्यस्य आश्रय इति षष्ठीसमासः। **परस्पराक्षिसादृश्यमिति** ॥ अक्ष्णा सादृश्यमक्षिसादृश्यम्। परस्परस्याक्षिसादृश्यमिति विग्रहः। **अपरस्परैरिति** ॥ न परस्परे अपरस्परे तैरिति विग्रहे एषु कृतद्वित्वेषु समासावयवेषु पूर्वखण्डस्थस्य सुबादेशस्य सोर्लुक् प्राप्तः इत्यर्थः। सुभावविधानन्तु अन्योऽन्यमित्यादावसमासे चरितार्थमिति भावः। ननु बहुळग्रहणादेतत् समाधेयमित्यत्र किं प्रमाणमित्यत आह। **प्रकृतवार्तिकेति** ॥ स्त्रीनपुंसकयोरिति प्रकृतवार्तिके अन्योऽन्यमिमे ब्राह्मण्याविति, इतरेतरमिमे कुले इति चोदाहरणात् "दळद्वये टाबभावः क्लीबे चाद्ड्विरहः स्वमोः" इति विज्ञायते। 'स्त्रियाम्' इति सूत्रे अन्योऽन्यसंश्रयं त्वेतदिति भाष्यप्रयोगात्

२१४८ । अकृच्छ्रे प्रियसुखयोरन्यतरस्याम् । (८-१-१३)

प्रियप्रियेण ददाति । प्रियेण वा । सुखसुखेन ददाति । सुखेन वा । द्विर्वचने कर्मधारयवद्भावात्सुपि लुकि तदेव वचनम् । अतिप्रियमपि वस्त्वनायासेन ददातीत्यर्थः ।

२१४९ । यथास्वे यथायथम् । (८-१-१४)

'यथास्वम्' इति वीप्सायामव्ययीभावः । योऽयमात्मा यच्चात्मीयं तद्यथास्वम् । तस्मिन्यथाशब्दस्य द्वे क्लीबत्वं च निपात्यते । यथायथं ज्ञाता । यथास्वभावमित्यर्थः । यथात्मीयमिति वा ।

२१५० । द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु । (८-१-१५)

द्विशब्दस्य द्विर्वचनं पूर्वपदस्य अम्भावोऽत्वं चोत्तरपदस्य नपुंसकत्वं च निपात्यते एष्वर्थेषु । तत्र रहस्यं द्वन्द्वशब्दस्य वाच्यम् । इतरे विषयभूताः ।

समासे सोरलुगिति विज्ञायते इत्यर्थः । **अकृच्छ्रे** ॥ कृच्छ्रं कष्टम् । अकृच्छ्रम् अनायासः । तस्मिन्वर्तमानयोः प्रिय, सुख, इत्यनयोः द्वे वा स्तः । **कर्मधारयवद्भावादिति** ॥ 'कर्मधारयवदुत्तरेषु' इत्यधिकारादिति भावः । 'समासवच्च बहुलम्' इत्यतः समासवदित्यनुवृत्तिस्तु न शङ्क्या । तस्य वार्तिकस्थत्वात् । एवञ्च प्रियेणेत्यस्य सुखेनेत्यस्य च द्वित्वे सति कर्मधारयवत्त्वात् सुपोस्तृतीयैकवचनयोर्लुकि पुनः समुदायात् तृतीयैकवचनमिति फलितम् । **यथास्वे यथायथम्** ॥ **वीप्सायामिति** ॥ कात्स्न्र्येन सम्बन्धो वीप्सेत्युक्तम् । स्वशब्दार्थगतकात्स्न्र्ये द्योत्ये यथाशब्दस्य स्वशब्देनाव्ययीभाव इत्यर्थः । कृत्स्नश्चासौ स्वश्चेत्यस्वपदविग्रहः । नित्यसमासत्वात् । स्वशब्दस्तु आत्मात्मीयज्ञातिधनवाची । इह तु आत्मात्मीयवाच्येव गृह्यते । नतु ज्ञातिधनवाची । व्याख्यानादित्यभिप्रेत्य विग्रहवाक्यस्य फलितमर्थमाह । **द्वे इति** ॥ स्त इति शेषः । निपातनादिति भावः । न च 'नित्यवीप्सयोः' इत्येव वीप्सया द्वित्वमिह सिद्धमिति शङ्क्यम् । द्वित्वविषयस्य शब्दस्य लक्षणया कात्स्न्र्यविशिष्टे वृत्तावेव वीप्सायाः द्विवचनविधानात् । अन्यथा सर्वो घटः इत्यादौ सर्वशब्दस्यापि द्वित्वापत्तेरिति भावः । **क्लीबत्वमिति** ॥ यथायथा इति समुदायस्येति शेषः । अन्यथा अव्ययत्वादलिङ्गत्वं स्यादिति भावः । एवञ्च कृतद्वित्वस्य नपुंसकह्रस्वत्वञ्च फलितम् । **यथायथं ज्ञातेति** ॥ अत्र ज्ञातेति तृन्नन्तम् । तद्योगे 'न लोक' इति षष्ठीनिषेधात्कर्मणि द्वितीया । तृजन्तत्वे तु यथायथस्य ज्ञातेत्येव । **द्वन्द्वं रहस्य** ॥ **पूर्वपदस्येति** ॥ द्वौ द्वाविति द्वित्वे कर्मधारयवत्त्वात् सुब्लुकि समुदायात् पुनः सुपि पूर्वपदावयवस्य इकारस्य अम् इति मकारान्तादेश इत्यर्थः । **अत्वमिति** ॥ उत्तरपदस्य अकारोऽन्तादेश इत्यर्थः । न च त्यदाद्यत्वमुत्तरपदान्तस्य

द्वन्द्वं मन्त्रयते । रहस्यमित्यर्थः । मर्यादा स्थित्यनतिक्रमः । आचतुरं हीमे पशवो द्वन्द्वं मिथुनीयन्ति । माता पुत्रेण मिथुनं गच्छति । पौत्रेण प्रपौत्रेणापि मर्यादीकृत्य । व्युत्क्रमणं पृथगवस्थानम् । द्वन्द्वं व्युत्क्रान्ताः द्विवर्गसम्बन्धेन पृथगवस्थिताः । द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति । द्वन्द्वं सङ्कर्षणवासुदेवौ । अभिव्यक्तौ साहचर्येणेत्यर्थः । योगविभागादन्यत्रापि द्वन्द्वम् इष्यते ॥

इति द्विरुक्तप्रकरणम् ।

॥ इति श्रीभट्टोजिदीक्षितविरचितायां सिद्धान्तकौमुद्यां पूर्वार्धं समाप्तम् ॥

सिद्धमिति वाच्यम् । संज्ञात्वात्तदप्राप्तेरित्याहुः । **नपुंसकत्वं चेति** ॥ चकारः अनुक्तसमुच्चये । कृतद्वित्वस्य नपुंसकत्वं द्विवचनाभावश्चेत्यर्थः । **आचतुरं हीति** ॥ आङभिविधौ । 'आङ्मर्यादा' इत्यव्ययीभावः । शरत्प्रभृतित्वात् टच् । चतुर्थान्तमिति फलितोऽर्थः । पशवः स्वप्रभृति चतुर्थपर्यन्तं द्वन्द्वं मिथुनीयन्ति इत्यन्वयः । मिथुनशब्देन मैथुनं विवक्षितम् । मिथुनस्य कर्म मैथुनम् । तदिच्छतीत्यर्थे 'सुप आत्मनः' इति क्यच् । फलितमर्थमाह । **मिथुनङ्गच्छतीति** ॥ मिथुनत्वं प्राप्नोतीत्यर्थः । मिथुनायन्ते इति क्यङ्पाठस्तु प्रामादिकः । **मर्यादीकृत्येति** ॥ स्वप्रभृति चतुरोऽभिव्याप्येत्यर्थः । अत्यन्तसहचरितत्वेन लोकविज्ञानाभिव्यक्तिरिति भाष्याल्लभ्यते । तदाह । **साहचर्येणेत्यर्थः इति** ॥ अत्र द्वन्द्वं न्यश्चीत्यत्र वीप्सायां द्वित्वम् । अन्यत्र स्वार्थे इति बोध्यम् । **अन्यत्रापीति** ॥ द्वन्द्वानि सहते इत्यादावित्यर्थः । शीतमुष्णञ्च एकद्वन्द्वम् । सुखं दुःखञ्चापरम् । क्षुत्तृष्णा चान्यत् । इह स्वार्थे द्वन्द्वः । अम्भावादि पूर्ववत् । 'चार्थे द्वन्द्वः' इति निपातनादन्यत्रापीति सिद्धम् ॥—**इति द्विरुक्तप्रकरणम्** ॥

इति श्रीमत्सन्ततसन्तन्यमानश्येनकूर्मषोडशारस्थचक्राकारादिबहुगुणविराजमानप्रौढापरिमित महाध्वरस्य श्रीशाहजी शरभजी तुक्कोजी भोसलचोळमहीमहेन्द्रामात्यधुरन्धरस्य श्रीमत आनन्दरायविद्वत्सार्वभौमस्याध्वर्युणा पञ्चपुरुषीपोष्येण बाल्य एव तद्यानिर्वर्तितापरिमिताग्निविजृम्भितवाजपेयसर्वपृष्ठाप्तोर्यामप्रमुखमखसन्तर्पितशतमखप्रमुखबर्हिर्मुखेन पदवाक्यप्रमाणपारावारपारीणाग्रजन्मविश्वेश्वरवाजपेययाजितो लब्धविद्यावैशद्येन अध्वरमीमांसाकुतूहलवृत्तिनिर्माणप्रकटितसर्वतन्त्रस्वातन्त्र्येण बोधायनापस्तम्बसत्याषाढभारद्वाजकात्यायनाश्वलायनद्राह्यायणादिकल्पसूत्रतद्भाष्यपारीणमहादेववाजपेययाजिसुतेन अन्नपूर्णाम्बागर्भजातेन वासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमायां पूर्वार्धम्

॥ सम्पूर्णम् ॥

॥ श्रीरस्तु ॥

॥ अकारादयनुक्रमेण कौमुदीपूर्वार्धगतसूत्रसूचिका: ॥

॥ श्रीरस्तु ॥

॥ अकाराद्यनुक्रमेण कौमुदीपूर्वार्धगतवार्तिकसूचिका: ॥

ह

॥ श्रीरस्तु ॥

॥ कौमुदीपूर्वार्धगतपरिभाषासूचिका: ॥